श्रीः
भा० स०
टी०
१

ॐनमोनारायणाय ॐस्वभक्तपक्षपातेनतद्विपक्षविदारणं नृसिंहमद्भुतंवंदेपरमानंदविग्रहं ऊतिःपं
चदशाध्यायैःसप्तमेवर्ण्यतेधुना ऊतिर्वासनाप्रोक्तातत्तत्कर्मानुसारिणी शुभाशुभावशुभावेतिद्विधासाहि
तद्भेदतः शुभामहतांकोपात्शुभामहदनुग्रहात् ...पर्यायदेहेऽकुंठमनोरपि वृत्तःसनकुमारादि
स्वदेहेशुभवासना यथाहिदैत्यगर्भेपिप्रह्लादस्यमनःस्थिरा नारदानुग्रहादासविष्णोर्भक्तिवासना
स्वभक्तेवसदाविष्णुर्हितंतमपिरक्षति तृतीयेष्यभवेदाःस्याप्रकसेदात्मसात्मनः अस्मामनीषिणायन्नःके
पोमहदनुग्रहे इतिनश्चैकस्तीनामज्वलतामुच्यते नराटोदयाभिर्देवतत्त्वमतिभेदतः महाकोपानत
कोपोस्यवासनाभेदउच्यते सदा सनाद्युपमेनककर्मीभिः शुद्धचेतसः ।

राजोवाच समः प्रियः सुहृ द्ब्रह्मन्भूतानांभगवान्स्वयं १
इन्द्रस्यार्थेकथंदैत्यानवधीद्वि षमोयथा १ नह्यस्यार्थःसु
रगणैःसाक्षान्निःश्रेयसात्मनः नैवासुरेभ्योविद्वेषोनोद्वेगश्चा
गुणस्यहि २ इतिनःसुमहा भागनारायणगुणान्प्रति ।
संशयःसुमहान् जातःतद्भवांश्छेत्तुमर्हति ३

परैःस्तुवतिभिस्तस्याक्रियतेयथमे निर्णयः नववत्रष्यमेध्यायेहिरण्य
कश्यपोःसुतेः विष्णुभक्तेविरोध स्तविभषणपनर्ईष्यते यद्भक्तपूर्वं
स्तव्यातेहनप्तुत्रादितिः प्राक्तपार्श्विग्राहेणविस्तरम मन्तुनाप्रोकदीप्नेनज्वलतीपर्यवितयोदिति तद्भुता
विस्मितपरीक्षितस्तुतिममरतिविभि नह्यसममस्यसुहृदश्चवैषम्यमारसि नवप्रियस्यशत्रिकर्तृर्भवेयस्योक्तमपि
तदर्थः किंचयस्यार्थैःप्रयोजनंसिद्ध्यतिसतत्पक्षपातीभवति येभ्योवाबिभेतितान्द्वेष्टिद्वेषात्तेननुतत्त्वतो
माहनहीति निःश्रेयसंपरानंदस्वरूपंयस्यअसुरेभ्यःप्राद्वेगोभयंनाक्षिप्तोविद्वेषोपिनास्तिचतस्तस्माद्गुण
त्वस्येति २ श्रीनारायणस्यगुणान्चग्रहानुग्रहादीन्प्रतितत् नसंशयस ३ ॥

भागवतस्य भक्तादस्य माहात्म्यं ८ कृष्णाय व्यासाय कृष्णे मुनिं गतेत्यर्थः ५ यस्मात्प्रकृतेः परः अतो निर्गुणः अत
एवाजः अतएवाव्यक्तः रागद्वेषादिनिमित्तभूतदेहेन्द्रियादिरहितः सोपि स्वमायागुणान् सत्त्वादिकमाविश्याधि
ष्ठाय बाध्यात्मतां प्रसरादिति बाध्यबाधः संपन्नोभूत् यद्वा देवासुरादीनां यः परस्परं बाध्यबाधकतां गतः शमः तद्धेतुः।
जातस्तत्यर्थः ६ तत्र गुणानां स्वीयत्वे सति प्रकृतेश्चैकत्ववद्विषमः स्यात् ननु तदस्तीत्याह सत्त्वमिति ननु संबन्धा
गुणाधिष्ठानेनापि सत्त्वादेर्वैषम्यं स्यादेवं न तु तत्कालकृतवादित्याह तेषामिति साम्येन उल्लासो वृद्धिः ७ सत्त्व
रजस्तमकालेदेवादीन्नृपर्षीन्स्त्रामभजत् तत्तद्देहप्रवेशपूर्वकं पतीत्यर्थः रजसां जयकालेन तमसां जयकाले च तत्र:

शुक उवाच साधु पृष्टं महाराज हरेश्चरितमद्भुतं यो भागवतमाहात्म्यं भगवद्भक्तिवर्धनं ४ गीयते प
रमं पुण्यमृषिभिर्नारदादिभिः नत्वा कृष्णाय मुनये कथयिष्ये हरेः कथाः ५ निर्गुणोपि ह्यजोव्यक्तो।
भगवान्प्रकृतेः परः स्वमायागुणमाविश्य बाध्यबाधकतां गतः ६ सत्त्वं रजस्तम इति प्रकृतेर्नात्मनो गु
णाः नतेषां युगपद्राजन् ह्रास उल्लास एव वा ७ जयकाले तु सत्त्वस्य देवर्षीन्रजसोसुरान् तमसो य
क्षरक्षांसि तत्कालानुगुणोभजत् ८ ज्योतिरादिरिवाभाति संघातान्न विविच्यते विदंत्यात्मानमा
त्मस्थं मथित्वा कवयोन्ततः ९ यदा सिसृक्षुः पुर आत्मनः परो रजः सृजत्येष पृथक्स्वमायया सत्त्वं वि
चित्रासु रिरंसुरीश्वरः शयिष्यमाणस्तम ईरयत्यसौ १० ॥

तत्तत्कालस्यानुगुणो भवन् ८ तस्यापि निमित्तभेदेन वैषम्ये दृष्टान्तः ज्योतिर्यथा काष्ठादिषु मलेयथा पाठे।
षु आकाशो यथा घटादिषु तथा नानारूपश्चाभाति नतु तद्धितः तदेवं विवेकेन प्रतीयते तथाह संघातात् सदादि।
देहान्न विविच्यते न पृथक्प्रतीयते स तर्हि तान् भजतीति कुतो ज्ञायते तत्राह विदंतीति आत्मस्थं परमात्मानं क
वयो निपुणमतयः मथित्वा कार्यदर्शनलिंगेन विचार्य जानंति स्वभावतः मोहिवादनिषेधेन विदन्तीति पाठे त्वा
भोपि ज्ञानमेव अथापि ज्योतिरादिरिवेति दृष्टान्तः यथा काष्ठादेर्दाहदर्शनात् ज्योतिर्ज्ञायते तथा चराचरदर्श
नादात्मा विज्ञायते इति तदेवं मायागुणवत्त्वेन तद्वैषम्यं न स्वाभाविकमिति केचित् तर्हि गुणपारतन्त्र्यादनीश्वरत्वमाशंक्याह यदा आत्मनो जीवस्य भोगाय पु
रः शरीराणि परः परमेश्वरः सिसृक्षुर्भवति तदा मायया नः स्वस्य रजः पृथक् सृजति विचित्रासु रिरंसुः क्रीडितुमिच्छुः सत्त्वं पृथक् सृजति शयिष्य॰

यदासिसृक्षुरित्यादिनिर्दिष्टामुपपत्तीं कालतंत्रं वारयन् प्रधानपुरुषयोरतंत्रमपि वारयति कालमिति हे नरदेव यथा
नत्वेभ्यो निमित्तभूताभ्यां सत्यकृत् प्रभो सर्ववर्ती ईश्वरः तयोर्महदादिना आश्रयभूतं चरंतं वर्तमानं कालं स्वयमेव सृजति सृ
वेष्टानुपपत्तौ कालस्य नतंत्रत्वं तेन ममेत्यर्थः तथापि सत्त्वादिगुणोपाधित्वात् तस्य वैषम्यं तत्राह यएषकालः ससत्त्वमेधयति अतो हेतोः ई
शितापि ईश्वरोपि सत्वं प्रधानं सुरानीकं देवसैन्यमेधयतीत्यर्थः तत्प्रत्यनीकानसुरप्रियः तत्पक्षानुरूपं प्रमिणोति हिनस्ति।
देवसत्वयः उरुश्रवः कीर्तिर्यस्य सः कालशक्तित्वभितगुणागतत्वे वैषम्यं सन्निधिमात्रेण तदधिष्ठातरि स्फुरतीति प्रकरणा
र्थः ११ इदानीं तत्र चैद्यवधोदाहरणपातेन किं ब्राह्मणशापेनासुरीयोनिप्राप्तस्यैरनुग्रहार्थं एवेति वक्तुमितिहासमुप

कालंचरंतंसृजतीश आश्रयं प्रधानपुंभ्यां नरदेव सत्यकृत् य एष राजन्नपि काल ईशिता सत्वं सुरानीकमिवै
धयत्यतः तत्प्रत्यनीकानसुरान् सुरप्रियो रजस्तमस्कान् प्रमिणोत्युरुश्रवाः ११ अत्रैवोदाहृतः पूर्वमितिहा
सः सुरर्षिणा प्रीत्या महाक्रतौ राजन् पृच्छते जातशत्रवे १२ दृष्ट्वा महाद्भुतं राजा राजसूये महाक्रतौ वा
सुदेवे भगवति सायुज्यं चेदिभूभुजः १३ तत्रासीनं सुरऋषिं राजा पांडुसुतः क्रतौ पप्रच्छ विस्मितमना मु
नीनां शृण्वतामिदं १४ युधिष्ठिरः अहो अत्यद्भुतं ह्येतद्दुर्लभैकांतिनामपि वासुदेवे परे तत्वे प्राप्तिश्चैद्यस्य
विद्विषः १५ एतद्वेदितुमिच्छामः सर्व एव वयं मुने भगवन्निंदया वेनो द्विजैस्तमसि पातितः १६ दमघोष
सुतः पाप आरभ्य कलभाषणात् संप्रत्यमर्षी गोविंदे दंतवक्रश्च दुर्मतिः १७ शपतोरसकृद्विष्णुं यद्ब्रह्म पर
मव्ययं श्वित्रो न जातो जिह्वायां नांधं विविशतुस्तमः १८

त्युपति अत्रैव द्वेषादिरहितस्यापि दैत्यवधे १२ चेदिभूभुजः शिशुपालस्य १३ सुरऋषिं नारदं सुरर्षिमिति वक्तव्ये
संध्यभाव आर्षः शृण्वतां इदं वक्ष्यमाणं १४ एकांतभक्तानामपि दुर्लभा प्राप्तिर्विद्विषो जातेत्येतदद्भुतं हि १५ तस्य तद्वेनवन्न
रकपातएवोचित इत्याह भगवन्निंदयेति तमसि नरके १६ दमघोषस्य सुतः शिशुपालः कलभाषणात् बाल्ये को
मलभाषणमारभ्य संप्रत्यधुनापि अमर्षी क्रोधी मत्सरी वा १७ श्वित्रः कुष्ठम् १८ ॥

दुरवग्राह्यं दुष्प्राप्यं धाम स्वरूपं यस्य तस्मिन्लयं सायुज्यं ईयतुः अभूत्तस्यापि दंतवक्त्रस्य तस्मिन्लयं सायुज्यं तज्ज्ञात
कथमाप्येनमिद्धंवन्निदेषाः १९ एतत्त्वद्भुततमे हि अतएव भ्राम्यति भगवान्सर्वज्ञः तं ब्रूहि २० आभाष्य संबो-
ध्य सीदंति निषीदंत्यस्यामिति सत्सभा तस्याः सदस्तत्सदः शृण्वंत्याः कथाः प्राहेत्यन्वयः २१ भगवद्विद्वेषकस्य नरकप्रा-
प्तेन भाव्यमिति वदंतस्तत्त्वकोभिप्रायः भगवत्पीडाकरत्वेन वा तदभावेपि स्वपापनादिवन्निषिद्धनिंदाचरणाद्वा तत्रता
वद्देहाभिमानकृतनिंदानिमित्तत्वाद्रूपीडाहीनं भगवतश्च तदभावात्पीडापोकाल्पेत्याह सार्द्धैस्त्रिभिः निंदनं दोषकी-
र्तनं न्यक्कारः तिरस्कारः निंदनस्तुत्यादिज्ञानार्थं प्रधानपुरुषयोरविवेकेन कलेवरं कल्पितं रचितं २२ तदभिमानेन

कथं तस्मिन्भगवति दुरवग्राह्यधामनि पश्यतां सर्वलोकानां लयमीयतुरंजसा १९ एतद्भ्राम्यति मे बुद्धिर्दी
पार्चिरिव वायुना ब्रूह्येतदद्भुततमं भगवांस्तत्र कारणं २० श्रीशुक उवाच राजस्तद्वच आकर्ण्य नारदो भगवानृ
षिः तुष्टः प्राह तमाभाष्य शृण्वत्यास्तत्सदः कथाः २१ नारद उवाच निंदनस्तवसत्कारन्यक्कारार्थं कलेवरं
प्रधानपरयो राजन्नविवेकेन कल्पितं २२ हिंसा तदभिमानेन दंडपारुष्ययोर्यथा वैषम्यमिह भूतानां
ममाहमिति पार्थिव २३ यन्निबद्धोभिमानोयं तद्वधात्प्राणिनां वधः तथा न यस्य कैवल्यादभिमानोखि
लात्मनः २४ परस्य दमकर्तुर्हि हिंसा केनापि कल्प्यते २५ तस्माद्वैरानुबंधेन निर्वैरेण भयेन वा स्नेहा
त्कामेन वा युंज्यात्कथंचिन्नेक्षते पृथक् २६

भूतानां यथा ममाहमिति वैषम्यं तत्कृतं हिंसादिकं च भवति तथा न यस्य न्नेराणान्वयः दंडः ताडनं पारुष्यं निंदा
तयोर्हेतुभूतयोर्हिंसापीडा च भवति २३ यस्मिन्निबद्धोयमभिमानः तस्य देहस्य वधात्तद्वधस्तथा प्राणिनां यस्याभिमा
नो नास्ति अतोस्य परमेश्वरस्य हिंसा केन हेतुना कल्प्यते न केनापि अभिमानाभावे हेतुः कैवल्यात् अद्वितीयत्वेनाभि
मंतव्याभावात् वैषम्याभावे हेतुः अखिलात्मनः सर्वात्मनः [illegible] हिं किमिति दंडितत्राह परस्येति दमकर्तुः शि
क्षार्थं दंडं करोतीत्यर्थः २४ यस्माद्भगवतो निंदादिकृतं वैषम्यं नास्ति तस्माद्येन केनाप्युपायेन यतस्तेनैव निंदा
दिकृतपापस्यापि नाशात्सायुज्यं युक्तमित्याशयेनाह तस्मादिति समभिः नास्ति वैरं केनापि यस्मिन् तेन भक्तियोगे
नेत्यर्थः युंज्यात्मनः इति शेषः तस्मादेतैरुपायैः पृथक्केनेक्षते २५

तेष्वपि वैरानुबंधः श्रेष्ठ इत्याह यथेति न तथा भक्तियोगेनापीति २६ अत्र दृष्टांतः कीटः पेशस्कृता भ्रमरेण संरुद्धः कुड्यायां स्थापितो भयेन तमेव ध्यायन् तेन २७ वैरेणापि ध्यानविनाभावेन पूतपाप्मानः तं प्रापुः २८ तद्वदेव कामादिनिमित्तं पापं हित्वा २९ ३० तर्हि वेनः किमिति नरके पातितः तीव्रध्यानाभावात् पापमेव तत्फलितमित्याह कतमोऽपीति पुरुषं प्रति पंचानां कामादीनां मध्ये एकतमोऽपि वेनो न भवति तस्मान्नरकं गतः ३१ तदेवमितिहासं प्रस्तावयन् चैद्यस्य प्रासंगिकं रूपमाह मातृष्वस्रेयः

यथा वैरानुबंधेन मर्त्यस्तन्मयतामियात् न तथा भक्तियोगेन इति मे निश्चिता मतिः २६ कीटः पेशस्कृता रुद्धः कुड्यायां तमनुस्मरन् संरंभभययोगेन विंदते तत्स्वरूपतां २७ एवं कृष्णे भगवति मायामनुज ईश्वरे वैरेण पूतपाप्मानस्तमापुरनुचिंतया २८ कामात् द्वेषाद्भयात्स्नेहाद्यथा भक्त्येश्वरे मनः आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः २९ गोप्यः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः संबंधाद्वृष्णयः स्नेहाद्यूयं भक्त्या वयं विभो ३० कतमोऽपि न वेनः स्यात् पंचानां पुरुषं प्रति तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेत् ३१ मातृष्वस्रेयो वश्चैद्यो दंतवक्त्रश्च पांडव पार्षदप्रवरौ विष्णोर्विप्रशापात्पदच्युतौ ३२ युधिष्ठिर उवाच कीदृशः कस्य वा शापो हरिदासाभिमर्शनः अश्रद्धेय इवाभाति हरेरेकांतिनां भवः ३३ देहेंद्रियासुहीनानां वैकुंठपुरवासिनां देहसंबंधसंबद्धमेतदाख्यातुमर्हसि ३४ नारद उवाच एकदा ब्रह्मणः पुत्रा विष्णुलोकं यदृच्छया सनंदनादयो जग्मुश्चरंतो भुवनत्रयं ३५ पंचषड्ढायनार्भाभाः पूर्वेषामपि पूर्वजाः दिग्वाससः शिशून्मत्वा द्वाःस्थौ तान्प्रत्यषेधतां ३६ अशपन्कुपिता एवं युवां वासं न चार्हथः रजस्तमोभ्यां रहिते पादमूले मधुद्विषः ३७

ध्रु

तिपदात् प्रच्युतौ ३२ हरिदासोऽभिमृश्यते अभिभवतीति तथा अश्रद्धेयः अनादरणीय इव असंभवात् भवो जन्म ३३ असंभवमेवाह जन्महेतुभूतैः प्राकृतैर्देहेंद्रियासुभिर्हीनानां शुद्धसत्त्वमयदेहानामित्यर्थः प्राकृतदेहसंबंधेन संबद्धमेतदाख्यानमाख्यातुमर्हसि ३४ ३५ कथंभूताः सनंदनादयः पंचवर्षवत् हायनानि येषां ते अर्भाः बालाः तद्वदाभा येषां ते पूर्वेषां मरीच्यादीनामपि दिग्वाससः दिगंबराः अतः शिशून्मत्वा ३६ वासमपि नार्हथः अतः पुनः

पार्षदयोः त्रिभिर्जन्मभिर्लोकाय स्वस्थानप्राप्तये कल्पतां तावत्तु अयं शापः समाप्यतामिति पुनः प्रोक्ता इत्यर्थः ३८ ३९
यदा द्वारे निमित्ते तस्य तिर्यात्मीहतः ४० हिरण्यकशिपोर्वधकारणं सूचयति हिरण्यकशिपुः पुत्रमिति ४१ सर्वभूताना
मात्मभूतं ऊतः समः ब्रह्मैव पश्यतीति तस्यात्यंतः प्रशान्तं द्वेषादिरहितं अतएव भगवत्तेजसा स्पृष्टं व्याप्तं उद्यमोः प्राप्त

पापिष्ठामासुरीं योनिं बालिशौ यातमाश्वतः एवं शप्तौ स्वभवनात्पतन्तौ तौ कृपालुभिः प्रोक्तौ पुनर्जन्मभिर्वां त्रि
भिर्लोकाय कल्पताम् ३८ जज्ञाते तौ दितेः पुत्रौ दैत्यदानववन्दितौ हिरण्यकशिपुर्ज्येष्ठो हिरण्याक्षोऽनुजस्ततः
३९ हतो हिरण्यकशिपुर्हरिणा सिंहरूपिणा हिरण्याक्षो धरोद्धारे बिभ्रता सौकरं वपुः ४० हिरण्यकशि
पुः पुत्रं प्रह्लादं केशवप्रियं जिघांसुरकरोन्नाना यातना मृत्युहेतवे ४१ सर्वभूतात्मभूतं तं प्रशान्तं समदर्शनं
भगवत्तेजसा स्पृष्टं नाशक्नोद्धन्तुमुद्यमैः ४२ ततस्तौ राक्षसौ जातौ केशिन्यां विश्रवःसुतौ रावणः कुंभकर्णश्
च सर्वलोकोपतापनौ ४३ तत्रापि राघवो भूत्वा न्यहनच्छापमुक्तये रामवीर्यं श्रोष्यसि त्वं मार्कण्डेयमुखात्प्र
भो ४४ तावेव क्षत्रियौ जातौ मातृष्वस्रात्मजौ तव अधुना शापनिर्मुक्तौ कृष्णचक्रहतांहसौ ४५ वैरानुब
न्धतीव्रेण ध्यानेनाच्युतसात्मतां नीतौ पुनर्हरेः पार्श्वं जग्मतुर्विष्णुपार्षदौ ४६ युधिष्ठिर उवाच विद्वेषो द
यिते पुत्रे कथमासीन्महात्मने ब्रूहि मे भगवन्येन प्रह्लादस्याच्युतात्मता ४७ इति श्रीभागवते सप्तमस्कं
धे प्रथमोध्यायः १ नारद उवाच भ्रातर्येवं विनिहते हरिणा क्रोडमूर्तिना हिरण्यकशिपू राजन्पर्य
तप्यद्रुषा शुचा १ आह चेदं रुषा पूर्णः संदष्टदशनच्छदः कोपोज्ज्वलद्भ्यां चक्षुर्भ्यां निरीक्षन्धूम्रमंब
रम् २ करालदंष्ट्रोग्रदृष्ट्या दुष्प्रेक्ष्यभ्रुकुटीमुखः शूलमुद्यम्य सदसि दानवानिदमब्रवीत् ३

पक्षपातादिभिः ४२ विश्रवसः सुतौ ४३ न्यहनत् अहनत् वा इत्यर्थः तदितिदीयकथा तीयमिति पुनस्तत्कथामाह रामवी
र्यमिति ४४ कृष्णचक्रेणाहतमंहो ययोः तौ तयोः पापप्रोक्षहतेनत्वता इत्यर्थः ४५ येन कारणेन प्रह्लादस्याच्यु
तात्मता प्राप्तुतेक इति तत्तदपि ब्रूहीति प्रश्नः ४७ इति श्रीभागवते सप्तमस्कंधे प्रथमोध्यायः १ द्वितीये विष्णुद्वेषेण
लोकं विलापयद्दानवैः तदघ्रातृपुत्रादीनिति हा मैरसान्त्वयत् भगवद्वेष एव ततद्वेषपिकारणमित्याशयेनाह
भ्रातरि हतादिना एवं द्वेषपतापानेन १ कोपेन ततः प्रतिपक्षेन ज्वलद्भ्यां चक्षुर्भ्यां धूम्रमंबरं निरीक्षमाणः २

करालदंष्ट्राभिर्दृष्ट्या उग्रया दुष्प्रेक्षः भ्रुकुटीयुक्तं मुखं यस्य सः ३

श्री: भा॰ स॰ टी॰ ४

समेनापि उपधावनैर्भजनैर्निमित्तभूतैः पार्ष्णिग्राहेणासता ६ एवं त्यक्तः स्वभावः समत्वं येन तस्य घृणेः शुद्धतिमोम
यिस्यापि मायया वनौकसः वराहरूपस्य मतः अस्थिरात्मनः अव्यवस्थितचित्तस्य कुतः यो यो भजति तं तं भजन्तं भजमान
स्यानुसरतः ७ तस्य रुधिरेण यावत्तर्पयिष्यामि तावन्न ग्रंथं भुंक्ष्य इति तृतीयेनान्वयः नतु देवैः तद्वधः कारितः अत
स्तत्किं तद्वधेनेत्यत आह ८ तस्मिन् कूटे कपटे अहिते प्रतिपक्षे कूटमीहते यस्मिन् इति वा नष्टे भ्रष्टे सति देवाः शुष्यंति स्वय
मेव नाशं यास्यंति कुतः विष्णुरेव प्राणो येषां ते ९ तपोयज्ञादिभ्युक्तान् सूदयध्वं घातयध्वं १० ननु तैः किमपराधं तत्रा

भो भो दानवदैतेया द्विमूर्धंस्त्र्यक्ष शंबर शतबाहो हयग्रीव नमुचे पाक इल्वल ४ विप्रचित्ते मम वचः पुलो
मन् शकुनादयः शृणुतानंतरं सर्वे क्रियतामाशु माचिरं ५ सपत्नैर्घातितः क्षुद्रैः भ्राता मे दयितः सुहृत्
पार्ष्णिग्राहेण हरिणा समेनाप्युपधावनैः ६ तस्य त्यक्तस्वभावस्य घृणेर्मायावनौकसः भजंतं भजमानस्य
बालस्येवास्थिरात्मनः ७ मच्छूलभिन्नग्रीवस्य भूरिणा रुधिरेण वै रुधिरप्रियं तर्पयिष्ये भ्रातरं मे गत
व्यथः ८ तस्मिन् कूटेऽहिते नष्टे कृत्तमूले वनस्पतौ विटपा इव शुष्यंति विष्णुप्राणा दिवौकसः ९ ताव
द्यात भुवं यूयं ब्रह्मक्षत्रसमेधितां सूदयध्वं तपोयज्ञस्वाध्यायव्रतदानिनः १० विष्णुर्द्विजक्रियामूलो यज्ञो
धर्ममयः पुमान् देवर्षिपितृभूतानां धर्मस्य च परायणं ११ यत्र यत्र द्विजा गावो वेदा वर्णाश्रमक्रियाः तं तं ज
नपदं यात संदीपयत वृश्चत १२ इति ते भर्तृनिर्देशमादाय शिरसादृताः तथा प्रजानां कदनं विदधुः कदनप्रियाः
१३ पुरग्रामव्रजोद्यानक्षेत्रारामाश्रमाकरान् खेटखर्वटघोषांश्च ददहुः पत्तनानि च १४ केचित्खनित्रै
र्बिभिदुः सेतुप्राकारगोपुरान् आजीव्यांश्चिच्छिदुर्वृक्षान् केचित्परशुपाणयः प्रादहन् शरणान्येके प्रजानां ज्व
लितोल्मुकैः १५ ॥

हि विष्णुरिति द्विजानां क्रियाप्रवृत्तानां मूलं यस्य सः यतोऽसौ यज्ञो धर्ममयस्तु परायणं परमाश्रयः अतो यत्तदुपस्य विरो
मूलत्वान्मामनादरसतदा प्रयाणाद्भूतेन वध्या इति भावः ११ तस्मात् परमेश्वरं मलानेवाह यत्र यत्रेति संदीपयत दहत वृश्च
त छिंदत १२ पुरं नगरादिमत् ग्रामस्तद्रहितः व्रजो गवां वासः उद्यानं कृत्रिमवनं क्षेत्रमेवमीत्यादेः आरामो कृत्रिमवनं
आश्रमस्त्वृषीणां स्थानं आकरो रत्नादीनां खेटः कृषीवलानां वासः खर्वटो गिरिद्रोणी ग्रामयोग्यो ग्रामः घोषः आभीराणां वासः प
त्तनं राजधानी १४ खनित्रैः खननसाधनैः आजीव्यान् उपजीव्यान् शरणानि गृहाणि १५

विप्रकृते उपद्रुते यज्ञभागानामभावात् दिवं परित्यज्य १५ तदेवं प्रजानां कदनं दानवैः कृतं वीक्ष्य स्वयं स्वर्गराज्यादि साधयि
तुं तत्परस्तत्कामः प्रथमं यत्कृतवान् तदाह हिरण्यकशिपुरित्यादिना कटोदकं प्रेताय यद्देयमुदकं आदिशब्दात् अन्येन॰
श्राद्धं च १६ १७ १८ हे वधूरिति भ्रातृभार्यां संबोधयति १९ भवतां नाम तत्स्थं अश्लाघ्यो वधः तथाप्यस्माकं तावत् वेधु
गौन एवेति चेत् तत्राह भूतानामिति दैवेन प्राचीनकर्मणा एकत्र नीतानां संयोजितानां पुनः स्वैः स्वैः कर्मभिरुन्नीता॰
नां वियोजितानां २० एवं लोकदृष्ट्या शोकं निवार्य तत्त्वदृष्ट्या वारयति नित्य इति नित्यः मृत्युशून्यः अव्ययः अपक्षय॰

एवं विप्रकृते लोके दैत्येन्द्रानुचरैर्मुहुः दिवं देवाः परित्यज्य भुवि चेरुरलक्षिताः १५ हिरण्यकशिपुर्भ्रातुः
संपरेतस्य दुःखितः कृत्वा कटोदकादीनि भ्रातृपुत्रानसांत्वयत् १६ शकुनिं शंबरं धृष्टिं भूतसंतापनं वृकं
कालनाभं महानाभं हरिश्मश्रुमथोत्कचं १७ तन्मातरं रुषाभानुं दितिं च जननीं गिरा श्लक्ष्णया देशका॰
लज्ञ इदमाह जनेश्वर १८ हिरण्यकशिपुरुवाच अंबांब हे वधूः पुत्रा वीरं मार्हथ शोचितुं रिपोरभिमुखे
श्लाघ्यः शूराणां वध ईप्सितः १९ भूतानामिह संवासः प्रपायामिव सुव्रते दैवेनैकत्र नीतानामुन्नीतानां
स्वकर्मभिः २० नित्य आत्माव्ययः शुद्धः सर्वगः सर्ववित्परः धत्तेऽसावात्मनो लिंगं मायया विसृजन्गुणा-
न् २१ यथांभसा प्रचलता तरवोपि चला इव चक्षुषा भ्राम्यमाणेन दृश्यते चलतीव भूः २२ एवं गुणैर्भ्रा-
म्यमाणे मनस्यविकलः पुमान् याति तत्साम्यतां भद्रे ह्यलिंगो लिंगवानिव २३ एष आत्मविपर्यासो ह्यलिं-
गे लिंगभावना एष प्रियाप्रियैर्योगो वियोगः कर्मसंसृतिः २४ संभवश्च विनाशश्च शोकश्च विविधः स्मृ॰
अविवेकश्च विनाशश्च विविधः स्म

परः शुद्धः निर्मलः सर्वगः सर्वगतः सर्ववित् सर्वज्ञश्च सर्वं यद्धेतुः परो देहादिव्यतिरिक्तः अतो मृत इति कृत्वा इति म
लिन इति विशुक्र इति स्रज इति शोको न कार्यः इत्यर्थः कथं तर्हि तस्य संसारः तत्राह धत्त इति आत्मनो मायया सर्ववि
शुद्धयालिंगं धत्ते गुणान् सुखादीन् देहान् वा [illegible] विशेषेण सृजन् असौ जीवत्वं लिंगधारी सोपाधिः संसारीत्य॰
र्थः २१ एतत् सदृष्टांतेन प्रपंचयति यथेति चलद्भिः तरवः प्रतिबिंबिताः उपाधिधर्मोपहितो भवतीति दृष्टांतद्वय॰
कृत्वा कथं मोक्षाभावो भवतीति दृष्टांतमात्रमवष्टभ्य वक्ति २२ अविकलः परिपूर्णोपि तत्साम्यतां मनःसमतामित्यर्थः २३
लिंगभावना देहाभिमानः एष आत्मनो विपर्यासः अन्यथाभावः तमेवाह प्रियैर्वियोगः अप्रियैर्योगश्च कर्मवशात् संसृतिश्च

नानागर्भेषु प्रवेशः २४ ततः च संभव उत्पत्तिः विवेकस्यास्मृतिः अ
[illegible]स्थानम् २५

[illegible] ५४

श्री: भा० स० टी० ५

श्वापि शोकहेतुं विना दृष्टेवायं शोकस्त्यमित्यर्थः प्रेतस्य हतस्य तस्यैव बांधवास्तेषां च २६ उपासत तं परिवार्य स्थिताः २७ विशीर्णं रत्नमयं कवचं यस्य विभ्रष्टानि स्रगाभरणानि स्रजश्च यस्य शरेण निर्भिन्नं हृदयं यस्य असृजा रक्तेन आविलं लिप्तं २८ प्रकीर्णाः केशा यस्य ध्वस्ते अक्षिणी यस्य रभसा संरंभेण दष्टो दच्छद ओष्ठो येन रजसा कुंठं आवृतं मुखांभोजं यस्य छिन्नमायुधं भुजश्च यस्य २९ तस्य पादयोरुपसमीपे समंतात् अपतन् ३० ३१ विलापमेवाहुरहो इति द्वाभ्यां अकरुणेनैवमेवाहुः दृगगोचरां दशां येन प्रणीतो गमितः तेन विधात्रा त्वमधुना शुचां विवर्धनः कृ

अत्राप्युदाहरंतीममितिहासं पुरातनं यमस्य प्रेतबंधूनां संवादं तं निबोधत २६ उशीनरेष्वभूद्राजा सुयज्ञ इति विश्रुतः सपत्नैर्निहतो युद्धे ज्ञातयस्तमुपासत २७ विशीर्णरत्नकवचं विभ्रष्टाभरणस्रजं शरनिर्भिन्नहृदयं शयानमसृगाविलं २८ प्रकीर्णकेशं ध्वस्ताक्षं रभसा दष्टदच्छदम् रजःकुंठमुखांभोजं छिन्नायुधभुजं मृधे २९ उशीनरेंद्रं विधिना तथा कृतं पतिं महिष्यः प्रसमीक्ष्य दुःखिताः हताः स्म नाथेति करैरुरो भृशं घ्नंत्यो मुहुः तत्पदयोरुपापतन् ३० रुदत्य उच्चैर्दयिताङ्घ्रिपंकजं सिंचंत्य अस्रैः कुचकुंकुमारुणैः विस्रस्तकेशाभरणाः शुचं नृणां सृजंत्य आक्रंदनया विलेपिरे ३१ अहो विधात्राकरुणेन नः प्रभो भवान्प्रणीतो दृगगोचरां दशां उशीनराणामसि वृत्तिदः पुरा कृतोऽधुना येन शुचां विवर्धनः ३२ त्वया कृतज्ञेन वयं महीपते कथं विना स्याम सुहृत्तमेन ते तत्रानुयानं तव वीर पादयोः शुश्रूषतीनां दिश यत्र यास्यसि ३३ एवं विलपतीनां वै परिगृह्य मृतं पतिं अनिच्छतीनां निर्हारमर्कोऽस्तं संन्यवर्तत ३४ तत्र ह प्रेतबंधूनामाश्रुत्य परिदेवितं आह तान्बालको भूत्वा यमः स्वयमुपागतः ३५ यम उवाच अहो अमीषां वयसाधिकानां विपश्यतां लोकविधिं विमोहः यत्रागतस्तत्र गतं मनुष्यं स्वयं सधर्मा अपि शोचंत्यपार्थम् ३६ ॥

तोऽसीत्यन्वयः ३२ त्वया सुहृत्तमेन विना वयं कथं स्याम भवेम जीवेम मृतः हे वीर यत्र त्वं यास्यसि तत्र ते अनुयानमनुगमनं तव पादयोः शुश्रूषां कुर्वतीनां अस्माकं दिश आदेशय ३३ निर्हारं दाहार्थं नयनं अस्तं अस्ताचलं प्रति ३४ परिदेवितं वादिरोदनं सम्यगेवाश्रुत्य श्रुत्वा तत्र स्वयमेवोपयातो यमः तानाह अहो इत्यादिना ३५ वयसा अस्मत्तोऽधिकानामपि लोकस्य विधिं जन्ममरणादिप्रकारं विपश्यतामपि विमोहमेवाह यत्र यस्मादव्यक्तादागतः तत्रैव गतमपार्थं शोचंति तदुक्तं गीतासु अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत अव्यक्तनिधनान्येव तत्र का परिदेवनेति किंच स्वयमपि सधर्मा मृतेन सह समा

[illegible]

५

अबलान्दुर्बलानपिवृकादिभिरभक्ष्यमाणानवयं तत्रहेतुः योगर्भेरक्षतिसएवहिविश्वंरक्षितारक्षति ३७ ननुतस्यर
क्षणेकिंप्रयोजनंतेनकिंचिदपिकिंतुक्रीडैवकेवलमित्याह यइदंविश्वंसृजतिरक्षतिसंहरतिचयोअबलाः तस्येशि
तुः अबलावर्गंक्रीडासाधनमाहुः अतएवनिग्रहेसंहारेसंग्रहेपालनेचप्रभुः ३८ प्रभुत्वमेवअन्वयव्यतिरेकाभ्यांदर्शय
तिपथीति दिष्टेनदैवेनईश्वरेणरक्षितं तेनईश्वरेणविहितं अस्यहतःतेनोपेक्षितः ३९ तदेवमात्मनोजन्ममरणादि
कमंगीकृत्यस्वाधीनत्वान्नशोकःकार्यइत्युक्तं इदानींतुदेहानामेवजन्मादिननात्मनइत्याहत्रिभिः भूतानिदेहैः
निजयोनिनकारणभूतलिंगशरीरेणनिमित्तैःकर्मभिर्भवंतिजायंतेनभवंतिनश्यंतिच सर्वशःदेवादिदेहाअपितत्र
हंतदाप्रकृतौदेहेस्थितोप्यात्मानस्यागुणैर्देहधर्मैःजन्मादिभिर्नवध्यतेनयुज्यते अतःअन्यतमोदेहादन्यतरविलक्षणः

अहोवयंधन्यतमायदत्रत्यक्ताःपितृभ्यांनविचिंतयामः अभक्ष्यमाणाअबलावृकादिभिःसरक्षितारक्षति
योहिगर्भे ३७ यइच्छयेशःसृजतीदमव्ययोयएवरक्षत्यवलुंपतेचयः तस्याबलाःक्रीडनमाहुरीशितु
श्चराचरंनिग्रहसंग्रहेप्रभुः ३८ पथिच्युतंतिष्ठतिदिष्टरक्षितंगृहेस्थितंतद्विहतंविनश्यति जीवत्यना
थोपितदीक्षितोवनेगृहेपिगुप्तोस्यहतोनजीवति ३९ भूतानितैस्तैर्निजयोनिकर्मभिर्भवंतिकालेनभ
वंतिसर्वशः नतत्रहात्माप्रकृतावपिस्थितःतस्यागुणैरन्यतमोनिबध्यते ४० इदंशरीरंपुरुषस्यमो
हजंयथापृथग्भौतिकमीयतेगृहं यथोदकैःपार्थिवतैजसैर्जनःकालेनजातोविकृतोविनश्यति ४१
यथानलोदारुषुभिन्नईयते यथानिलोदेहगतःपृथक्स्थितः यथानभःसर्वगतंनसज्जते तथापुमान्स र्वगुणाश्रयःपरः ४२

णः ४२ ननुदेहरूपःस्थूलस्तस्मादात्मनोवैलक्षण्यंप्रतीयतेतत्राह इदंमोहजंअविवेकादात्मत्वेनजातंवस्तुतस्तुपृथगेवय
शरीरंयतेदृष्टेनभौतिकंचयथागृहमित्यन्वयः अयंप्रयोगः देहःभौतिकात्पुरुषान्मार्गोविभिन्नःदृश्यत्वात् भौतिक।
त्वाद्यथान्येनाविवेकिनात्मत्वेनाभिमतमपिगृहंततःपृथक्तद्वदिति भौतिकत्वानुमानविरुद्धएवात्मनोजन्माद्यभा
वमुपसंहरति यथोदकैःपरमाणुभिर्जातोबुद्बुदादिर्यथाचपार्थिवैर्जातोघटादिः यथाचतैजसैर्जातःकुंडलादि
र्विनश्यतिनतथानैरेवविविधैःपरमाणुभिर्जातोजनोदेहएवविकृतःपरिणतःसन्विनश्यतिनत्वात्मेत्यर्थः ४१ पृथग
वस्थानाभावेपिभिन्नत्वेदृष्टांतत्रयमाह यथानलोदारुष्वेवस्थितोपिदाहकत्वेनभिन्नएवप्रतीयते यथाचदेहगतोप्यनि
लोनासिकादिषुपृथक्स्थितएवप्रतीयते देहस्थस्यैवात्मनःतद्धर्मयोगाभावेदृष्टांतमाह यथानभोनसज्जतेकापिसंगंन

गच्छतितथापुमानपिसर्वेषांगुणानांदेहेंद्रियादीनामाश्रयःतेषु
स्थितोपिपरःपृथगेवेत्यर्थः ४२

श्रीः
भा॰स॰
टी॰
७

किंचहे मूढाः यमनुशोचथ सोयंशुप्त इतीमयत्ताः शोचेत किमिति शोचथ न वेत्तावंतं कालमसौ शृणोति अनेनतदं प्रति
वक्तिच इदानीं न स्याद्दर्शनान्मृत इति शोचाम इतिचेत् न तु शोचनीयो न भवति प्रागपि न स्याद्दर्शनान्मृतश्च इति शो
चाम इतिचेत् न तु शोचनीयो न भवति प्रागपि न स्याद्दर्शनादित्याह यः श्रोतेति ४३ ननु मुख्यप्राणो नासिकासंचारी प्राणः
श्रोता वक्ता च देहे दृष्ट एव नासौ श्रोता वक्ता च अचेतनत्वादित्याह न श्रोतेति महान् सर्वेन्द्रियचेष्टाहेतुः अतएव मुख्यः प्रा
णोऽपि मुख्य इति स्फुटं कस्तर्हि वक्ता श्रोता चेत्तत्राह यस्त्विह देहे इन्द्रियवान् तत्र द्रष्टा आत्मा स तु प्राणदेहाभ्यामन्यएव
स चेतनः ४४ ननु चेतनत्वेनैव तस्याहं कृशः स्थूलः काणो बधिर इत्यादि देहधर्मोपलब्धिः अतः तत्राह भूतेन्द्रि
यमनोभिः लिंग्यन्ते लक्ष्यन्ते इति लिंगानि तथाभूतान् देहान् तेभ्योऽन्य एव भजति अहमिति मन्यते तर्हि कथं मोक्षः तत्राह नच

न यत्तानन्वयेशोते मूढा यमनुशोचथ यः श्रोता योऽनुवक्तेह स न दृश्येत कर्हिचित् ४३ न श्रोता नानुवक्तायं मुख्योऽप्यत्र महानसुः यस्त्विहेन्द्रियवानात्मा स चान्यः प्राणदेहयोः ४४ भूतेन्द्रियमनोलिंगान्देहानुच्चावचान्विभुः भजत्युत्सृजति ह्यन्यस्तच्चापि स्वेन तेजसा ४५ यावल्लिंगान्वितो ह्यात्मा तावत्कर्मनिबंधनं ततो विपर्ययः क्लेशो मायायोगोऽनुवर्तते ४६ वितथाभिनिवेशोऽयं यद्गुणेष्वर्थदृग्वचः यथा मनोरथः स्वप्नः सर्वमैन्द्रियकं मृषा ४७ अथ नित्यमनित्यं वा नेह शोचन्ति तद्विदः नान्यथा शक्यते कर्तुं स्वभावः शोचतामिति ४८ लुब्धको विपिने कश्चित्पक्षिणां निर्मितोऽन्तकः वितत्य जालं विदधे तत्र तत्र प्रलोभनम् ४९
कुलिंगमिथुनं तत्र विचरत्समदृश्यत तयोः कुलिंगी सहसा लुब्धकेन प्रलोभिता ५०

भजनेऽप्येतेन तेजसा विवेकबलेन उत्सृजत्यपि हि स्त्यन्मुमं प्रमाणयति ४५ ननु विवेकानन्तरमप्याहारादिकर्म तत्प्रवृत्तेर्बं
धः स्यादेवेत्यत आह यावल्लिंगशरीरेणान्वितः तदभिमानेन निवृत्तेऽपि यतो येन मायायोगो विपर्ययादि मायया तु अनुवर्तते इति
तथा न परमार्थ इत्यर्थः ४६ ननु सुखदुःखादीनां तत्साधनानां च सत्यत्वप्रतीतेः कुतो मायामयत्वं तत्र यावदहं वादि
नः सत्यत्वमेव वदेदित्यत आह वितथा मिथ्याभूतोऽयमभिनिवेशः कोऽसौ गुणेषु तत्कार्येषु सुखादिष्वर्थः परमार्थ इति दृ
क् च वचश्चेति यत् अतः स्वप्नवत् आह यथेति ४७ उपसंहरति अथ यत नित्यमात्मानमनित्यं देहं वा न तद्विदः विशुमति
न वैजानन्तः नन्वेवमुपदेशे शोचितः तत्राह नान्यथेति ज्ञानदार्ढ्याभावात् स्वभावान्निवर्तनस्यार्थः ४८ स्वयं स्वधर्मा एवं इतीयकरूत्वेनं तु निद
समाह लुब्धक इत्यादिना पक्षिणामन्तकं प्रमरणनिमित्तः सन् यत्र तत्र प्रलोभयत् जालं विस्तार्य विशेषेण धृतवान् धान्यकणैर्मांसादिभिः आमिषादिभिः

प्रलोभनं कृतवानित्यर्थः ४९

ज्ञानवानात्मा भवति तावदेव तस्य तत्कर्मनिबंधनं बंधश्च भवति ततो वि
पर्ययः देहधर्मभाक्त्वं क्लेशश्चानुवर्तते न तु लिंगाभि

कुलिंगः कंदमत्तापविशेषः कुलिंगयोर्मिथुनं ५० शिवस्तेयांजालस्य स्तरेमत्तनवंधंप्राप्यापञ्चं ग्रापदाशशो ५१ ग्राककृणा
पार्श्वतोनुकंपया ५२ ग्रात्मनो देहस्यार्धेन विधुरा दुःखितो भार्यामृत्यजीवितेनानेन दुःखेन यथाभूयस्यैवंजीवनात्किमेप्रयोजनं ग्र
तोमामपिकामेनयमित्यन्वयः ५३ नजातापत्तायेषां तान् कथंविभर्मि पोष्यामिमेप्रजामातरंप्रतीक्षेते ५४ शाकुनिकः पक्षि
हेतानिलीनःसन् ५५ ग्रात्मापायंस्वमृत्युं ५६ ग्रयथास्थिमिथ्याविवर्शंते ५७ सोपराधिकेपरलोकहेतवे ५८ ग्रशोचनेतिपा

कुलिंगमिथुनं तत्र विचरत्समदृश्यत तयोः कुलिंगी सहसा लुब्धकेन प्रलोभिता ५० सासज्जत शिचस्तस्यां म
दिष्टकालयंत्रिता कुलिंगस्तां तथापन्नां निरीक्ष्य भृशदुःखितः स्नेहादकल्पः कृपणः कृपणां पर्यदेवयत् ५१
ग्रहो ग्रकरुणो देवः स्त्रियाकारुणया विभुः कृपणां मानुशोचंत्या दीनया किं करिष्यति ५२ कामं नयतु मां देवः कि
मर्धेनात्मनो हि मे दीनेन जीवता दुःखमनेन विधुरायुषा ५३ कथं त्वजातपक्षांस्तान्मातृहीनान्बिभर्म्यहं मंदभा
ग्याः प्रतीक्षंते नीडे मे मातरं प्रजाः ५४ एवं कुलिंगं विलपंतमारात्प्रियावियोगातुरमश्रुकंठं स एव तं शाकुनिकः
शरेण विव्याध कालप्रहितो विलीनः ५५ एवं यूयमपश्यंत्य आत्मापायमबुद्धयः नैनं प्राप्स्यथ शोचंत्यः पतिं व
र्षशतैरपि ५६ हिरण्यकशिपुरुवाच बाल एवं प्रवदति सर्वे विस्मितचेतसः ज्ञातयो मेनिरे सर्वमनित्यमयथो
त्थितं ५७ यम एतदुपाख्याय तत्रैवांतरधीयत ज्ञातयोपि सुयज्ञस्य चक्रुर्यत्सांपरायिकं ५८ ततः शोचत मा स्म
यूयं परं चात्मानमेव च क आत्मा कः परो वात्र स्वीयः पारक्य एव च ५९ स्वपराभिनिवेशेन विनाज्ञानेन देहिनाम् ६०
नारद उवाच इति दैत्यपतेर्वाचं दितिराकर्ण्य सस्नुषा पुत्रशोकं क्षणात्त्यक्त्वा तत्त्वे चित्तमधारयत् ६१ इति श्रीभाग
वते सप्तमस्कंधे द्वितीयोध्यायः २ नारद उवाच हिरण्यकशिपू राजन्नजेयमजरामरं आत्मानमप्रतिद्वंद्वमेक

राज्यं व्यधित्सत १ ॥

ठेयं स्वपराभिनिवेशादेवात्तानेंतेनविना ५९ सस्नुषा स्नुषया सहिता ६१ इति श्रीभावार्थदीपिकायां सप्त
मस्कंधे द्वितीयोध्यायः २ तृतीयेन स्वतपसा तप्तं वीक्ष्य जगद्विधिः आगत्य विस्मितस्तेन संस्तुतो स वरानदात् तदेवं सा
त्त्वनांकदनेन दानवानांदिष्यवधूनां शोकं तन्निवृत्तिं दर्शितेनापुना यत्कृतवान्नदाहहिरण्यकशिपुरित्या
दिना अप्रतिद्वंद्वं प्रतिपक्षहीनमेकराज्यमेकमेव राजानं
व्यधित्सत कर्तुमैच्छत् १ ॥

श्रीः
भा.म.
टी.
७

ऊर्ध्वबाहुरघस्यनमभिहृष्टिर्यस्य पादांगुष्ठेनाश्रितावनिर्येन २ जटानां दीधितिभिः कांतिभिः श्रेष्ठभिः रश्मिभिः प्रलयका
लीनार्ककुवरेज पूर्वं यथा प्रलाहितानाः सन्तोः विवरुः ते देवाः पुनः स्थानानि स्थाभिजिरे ३ विष्वगीरितः सर्वतः प्रसृतः सन् ४ दीपेरभि
भूमहिताः भूमुत्तिता ५ ६ तदवलिह्यानाः कर्पदाः प्रजाकुर्विलाइतिवा यभितो भवतो स्वभिभूः हेब्रह्मभो सर्वाधिपतेपाठ
तेर भोइति संबोधनं प्रभिप्रभितो यावत्तनेह्यतीति तथा संबंधः ७ वल्मतातस्मिन्न्हेय प्रसादयितेतत्संकल्पमन्ये तस्येति
वतुर्भिः यद्यायस्याभिनिवेदितं तत्र याचयता ८ तयोयोगयोः समाधिना निष्ठयासर्वाधिस्येभ्यः श्रेष्ठं निजासनेसत्य
लोकं यथा पूर्वं ध्याल्लेशुपिशति ९ तत्रैवात्मनः साधयिष्यामि तत्र ब्रह्मणा स्मृति दीर्घायुषा तपः तमानत्साधितंप्रत्यः
तः तत्साधयेत् तथाह कालात्मनो हीति ययप्याद्युपोऽल्पत्वेनदेहो वारंवारं म्रियेत तथापि कालस्यात्मनस्त्वनित्यत्वात् वक्ष

सनेयमहरहोरणात्तपःपरमदारुणं ऊर्ध्वबाहुर्नभोहृष्टिः पादांगुष्ठाश्रितावनिः २ जटादीधितिभिः रेजे संवर्ता
र्कइवांशुभिः तस्मिंस्तपस्तप्यमाने देवाः स्थानानि भेजिरे ३ तस्य मूर्ध्नः समुद्भूतः सधूमोऽग्निस्तपोमयः तिर्यगूर्ध्व
मधो लोकान् व्यतपद्विष्वगीरितः ४ चलुर्नद्यः समुद्राश्च महीपाद्रिः चचाल भूः निपेतुः सग्रहास्तारा जज्वलु
श्च दिशो दश ५ तेन तप्ता दिवं त्यक्त्वा ब्रह्मलोकं ययुः सुराः धात्रे विज्ञापयामासुर्देवदेव जगत्पते ६ दैत्येन्द्र
तपसा तप्ता दिवि स्थातुं न शक्नुमः तस्य चोपशमं भूमन् विधेहि यदि मन्यसे लोका न यावन्नंक्ष्यन्ति बलिहारास्तवा
भिभो ७ तस्यायं किल संकल्पश्चरतो दुश्चरं तपः श्रूयतां किं न विदितस्तवाथापि निवेदितं ८ सृष्ट्वा चराचर
मिदं तपो योग समाधिना अध्यास्ते सर्वधिष्ण्येभ्यः परमेष्ठी निजासनं ९ तदहं वर्धमानेन तपोयोगसमाधिना
अध्यास्ते सर्वधिष्ण्येभ्यः परमेष्ठी निजासनं कालात्मनश्च नित्यत्वात् साधयिष्ये तथात्मनः १० अन्यथेदं विधास्येऽह
मयथापूर्वमोजसा किमन्यैः काल निर्धूतैः कल्पान्ते वैष्णवादिभिः ११ इति शुश्रुम निर्बंधं तपः परममास्थितः

भिर्जन्मभिः तपः तपः तमानत्साधयिष्याम्येवेति १० वर्धमानेनेति यदुक्तं तस्य फलमाह अन्यथेति सृष्ट्यादिव्यत्ययेन अन्यथा
पूर्वं पुण्यपापादिव्यत्ययेन इदं जगद्विधास्यामि वैष्णवादिभिर्ध्रुवादिपदैः किं प्रयोजनं अतस्तदेव साधयिष्यामि ११ इति च
मन्वन्तरं तपस्यतोऽस्य तपस्यति निर्बंधं शुश्रुम यतः तपोऽसौ नियुः परमं तपस्यास्थितः यदुक्तं तदनेन एवमेव विधत्स्वयं यथा तव स्थानं प्रति
मतिसाधनाम तनिष्टं स्यादिति श्लोकेन आहुः तवेति १२ ॥

तवपारमेष्ठ्यमिदमासंवदितानांगवांनांचभवायोद्भवायश्रेयसेसत्वायभूत्यैश्वर्यायदेमायलब्धपालनाय विजयायत्र
कर्षाय २२ २४ वल्मीकादिभिः प्रतिच्छन्नप्रथमेनदृष्टपश्चात्कथंचिद्दृष्टंतंशरैस्तनिहत्याद्यन्वयः आवीतासम
तारदितंमेदः त्वक्मांसशोणितानियस्य २५ अभ्रैराच्छादितंछन्नंरविमिवविलक्ष्य २६ हृत्सारंधैर्यंदंशैर्मदितकाविशे
र्भक्षितोदेहोयस्य २८ निरंबुः निषद्धमंबुयेनमसः पक्वोदकरत्यर्थः २४ तेऽन्नेनेनव्यवसायेनैवताद्वानितोहं नष्टाः

तवाप्समेतंदिव्यंगवांपारमेष्ठ्यंजगत्पते भवायश्रेयसेभूत्यैक्षेमायविजयायच २२ इतिविज्ञापितोदेवैर्भगवा
नाब्जभूर्नृप परीतोभृगुदक्षाद्यैर्ययौदैत्येश्वराश्रमम् २४ नददर्शप्रतिच्छन्नंवल्मीकतृणकीचकैः पिपी
लिकाभिराचीर्णंमेदस्त्वङ्मांसशोणितं २५ तपन्तंतपसालोकान्यथाभ्रापिहितंरवि विलक्ष्यविस्मितःप्रा
हप्रहसन्हंसवाहनः २६ ब्रह्मोवाच उत्तिष्ठोत्तिष्ठभद्रंतेतपःसिद्धोसिकाश्यप वरदोहमनुप्राप्तोवि
यतामीप्सितोवरः २७ अद्राक्षमहमेतत्तेहृत्सारंमहदद्भुतं दंशभक्षितदेहस्यप्राणाह्यस्थिषुशेरते २८
नैतत्पूर्वर्षयश्चक्रुर्नकरिष्यन्तिचापरे निरंबुर्धारयेत्प्राणान्कोवैदिव्यसमाःशतं २९ व्यवसायेनतेनेन
दुष्करेणमनस्विनां तपोनिष्ठेनभवताजितोहंदितिनंदन ३० ततस्तआशिषःसर्वाददाम्यसुरपुंगव
मर्त्यस्यतेह्यमर्त्यस्यदर्शनंनाफलंमम ३१ नारदउवाच इत्युक्त्वादिभवोदेवोभक्षितांगंपिपीलकैः कमंड
लुजलेनौक्षद्दिव्येनामोघराधसा ३२ सतत्कीचकवल्मीकात्सहओजोबलान्वितः सर्वावयवसंपन्नो
वज्रसंहननोयुवा २२ उत्थितस्तप्तहेमाभोविभावसुरिवैधसः २३ सनिरीक्ष्यांबरेदेवंहंसवाहमवस्थि
तं ननामशिरसाभूमौतद्दर्शनमहोत्सवः २४ उत्थायप्रांजलिःप्रह्वईक्षमाणोदृशाविभुं हर्षाश्रुपुल
कांगोगिरागद्गदयागृणात् २५ हिरण्यकशिपुरुवाच कल्पान्तेकालसृष्टेनयोन्धेनतमसावृते

निष्ठेनभवतास्मत्तपसाजितः ३० अमर्त्यस्यममदर्शनंअफलंनभवति ३१ आदौभवतीत्यादिभवः ओजस्योदितवाय
वज्रवत्संहननंयस्य गात्राद्युत्पत्त्यनन्तस्यतेजस्त्वंयस्याभावस्य २२ तस्यदर्शनमेवमहानुत्सवोयस्य २४ हर्षाश्रुणापुल
कोद्भेदश्चयस्य २५ अंधेननिविडेनतमसाहेतुःकालसृष्टेनप्रकृतिगुणात्मयेनाधीतेनतममसाहतमिदंजगत्यःअभिव्य

यस्त्ववि गुणोयेनात्मनात्मस्थेजातिश्चवति लुंपति च तस्मै च नमः सत्वतमसांधाम्ने श्राश्रयाय महतेनपरायपरमेश्वरायनमइति
हृषेत्यन्वयः २७ अथचस्वप्रकाशकत्वेनजगत्प्रकाशकत्वेनस्वस्मादिकर्तृत्वेनमहत्वेनपरमेश्वरत्वेनचेतिषड्विधत्वमुक्तंतदेवप्र
पंचयन्नमस्करोतिनमइतिचतुर्भिः बीजायकारणायनमः तदेहेतुराद्याद्यत्ज्ञानेत्ज्ञाभिःविज्ञानेविषयाकारज्ञानंतेरूप
त्तिर्यस्यतस्मैस्वप्रेनेनस्वप्रकाशत्वंदर्शितंबीजायेतिनिमित्तत्वमुक्तं उपादानत्वमाह प्राणादयोयेविकाराःतैर्व्यक्ति
कार्याकारंईयुषेप्राप्तवते २८ एवमात्मनावृतत्वेनलोककारणत्वंदर्शितं महत्वमैश्वर्यंचाह त्वमेव
जगतोजंगमस्यतस्थुषःस्थावरस्यचईशिषेनियंतासिकेनमुख्येनप्राणेनस्वस्वात्मत्वेन अतस्त्वंप्रजापतिःना॰

आत्मनावृतत्वेदंस्त्वमेवविलुंपति इनः सत्वतमेधाम्नेपरायमहतेनमः २७ नमस्त्राद्यायबीजाय
ज्ञानविज्ञानमूर्तये प्राणेंद्रियमनोबुद्धिविकारैर्व्यक्तिमीयुषे २८ त्वमीशिषेजगतस्तस्थुषश्चप्राणे
नमुख्येनपतिःप्रजानां चित्तस्यचित्तेर्मनइंद्रियाणांपतिर्महान्भूतगुणाशयेशः २९ त्वंसप्ततंतून्वि
तनोषितन्वात्रय्याचतुर्होत्रिकविद्ययाच त्वमेकआत्मात्मवतामनादिरनंतपारःकविरंतरात्मा ३० त्व
मेवकालोनिमिषोजनानामायुर्लवाद्यवयवैःक्षिणोषि कूटस्थआत्मापरमेष्ठ्यजोमहांस्त्वंजीवलो
कस्यचजीवआत्मा ३१ त्वत्तःपरंनापरमप्यनेज ॥ ॥

संचित्तस्यचित्तेश्चतन्यवृत्तीनामधृतायाश्चेतनायाःमनसश्चतत्रियमानामिंद्रियाणांचपतिः अतस्त्वमेवमहान्भूता
नामाकाशादीनांतद्गुणानांशब्दादिविषयाणांआशयानांतद्वासनानामीशस्त्वमेवनेवस्रष्टृत्वंदर्शितं २९ स्रष्टृत्वीय
त्वमवर्तकत्वेनअंतर्यामित्वेनजगन्मूलकत्वमाह त्वमेवसप्ततंतून्अग्निष्टोमादियज्ञान्विस्तारयसिकथंत्रय्यातन्वावे
दत्रयरूपेणाकथंभूतयाचतुर्होत्राहोतारोयत्रतच्चातुर्होत्रिकंकर्मतद्विषययाआत्मवतांप्राणिनामात्मभूतः त्वमेवांतरा
त्मावअंतर्यामीकुतः यतःकविःसर्वज्ञःतत्कुतःएकःअद्वितीयःतत्रहेतुः अनादिरनंतपारश्चेतिनास्तिपतःकालतश्चा
दिरंततदेशतोयस्मात् ३० कालरूपेणसंहर्तृत्वमाहत्वमेवतिलवाद्यवयवैःक्षिणोषितद्यस्मितदेवस्रष्टादिकर्तृत्वे
पिनिर्विकारत्वमेवाहकूटस्थइतितत्रहेतवःआत्माज्ञानरूपःपरमेष्ठीपरमेश्वरःअजःजन्मशून्यःमहान्अपरिच्छिन्नः

[illegible]

तत्कुतः तत्राह स्वमत्रजनितं त्वत्तो व्यतिरिक्तं यदि किंचिद्भवेत् तर्हि तस्माज्जन्मादिविकारस्तव नियम्यत्वादिकं वा भवेत् त्वत्तः
परं कारणं अपरं कार्यं तदेवेजदनेजदनेजत् स्थावरं व्यतिरिक्तं नास्ति बोधकं शास्त्रं व्यतिरिक्तमस्तीति चेत् नय
तः विद्यावेदा षडंगादि विद्यास्थानानि कलाश्च नरंगानि तनवस्तनवः तनव्यतिरिक्ताः तत्कुतः यतः त्वं बृहद्ब्रह्मासि
तदपि कुतः तत्राह हिरण्यरूपं ब्रह्मांडं गर्भे यस्य सः त्रिपृष्ठः त्रिगुणात्मकस्य प्रधानस्य पृष्ठे परतः स्थितः अतएव
तः परस्मादित्युक्तेः ३२ ननु ब्रह्मांडशरीरस्य मम कर्तृत्वो ब्रह्मत्वं कुतो वा ब्रह्मांडगर्भत्वादित्याह व्यक्तं कार्यमिदं तव
शरीरं व्यक्तं स्यामित्यवायेन शरीरेणानमिंद्रियप्राणमनसां गुणान्विषयानुभुंक्षे किंतु पारमेष्ठ्ये परमे स्वयं धामनि स्थि

त्वत्तः परं नापरमप्यनेजदेजच्च किंचिद्व्यतिरिक्तमस्ति विद्याकलास्ते तनवश्च सर्वा हिरण्यगर्भोसि बृहत्त्रिपृ
ष्ठः ३२ व्यक्तं विभो स्थूलमिदं शरीरं येनेंद्रियप्राणमनोगुणांस्त्वं भुंक्षे स्थितो धामनि पारमेष्ठ्ये अव्यक्त आ
त्मा पुरुषः पुराणः ३३ अनंताव्यक्तरूपेण येनेदमखिलं ततं चिदचिच्छक्तियुक्ताय तस्मै भगवते नमः
३४ यदि दास्यस्यभिमतान्वरान्मे वरदोत्तम भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्माभून्मम प्रभो ३५ नांतर्बहिर्दिवा
नक्तमन्यस्मादपि चायुधैः न भूमौ नांबरे मृत्युर्न नरैर्न मृगैरपि व्यसुभिर्वासुमद्भिर्वा सुरासुरमहोरगैः
३६ अप्रतिद्वंद्वतां युद्धे ऐकपत्यं च देहिनां सर्वेषां लोकपालानां महिमानं यथात्मनः तपोयोगप्रभा
वाणां यन्न रिष्यति कर्हिचित् ३७ इति भागवते सप्तमस्कंधे तृतीयोध्यायः ३ नारद उवाच एवं वृतः शतधृ
तिर्हिरण्यकशिपोरथ प्रादात्तत्तपसा प्रीतो वरांस्तस्य सुदुर्लभान् १

रूपतिरोधानेन अनंतमव्यक्तरूपात्मनिरूपाधिब्रह्मेव पुराणपुरुषत्वमर्थः ३३ ननु ब्रह्मत्वे पुराणपुरुषत्वं कथमेक
स्यात्तत्राह हे अनंत येन अव्याप्तेन मनोवचनातीतेन रूपेण इदं विश्वं ततं व्याप्तं तस्मै नमः भगवते अविशेषस्वरूपायेत।
मः भगवत्त्वे हेतुः चिदचिच्छक्तिर्विद्याविद्याशक्तिर्मायाताभ्यां युक्तायेति ३४ ३५ अन्यस्मात् त्वत्सृष्टव्यतिरिक्तादपि भगवतः
आयुधैश्च मा भूत् ३६ व्यसुभिः अप्राणैः असुमद्भिः सप्राणैः ३७ यथा आत्मनस्तवास्ति तथा अप्रतिद्वंद्वतादिकं देहि
नियोगः तपसा योगेन च प्रभावो येषां तेषां यत् अणिमाद्यैश्वर्यं न रिष्यति न नश्यति तच्च देहीत्यर्थः ३८ सप्तमे तृतीयः ३
चतुर्थे तत्र तल्लब्ध्वा विजित्याखिललोकपान् विस्मृत्य देवर्णानां सर्वान्द्वेष्टि स्म पीडयत् शतधृतिर्ब्रह्मा ममात्मनः यद्यपो

८

श्री: भा: स्कं ८

प्रमेयेनुग्रहोयस्य ३ पदर्थेनम: तमेतदाह एवमिमादि ४ ५ ६ सर्वेषांसत्त्वानांपालितानांयेयेपतय:तान् ७
त्रिविष्टपस्वर्गमध्यास्तेस्मप्राधिष्ठितवान्तत्रमहेन्द्रभवनमभ्युवामप्रधिवसतिस्म ८ प्रविलसंपद्दियुक्तमेवाह
यत्रेतिविभि: ९ मुक्तादामानिपरिच्छदापरिकरा:यासां १० सदतीसदस्य: ११ ऊर्जितमधिकंवंशीतीब्रह्मघ्ना।

ब्रह्मोवाच तातेमेड्डलेभाण्डंसोयावृद्वणीपैवयान्नम् तथापिविनशेस्वगवशान्नदपिडुर्लभात् २ ततो
नतोमभगवाननेचान्नुग्रहातिमु: प्रजितोस्वरवर्यात्स्वयमाणा:प्रजेश्वरै: ३ एवंलब्धवरोदैत्या।
विप्रहेममनुयवुड: भावमकरोदपंप्रातवधकरोदपंप्रानवधमनुस्मरन् ४ मविनिर्यदिषा:सर्वा
लोकाप्नुवीमहासुर: देवासुरमनुष्यांश्चनान्यवैगरुडोरगान् ५ सिद्धचारणविद्याधरानृषीन्पितृप
तीन्महान् यक्षरक्ष:पिशाचंश्चप्रेतभूतपतीनपि ६ सर्वसत्त्वपतीन्जित्वावशमानीयविश्वजित् ज
हारलोकपालानांस्थानानिसहतेजसा ७ देवोद्यानश्रियाजुष्टमध्यास्तेस्मत्रिविष्टपं महेन्द्रभवनेसा
न्तानिर्मितंविश्वकर्मणा त्रैलोक्यलक्ष्म्यायतनमध्युवासाखिलर्द्धिमत् ८ यत्रविद्रुमसोपानामहा
मारकताभुव: यत्रस्फाटिककुड्यानिवैदूर्यस्तंभपंक्तय: ९ यत्रचित्रवितानानिपद्मरागासनानिच
पय:फेननिभा:शय्यामुक्तादामपरिच्छदा: १० कूजद्भिर्नूपुरैर्देव्या:शब्दयन्त्य:इतस्तत: रत्नस्थलेषुप
श्यन्तिसुदती:सुदर्शनं ११ तस्मिन्महेन्द्रभवनेमहाबलोमहामनानिर्जितलोकएकराट् रेमेभिवंद्यां
घ्रियुग:सुरादिभि: प्रतापितैरूर्जितचंडशासन: १२ तमंगमत्तंमधुनोरुगंधिनाविवृत्तताम्राक्षमशेष
धिष्ण्यपा: उपासतोपायनपाणिभिर्विनात्रिभिस्तपोयोगवलोजसांपदं १३ जगुर्महेन्द्रासनमोजसास्थितं
विश्वावसुस्तुंबुरुरस्मदादय: गंधर्वसिद्धाऋषयोस्तुवन्मुहु:विद्याधराश्चाप्सरसश्चपाण्डव १४ सएवव
र्णाश्रमिभि:क्रतुभिर्भूरिदक्षिणै:इज्यमानोहविर्भागानग्रहीत्स्वेनतेजसा १५ कुसपद्यागस्यासीत्समही
पवतीमही तथाकामदुघागावोनानाश्चर्यपदंनभ: १६ रत्नाकराश्चरत्नौघास्तस्यस्यूहुरूर्मिभि:
तारवणीधृतक्षीरदधितीरामृतोदका: १७ शैलाद्रोणीभिराक्रीडंसर्वर्तुषुगुणान्द्रुमा: दधुर्लोकपा

सर्वेयस्य १८ एवंमहेन्द्रराजन्नुरुगंधिनाउरुगंधेनमधुनास्वरयामत्तंप्रतएवव्रतेविघूर्णितनेत्राप्रतिग्रहिणीयस्यतंप्र
शेषधिष्ण्यपा:सर्वलोकपाला:उपायनयुक्तै:पाणिभिरुपासतत्रिभिर्वाग्निविश्वरूपैर्विनापदमाश्रयभूतंउपासतप्रका

निर्जिताः ककुभो येन यथोपजोषं यथा प्रीति १९ यत्पदं काष्ठा २२ अरूपा वक्तृरहिता तामेवाह २४ मद्दर्शनं श्रेयसां सर्वेषां श्रेयसामुपपत्तये संसिद्धये २५ २७ न तु देवादि विद्वेषमात्रेण विनाशो नास्ति ब्रह्मवरेणोर्जितत्वात् तत्राह निर्वैरायेति

स इत्थं निर्जितककुबेकराड्विषयान्प्रियान् यथोपजोषं भुंजानो नातृप्यदजितेंद्रियः १९ एवमैश्वर्यमत्तस्य दृप्तस्योच्छास्त्रवर्तिनः कालो महान्व्यतीयाय ब्रह्मशापमुपेयुषः २० तस्योग्रदंडसंविग्नाः सर्वे लोकाः सपालकाः अन्यत्रालब्धशरणाः शरणं ययुरच्युतं २१ तस्यै नमोस्तु काष्ठायै यत्रात्मा हरिरीश्वरः यद्गत्वा न निवर्तंते शांताः संन्यासिनोमलाः २२ इति ते संयतात्मानः समाहितधियोमलाः उपतस्थुर्हृषीकेशं विनिद्रा वायुभोजनाः २३ तेषामाविरभूद्वाणी अरूपा मेघनिःस्वना संनादयंती ककुभः साधूनामभयंकरी २४ मा भैष्ट विबुधश्रेष्ठाः सर्वेषां भद्रमस्तु वः मद्दर्शनं हि भूतानां सर्वश्रेयोपपत्तये २५ ज्ञातमेतस्य दौरात्म्यं दैतेयापसदस्य यत् तस्य शांतिं करिष्यामि कालं तावत्प्रतीक्षत २६ यदा देवेषु वेदेषु गोषु विप्रेषु साधुषु धर्मे मयि च विद्वेषः स वा आशु विनश्यति २७ निर्वैराय प्रशांताय स्वसुताय महात्मने प्रह्लादाय यदा द्रुह्येद्धनिष्येपि वरोर्जितं २८ नारद उवाच इत्युक्ता लोकगुरुणा तत्प्रणम्य दिवौकसः न्यवर्तंत गतोद्वेगा मेनिरे चासुरं हतम् २९ तस्य दैत्यपतेः पुत्राश्चत्वारः परमाद्भुताः प्रह्लादोभून्महांस्तेषां गुणैर्महदुपासकः ३० ब्रह्मण्यः शीलसंपन्नः सत्यसंधो जितेंद्रियः आत्मवत्सर्वभूतानामेकः प्रियसुहृत्तमः ३१ दासवत्संनतार्यांघ्रिः पितृवद्दीनवत्सलः भ्रातृवत्सदृशे स्निग्धो गुरुष्वीश्वरभावनः विद्यार्थरूपजन्माढ्यो मानस्तंभविवर्जितः ३२ नोद्विग्नचित्तो व्यसनेषु निःस्पृहः श्रुतेषु दृष्टेषु गुणेष्ववस्तुदृक् दांतेंद्रियप्राणशरीरधीः सदा प्रशांतकामो रहितासुरोसुरः ३३

सर्वमहं सहे न मद्दृष्टात्मद्रोहमिति भावः २८ असुरं च हतं मेनिरे तदानीं तद्द्वेषस्य प्रवृत्तत्वादिति भावः २९ तमेव वृत्तदेव(?) कुमारादीस्तत्स्य महत्वमाह तस्येत्यादिना गुणैर्महानभूत् गुणानेवाह महदुपासक इत्यादिना ३० सत्यसंधः प्रतिज्ञातस्य एक एव प्रियश्च सुहृत्तमश्च सम्यक् नता आर्याणामंघ्रयो येन स्तुवद् इति भावना यस्य ३२ व्यसनेषु नोद्विग्नचित्तः गुणेषु विषयेषु निःस्पृहः यतस्तेषु अवस्तुदृक् दांता इंद्रियादयो यस्य असुरहिता असुरो भावो मनस्तादृशस्य

श्री॰ भा॰ स॰ टी॰ ७

अधुनापि ते गुणा नापिधीयंते तिरोहिता न भवंति अत्र हेतुः गृह्यंते कविभिरिति ३४ साधुगाथासदसि साधुकथाप्र
संगवत्यां सभायां प्रतिमानं दृष्टांतं ३५ सूच्यते मया केवलं ध्वन्यते सम्यक्कथ्यते इति वा ३६ नैसर्गिकरतेर्लिंगान्या
ह न्यस्तक्रीडनक इति षड्भिः तन्मनस्तया तदेकचित्तत्वेन ३७ एतान्यासनादीनि गोविंदेन परिरंभितः आत्मसात्
कीकृतः ३८ रुदति रोदिति वैकुंठस्य चिंतया शबला व्याकुला मिश्रा वा चेतना यस्य तच्चिंतया आह्लादो यस्य ३९

यस्मिन्महद्गुणा राजन्गृह्यंते कविभिर्मुहुः न तेऽधुनापिधीयंते यथा भगवतीश्वरे ३४ यं साधुगाथास
दसि रिपवोऽपि सुरा नृप प्रतिमानं प्रकुर्वंति किमुतान्ये भवादृशाः ३५ गुणैरलमसंख्येयैर्माहात्म्यं तस्य
सूच्यते वासुदेवे भगवति यस्य नैसर्गिकी रतिः न्यस्तक्रीडनको बालो जडवत्तन्मयस्तया कृष्णग्रह
गृहीतात्मा न वेद जगदीदृशं ३७ आसीनः पर्यटन्नश्नन् शयानः प्रपिबन् ब्रुवन् नानुसंधत्त एतानि
गोविंदपरिरंभितः ३८ क्वचिद्रुदति वैकुंठचिंताशबलचेतनः क्वचिद्धसति तच्चिंताह्लाद उद्गायति
क्वचित् ३९ नदति क्वचिदुत्कंठो विलज्जो नृत्यति क्वचित् क्वचित्तद्भावनायुक्तस्तन्मयोऽनुचकार ह ४०
क्वचिदुत्पुलकस्तूष्णीमास्ते संस्पर्शनिर्वृतः अस्पंदप्रणयानंदसलिलामीलितेक्षणः ४१ स उत्तमश्लो
कपदारविंदयोर्निषेवयाकिंचनसंगलब्धया तन्वन्परां निर्वृतिमात्मनो मुहुर्दुःसंगदीनस्य मनः शमं व्यधा
त् ४२ तस्मिन्महाभागवते महाभागे महात्मनि हिरण्यकशिपू राजन्नकरोदघमात्मजे ४३ युधिष्ठिर उ
वाच देवर्ष एतदिच्छामो वेदितुं तव सुव्रत यदात्मजाय शुद्धाय पितादात्साधवे ह्यघं ४४ पुत्रान्विप्रतिकूला
न्स्वान्पितरः पुत्रवत्सलाः उपालभंते शिक्षार्थं नैवाघमपरो यथा ४५ ॥

उत्कंठः सुत्कंठः सन्नदनुचकार तच्चेष्टादिकं स्वयं कृतवान् ४० संस्पर्शस्तद्भावापत्तिः तेन निर्वृतः अस्पंदः स्थिरो यः प्रण
यः तेन यः आनंदः तेन यत्सलिलं तेन युक्ते आमीलिते ईषन्निमीलिते ईक्षणे यस्य ४१ आत्मनः परां निर्वृतिं तन्वन् दुःसं
गेन दीनस्यापि मनसः शमं शांतिं व्यधात् ४२ अघं द्रोहमकरोत् ४३ अघमाख्यातं तदेवार्थमतिविस्मयेन पृच्छति
एतदिति देवर्षे इति सुव्रत हे तवाकाशमिति वा साधवे अघमदात् साधोः द्रोहं कृतवान् इति यत् एतद्वेदितुं ४४ उपा
लभंते आक्षिपंति शिक्षार्थं नैव कुर्वंति अपरः शत्रुरिव ४५

अनुवशात् अनुकूलात् साधून् अपगतदोषान् गुरुः पितेव देवता येषां तान् उद्दिश्य एव अस्य नेकं वैनीतिकिमुक्तमुक्त्वमित्यर्थः
पुत्राय पुत्रमुद्दिश्य पितुर्द्वेषः पितृहेतोर्द्वेषः पुत्रस्य मरणार्थं प्रयोजितः प्रवर्तित इति यत् एतत्कौतूहलं विधम अपाकुरु
यद्वा यः पुत्रस्य तत्पुत्राय यो द्वेषः स पितुर्मरणाय प्रयोजितः अत एव तत्कौतूहलं विधमेत्यर्थः ४६ इति भावार्थे सप्त
मे चतुर्थोऽध्यायः ४ पंचमे गुरुणाधीतं त्यक्त्वा विष्णुस्तुतौ रतं हन्तुं यत्नद्विपसर्पाद्यैः सन्तं दैत्योनवृश्चकत् भगवद्भक्ति
रेव विद्यैकारणमिति वक्तुमाह पौरोहित्यायेत्यादिना काव्यः शुक्रः अतस्तस्य सुतौ तत्र तस्यैव सुतानामिति शेषः १ पाठ्या
नुदेवतीत्यादीनु पाठ्यान् असुरबालकानन्यांश्च नयः २ अनुपपाठ अध्ययनानन्तरं तथैव पपाठ च किन्तु तन्न साधु मेनेन तत्र

किमुतानुवशान् साधून् सादृशान् गुरुदेवतान् एतत्कौतूहलं ब्रह्मन्नस्माकं विधम प्रभो पितुः पुत्राय यद्द्वेषो म
रणाय प्रयोजितः ४६ इति भागवते सप्तमस्कन्धे चतुर्थोऽध्यायः ४ नारदः पौरोहित्याय भगवान् वृतः का
व्यः किलासुरैः षण्डामर्कौ सुतौ तस्य दैत्यराजगृहान्तिके १ तौ राज्ञा प्रापितं बालं प्रह्लादं नयकोविदं पाठया
मासतुः पाठ्यानन्यांश्चासुरबालकान् २ यत्तत्र गुरुणा प्रोक्तं शुश्रुवेनुपपाठ च न साधु मनसा मेने स्वपरास
द्ग्रहाश्रयं ३ एकदासुरराट् पुत्रमंकमारोप्य पाण्डव पप्रच्छ कथ्यतां वत्स मन्यते साधु यद्भवान् ४ प्रह्लादो
वाच तत्साधु मन्येसुरवर्य देहिनां सदा समुद्विग्नधियामसद्ग्रहात् हित्वात्मपातं गृहमन्धकूपं वनं गतो यद्धरि
माश्रयेत ५ नारद उवाच श्रुत्वा पुत्रगिरो दैत्यः परपक्षसमाहिताः जहास बुद्धिर्बालानां भिद्यते परबुद्धि
भिः ६ सम्यग्विधार्यतां बालो गुरुगेहे द्विजातिभिः विष्णुपक्षैः प्रतिच्छन्नैर्न भिद्येतास्य धीर्यथा ७ गृहमा
नीतमाहूय प्रह्लादं दैत्ययाजकाः प्रशस्य श्लक्ष्णया वाचा समपृच्छन्त सामभिः ८ वत्स प्रह्लाद भद्रं ते सत्यं
कथय मा मृषा बालानति कुतस्तुभ्यमेष बुद्धिविपर्ययः ९ बुद्धिभेदः परकृत उताहो ते स्वतोभवत् भण्यतां

हेतुः स्वपर इत्यसद्ग्रहो मिथ्याभिनिवेशः तदाश्रयं यस्मात्तत् ३ ४ हे असुरवर्य असद्ग्रहात् अहं ममेति मिथ्याभिनिवे
शाद्धेतोः सम्यगुद्विग्ना धीर्येषां तेषां वनं गतः सन् हरिमाश्रयेतेति यत्तदेवाहं साधु मन्ये कथंभूतं गृहं हित्वा आत्मनः पातम
धःपातनिमित्तं कुतः अन्धकूपवन्महामोहावहं ५ परपक्षे विष्णौ समाहिताः परितिष्ठिताः जहास एवाहमासीत् बुद्धिरिति
६ विष्णुपक्षैः भगवत्तत्परैः ननु तत्र गृहकृतस्तेषां प्रवेशः सम्भवति तथापि प्रतिच्छन्नैः वेषान्तरेणाच्छन्नैः ७ दैत्यगृहमानी

श्री: भा० स० टी० २२

अहो मायामोहिता भवंतो मामाति पंनीत्याशयेन तावदाह परः स्वश्चेति मिथ्याभिनिवेशो यदीयया माययैव कृतः न
तु वास्तवः अत एव तया विमोहितबुद्धीनां भवतामेव दृष्टः न तु मम तस्मै अचिंत्यमायेश्वराय नमः ११ अहो किमेतस्मिल्ल
पक्षिन बुद्धिभेदो यतो जातस्तं कथयेत्यादिमः ननु तत्प्रसादादेवेत्युत्तरमाह स इति त्रिभिः स भगवान् यदानुव्रतः अनु
कूलो भवति तदा पशूनामिव बुद्धिर्भेदगता असती मिथ्याविषया भिद्यते भिन्नात्मनिष्ठा भवति १२ भेदस्यासत्वं दर्शयन्नाह
स एष परमात्मैव स्वः परश्चेति च अविवेकिभिर्निरूप्यते युक्तं चैतत् यतः यस्य वर्त्मनि जिज्ञासायां ब्रह्मादयोपि मुह्यंति न त्वहं
तः दुरन्ययं दुर्ज्ञेयमनुक्रमणं अनुचरितमस्य ईशो न च यस्य मम १३ ननु निर्विकारस्य कथं मतिभेदकर्तृत्वं तत्राह यथा अयो

प्रह्लाद उवाच परः स्वश्चेत्यसद्ग्राहः पुंसां यन्मायया कृतः विमोहितधियां दृष्टस्तस्मै भगवते नमः ११ स य
दानुव्रतः पुंसां पशुबुद्धिर्विभिद्यते अन्य एष तथान्योहमिति भेदगतासती १२ स एष आत्मा स्वपरेत्यबुद्धि
भिर्दुरत्ययानुक्रमणो निरूप्यते मुह्यंति यद्वर्त्मनि वेदवादिनो ब्रह्मादयो ह्येष भिनत्ति मे मतिं १३ यथा भ्रा
म्यत्ययो ब्रह्मन्स्वयमाकर्षसन्निधौ तथा मे भिद्यते चेतश्चक्रपाणेर्यदृच्छया १४ एतावद्ब्राह्मणायोक्त्वा विरराम
महामतिः तं निर्भर्त्स्याथ कुपितः सुदीनो राजसेवकः १५ आनीयतामरे वेत्रमस्माकमयशस्करः कुलांगा
रस्य दुर्बुद्धेश्चतुर्थोस्योदितो दमः १६ दैतेयचंदनवने जातोयं कंटकद्रुमः यन्मूलोन्मूलपरशोर्विष्णोर्नाला
यितोर्भकः १७ इति तं विविधोपायैर्भीषयंस्तर्जनादिभिः प्रह्लादं ग्राहयामास त्रिवर्गस्योपपादनं १८ त
त एनं गुरुर्ज्ञात्वा ज्ञातज्ञेयचतुष्टयं दैत्येन्द्रं दर्शयामास मातृमृष्टमलंकृतं १९ पादयोः पतितं बालं प्रतिनंद्या
शिषासुरः परिष्वज्य चिरं दोर्भ्यां परमामाप निर्वृतिं २० आरोप्यांकमवघ्राय मूर्धन्यश्रुकलांबुभिः आसिं

लोहं आकर्षस्य अयस्कांतस्य समीपे स्वयमेव भ्रमति चेतसः चक्रपाणेः सन्निधिवेव कृतो जातस्तत्राह यदृच्छयेति स्वतन्त्रेयो
द्योतेते फलमेतदितिन्यायेनेत्यर्थः १४ राजसेवक उवाचेति शेषः १५ वेत्रं कशामुपायानां मध्ये चतुर्थः दमो दण्डः अस्य
दुर्बुद्धेः उदितः युक्तः शास्त्रेषु दुर्बुद्धित्वे हेतुः कुलस्यांगारवन्नाशहेतो १६ तत्कुतः तत्राह दैत्या एव चंदनद्रुमाः तेषां व
ने अयं कंटकद्रुमस्तत्स्यो जातः तद्देवाह यस्य दैत्यवनस्य मूलोन्मूलने परशुस्थानीयस्य विष्णोरयमर्भक एव नालायितः नाल
मिवाचरत् यथा परशोः छेदकत्वे चर्मादिनिर्मितो दण्डः सहकारी तं विना संभवात् तथायं विष्णोर्दैत्यमूलच्छेदे हेतुर्जात इत्यर्थः

[illegible] २१

१७ इति तं प्रह्लादं भीषयन् धर्मार्थकामवर्गस्य प्रतिपादकं शास्त्रमध्यापयामास १८ ११५ ५० २१

२२

ज्ञाते तेष्वेव च न तु पृथग्येन तं तन्नामादेः सेवनं प्रतिमा वा मूर्तं तदर्थं स्थापितं २२ पादसेवनं परिचर्या अर्चनं पूजनं दास्यं कर्मार्पणं
सख्यं तस्मिन्विश्वासादि आत्मनिवेदनं देहसमर्पणं यथा विक्रीतस्य गवाश्वादेर्भरणपालनादिचिंता न क्रियते तथा देहं तस्मै
समर्प्य तच्चिंतावर्जनमित्यर्थः २३ इति एवोक्तानि नवलक्षणानि यस्याः सा अद्धा तेन चेद्भगवति विष्णौ भक्तिः क्रियते
सा चार्पितैव सती यदि क्रियते न तु कृता सती पश्चादर्प्यते तदुत्तमं मन्ये अधीतमनेन वस्मात् गुरोरधीतं शिक्षितं वा तथाविधं किं
चिदस्तीति भावः २४ २५ २६ मित्रत्वेन वर्तमानस्यापि तव विरोधाचरणं नाम संभावितमित्याह संतीति दुर्हृदो मैत्रा मित्रवं
यघो तेषामगद इति अस्मादुदय रोगी स्यात्तथा पापः प्रपावदतकः स्वर्णहारी तु कुनखी इत्थं स्वर्णी गुरुतल्पग इत्यादिस्मृतेः

हिरण्यकशिपुरुवाच प्रह्लादानूच्यतां तात स्वधीतं किंचिदुत्तमं कालेनैतावतायुष्मन्यदशिक्षद्गुरोर्भवान्
२२ प्रह्लाद उवाच श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनं अर्चनं वंदनं दास्यं सख्यमात्मनिवेदनम् २३ इति
पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा क्रियेत भगवत्यद्धा तन्मन्येऽधीतमुत्तमम् २४ निशम्यैतत्सुतवचो हिरण्य
कशिपुस्तदा गुरुपुत्रमुवाचेदं रुषा प्रस्फुरिताधरः २५ ब्रह्मबंधो किमेतत्ते विपक्षं श्रयतासता असारं ग्रा
हितो बालो मामनादृत्य दुर्मते २६ संति ह्यसाधवो लोके दुर्मैत्राश्छद्मवेषिणः तेषामुदेत्यघं काले रोगः पा
तकिनामिव २७ गुरुपुत्र उवाच न मत्प्रणीतं न परप्रणीतं सुतो वदत्येष तवेंद्रशत्रो नैसर्गिकीयं मतिरस्य रा
जन्नियच्छ मन्युं कददाः स्म मा नः २८ नारद उवाच गुरुणैवं प्रतिप्रोक्तो भूय आहासुरः सुतं न चेद्गुरुमुखी
यं ते कुतोऽभद्रासती मतिः २९ प्रह्लाद उवाच मतिर्न कृष्णे परतः स्वतो वा मिथोऽभिपद्येत गृहव्रतानां अदांतगो
भिर्विशतां तमिस्रं पुनः पुनश्चर्वितचर्वणानां ३०

पातकिनां रोगो यथा उदितस्तथा तेषां विद्वेषादिकमुदेतीत्यर्थः २७ मत्प्रणीतं मया पाठितं नो स्म भंकृतं उक्त्वा तं दोषमास
अदाः अस्मान्मा स्माहः मयि दोषारोपमाकुर्वा इत्यर्थः इंद्रशत्रो इति न हि ब्राह्मणेषु तव कोप उचित इति भावः २८ गुरु
मुखी गुरुवाक्यजनिता हे अभद्र २९ आस्तामियं वार्ता भवादृशानां विषयासक्तानामनधिकारादित्याशयेनाह मतिरिति
परतः गुरोः स्वतो वा मिथो वान्योन्यतः नाभिपद्येत न संपद्यते केषां गृह एव व्रतं संकल्पो येषां तेषां अदांत एव अ
दांतैरनुपरतैर्गोभिरिंद्रियैर्हेतुभूतैः तमिस्रं संसारं विशतां चर्वितस्यैव चर्वणं येषां ३० ॥

श्रीः
भा॰स॰
टी॰
२६

ननु श्रीकृष्णपरमानंदरूपत्वात् पितृनिष्ठापि किं न स्युः तदज्ञानादित्याह न ते इति येऽनुराशयाः विषयवासनांतःकरणाः ते
हि विष्णुं न विदुः स्वस्मिन्नेवार्थः पुरुषार्थः येषां तेषां गतिं गम्यं ननु तेपि गुरूपदेशादिना ज्ञास्यंति तत्राह बहिर्विषयेष्वर्था
यद्वा येषां ते बहिरर्थमानिनस्तानेव गुरुत्वेन मन्यमाना इत्यर्थः ये च ते अंधैरुपनीयमाना अंधा यथा पथ्यानेन न विदुः किंतु गर्तपात
मेव तथा तेपीशतंत्र्यां वेदलक्षणायां उरूणि दामानि ब्राह्मणादिनामानि यस्यां तस्यां काम्यकर्मभिः बद्धा एव भ
वंतीत्यर्थः तदुक्तं विषयविष्टचित्तानां विष्ण्वावेशः सुदूरतः वारुणीदिग्गतं वस्तु व्रजन्नैंद्रीं किमाप्नुयादिति ३१ ननु च एको
देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा इत्यादिश्रुतिः प्रतिपादितं विष्णुं कथं न विदुः अतो वा तेषां विष्णुप्रवेशः नेत्याह
नैषामिति निष्किंचनानां वैष्णवानां पादरजसामभिषेकं यावन्न वृणीत तावत् श्रुतिवाक्यमात्रेणापि एषां

नते विदुः स्वार्थगतिं हि विष्णुं दुराशया ये बहिरर्थमानिनः अंधा यथांधैरुपनीयमानास्तेपीशतंत्र्यामुरुदाम्नि
बद्धाः ३१ नैषां मतिस्तावदुरुक्रमांघ्रिं स्पृशत्यनर्थापगमो यदर्थः महीयसां पादरजोभिषेकं निष्किंचनानां न वृ
णीत यावत् ३२ इत्युक्तोपरतं पुत्रं हिरण्यकशिपू रुषा अंधीकृतात्मा स्वोत्संगान्निरस्यत महीतले ३३ आहाम
र्षरुषाविष्टः कषायीभूतलोचनः वध्यतामाश्वयं वध्यो निःसारयत नैरृताः ३४ अयं मे भ्रातृहा सोयं हित्वा स्वा
न्सुहृदोधमः पितृव्यहंतुर्यः पादौ विष्णोर्दासवदर्चति ३५ विष्णोर्वा साध्वसौ किन्नु करिष्यत्यसमंजसः सौहृदं
दुस्त्यजं पित्रोरहाद्यः पंचहायनः ३६ परोप्यपत्यं हितकृद्यथौषधं स्वदेहजोप्यामयवत्सुतोहितः छिंद्यात्तदंगं
यदुतात्मनोहितं शेषं सुखं जीवति यद्विवर्जनात् ३७ ॥

मतिरुरुक्रमस्यांघ्रिं न स्पृशति न प्राप्नोति श्रवणभावनादिभिरपि हि न तत्स्वार्थः अनर्थस्य संसारस्यापगमो यदर्थः यस्यांघ्रिस्प
र्शात्माः सतेवार्थः प्रयोजनं महदनुग्रहाभावान्न भवति स्वयं ज्ञानापीह श्रोतुः तेषामित्यर्थः ३२ निरस्यत निरास्यत् क्षिप्तवान्
३३ अमर्षो महद्वेनेन सहिता या रुषा तया आविष्टो व्याप्तः कषायीभूते अंतास्त्वे लोचने यस्य हे नैरृता राक्षसाः ३४ वध्यत्वे हेतुः यतो
यं मे भ्रातृहा कुतो यो विष्णोः पादावर्चति तस्मात् पातीत्यर्थः अतः स एव यमित्यन्वयः ३५ अहो विष्णुरपि विष्णुमनीयसज्ञादेकि
मिति स्वीकृतवानित्याह विष्णोर्वेति असमंजसः ३६ ननु तवायमपत्यं कथं वध्यः तत्राह परोप्यौषधमिव हितकृच्चेत् तदप
त्यमेव तेय सुतः स्वदेहजोपि अहितश्चेत् आमयवत् व्याधिवत् ममतास्पदं कथं अंगमपि यत्करचरणादि तदप्यात्मनोऽहितं चे [illegible]

२६

अतः सर्वैरुपायैर्हन्तव्यः संभोजो भोजनं भोजनादिषु विषादिप्रयोगैरित्यर्थः यथा दुष्टमिन्द्रियं मुनेः शत्रुः ३८ तिग्मातीक्ष्णा
दंष्ट्रा येषां करालान्यास्यानि येषां ते च ताम्राणि श्मश्रूणि शिरोरुहाश्च येषां ३९ ४० परे ब्रह्मण्यनिर्देश्ये ईश्वरे युक्तः समा-
हित आत्मा मनो यस्य तस्मिन् तेषां प्रहारा निष्फला जाताः तत्र हेतवः ब्रह्मणि निर्विकारे अनिर्देश्ये अविषये भगवति निरु-
पाधौ स्त्रुर्ये अखिलात्मनि प्राण्यादीनामपि नियन्तरि एवंभूते परे अपुण्यस्य निर्दैवस्य सत्क्रिया महोद्यमा इव ४१ ४२ अ-
भिचारा द्रुत्यादयः अवपातनानि गिरिशृङ्गादयः तेभ्यः पातनानि तैः अवरोधादिषु संनिरोधैश्च ४३ पर्वताक्रमणैः पर्वतानां
उपरि दत्तैः वक्त्रवचनैरभिचारैराप्तावृत्तिं दर्शयति तत्कर्तुं हननं कर्तुं नाभिपद्यते न प्राप्नोति न पश्यतीत्यर्थः ४४ चिन्तामेवाह

सर्वैरुपायैर्हन्तव्यः संभोजशयनासनैः सुहृल्लिङ्गधरः शत्रुर्मुनेर्दुष्टमिवेन्द्रियं ३८ नैरृतास्ते समादिष्टा
भर्त्रा वै शूलपाणयः तिग्मदंष्ट्रकरालास्याः ताम्रश्मश्रुशिरोरुहाः ३९ नदन्तो भैरवान्नादांश्छिन्धि भिन्धीति वा-
दिनः आसीनं चाहनन् शूलैः प्रह्लादं सर्वमर्मसु ४० परे ब्रह्मण्यनिर्देश्ये भगवत्यखिलात्मनि युक्तात्मन्यफ-
ला आसन्नपुण्यस्येव सत्क्रियाः ४१ प्रयासेऽपहते तस्मिन् दैत्येन्द्रः परिशंकितः चकार तद्वधोपायान्निर्बन्धेन यु-
धिष्ठिर ४२ दिग्गजैर्दन्दशूकेन्द्रैरभिचारावपातनैः मायाभिः संनिरोधैश्च गरदानैरभोजनैः ४३ हिमवाय्वग्नि-
सलिलैः पर्वताक्रमणैरपि न शशाक यदा हन्तुमपापमसुरः सुतं ४४ चिन्तां दीर्घतमां प्राप्तः तत्कर्तुं नाभ्य-
पद्यत एष मे बह्वसाधूक्तो वधोपायाश्च निर्मिताः ४५ तैस्तैर्द्रोहैरसद्धर्मैर्मुक्तः स्वेनैव तेजसा ४५ वर्तमानोऽवि-
दूरे वै बालोऽप्यजडधीरयं न विस्मरति मेऽनार्यं शुनःशेप इव प्रभुः ४६ अप्रमेयानुभावोऽयमकुतश्चिद्भयोऽमरः
नूनमेतद्विरोधेन मृत्युर्मे भविता न वा ४७
एष इति त्रिभिः मम असाधु पुरुषं यथा भवति तथोक्तः असद्धर्मैः अपकारैरभिचारैर्वा ४५ अविदूरे वर्तमानोऽपि बालोऽप्ययं
अजडधीः निर्भयचित्तः मे अनार्यं मया यत्पापं कृतं वा न विस्मरति अजीगर्तस्य मध्यमपुत्रः शुनःशेपो नाम पित्रा हरिश्चं-
द्राय विक्रीतः स यथा तयोरपकारमविस्मरंस्तदपत्यं विश्वामित्रस्य शिष्यगोत्रतामापन्नः तद्वत् यद्वा स्वभावापरित्यागे
दृष्टान्तः शुनःशेपः पुच्छमिवेति ४६ परे ईश्वरे युक्तः समाहित आत्मा मनो यस्य तस्मिन् तेषां प्रहारा निष्फला जाताः त-
त्र हेतवः ब्रह्मणि निर्विकारे अनिर्देश्ये अवि अप्रमेयः अपरिमेयानुभावो यस्य न कुतश्चिद्भयं यस्य न वा भविता अन्यथा मृत्युरेव

श्रीः
भा॰स॰
टी॰
२३

औशनसौउशनसःपुत्रौनीतिज्ञौविविक्तेएकांते ४८ भ्रुवोर्विजृंभणात्त्रस्ताःसमस्ताधिष्ण्यपायस्मिन् तस्यचिंत्यंतव
न्मेतेनप्रयासः एतस्मात्त्वनेनैवास्तियद्वाशिशूनांहृतंगुणदोषयोःपदंविषयोनभवतीत्यर्थः ४९ तथापिसर्वबंधन
मस्योचितमित्याहतुः इमंत्विति यावद्गुरुरागमिष्यतितावद्बद्ध्वानिधेहि ततःकिंअतआहतुः बुद्धिश्चसमीचीनावय
साभवतीति ५० अनुज्ञायतथेत्यंगीकृत्य ५१ ततश्चतौप्रह्लादायधर्मादिकमूचतुः प्रश्रितस्तस्मैप्रवनतस्तस्मैच
यावत् त्रिवर्गमनुशासितमपि साधुनमेनेतत्रहेतुःद्वंद्वारामैर्हर्षादिभिर्विषयेष्वारमणंयेषांतैरुपवर्णिताम्

इतितच्चिंतयाकिंचिन्म्लानश्रियमधोमुखं षंडामर्कावौशनसौविविक्तइतिहोचतुः ४८ जितंत्वयैकेनज
गत्त्रयंभ्रुवोर्विजृंभणत्रस्तसमस्तधिष्ण्यपं नतस्यचिंत्यंतवनाथचक्ष्महेनवैशिशूनांगुणदोषयोःपदं ४९
इमंतुपाशैर्वरुणस्यबद्ध्वानिधेहिभीतोनपलायतेयथा बुद्धिश्चपुंसोवयसार्यसेवयायावद्गुरुर्भार्गवआग
मिष्यति ५० तथेतिगुरुपुत्रोक्तमनुज्ञायेदमब्रवीत् धर्मोह्यस्योपदेष्टव्योराज्ञांयोगृहमेधिनां ५१ धर्ममर्थं
चकामंचनितरांचानुपूर्वशः प्रह्लादायोचतूराजन्प्रश्रयावनतायच यथात्रिवर्गंगुरुभिरात्मनेउप
शिक्षितं नसाधुमेनेतच्छिक्षांद्वंद्वारामोपवर्णिताम् ५२ यदाचार्यःपरावृत्तोगृहमेधीयकर्मसु वयस्यै
र्बालकैस्तत्रसोपहूतःकृतक्षणैः ५३ अथतान्श्लक्ष्णयावाचाप्रत्याहूयमहाबुधः उवाचविद्वांस्तन्नि
ष्ठांकृपयाप्रहसन्निव ५४ तेतुतद्गौरवात्सर्वेत्यक्तक्रीडापरिच्छदाः बालाअदूषितधियोद्वंद्वारामेरितेहितैः
५५ पर्युपासतराजेंद्रतन्न्यस्तहृदयेक्षणाः तानाहकरुणोमैत्रोमहाभागवतोसुरः ५६ इतिभागवतेम
हापुराणेसप्तमस्कंधेपंचमोध्यायः ५ प्रह्लादउवाच कौमारआचरेत्प्राज्ञोधर्मान्भागवतानिह दुर्लभंमा
नुषंजन्मतदप्यध्रुवमर्थदम् १ ॥

५२ परावृत्तःस्वमंदिरंगतःसउपहूतः मेधियादभ्यस्तम्ख्यैःक्रीडार्थंकृतक्षणैःकृतोत्सवैर्लब्धावसरैरितिवा ५३ तेषांनिष्ठां
जन्ममरणादिलक्षणांविद्वान् ५४ द्वंद्वारामाणामीरितैर्वाक्यैरीहितैश्चचेष्टितैरदूषिताधीर्येषांयतोबालाः ५५ तस्मिन्नेवन्यस्तेहृदय
यमीक्षणेयैस्ते ५६ इतिश्रीभावार्थदीपिकायांसप्तमस्कंधेपंचमोध्यायः ५ षष्ठेगुरोर्गृहमुग्रप्रह्लादोहेस्मबालकान्
यन्नुकंप्यपरंतत्त्वेनारदोक्तमुपादिशत् निरर्थकक्रियालापैरायुर्व्ययमजानताम् प्रह्लादःसदयंप्राहधर्मंभागवतंकृती १

कौमारइत्यादिनाऽऽइहैवमानुषजन्मनिधर्मानाचरेत् यतोर्थदमेतत् तच्चकौमारएवयतः तदप्यध्रुवं नचैवंभूतजन्मा
लेभयतः दुर्लभंमतञ्चधर्मानेवाचरेत् ननुत्वार्थंप्रयासान्तुभागवतानेवनकाम्यान्तत्रभागवतानेवधर्मानाचरेदित्येतद्
उपपादयतियथाहीतिचतुर्भिः इहपुरुषस्यविस्नोः पादोपसर्पणमेव यथाश्रन्तुःप्रयोगमित्यर्थः यद्यस्मादेषप्रियर
त्यादि २ भोगाद्यर्थमेव कथंतत्याज्याइतिचेत्तत्राह सुखमितिसर्वत्रपश्चादसावपिदैवात्सर्वार्हष्टादेव ३ अतस्तदर्थंप्रयासोन
कर्तव्यः यतः प्रयासमात्रंकेवलमायुषोव्ययएव यतस्तथातेनप्रकारेणाद्भेमेनप्राप्नोति ४ भयमाश्रितः संसारभयंप्राप्तःपुरुषः
पक्वोवैयावदस्कृलमाश्लिनविपद्येत अस्वस्थमनभवेत् ननुप्रपदितिवातावत्पौत्रंदेमायपनेतअकेवयावत्स्वस्थमिदं ५

यथाहिपुरुषस्येहविस्नोःपादोपसर्पणं यदेषसर्वभूतानांप्रियआत्मेश्वरःसुहृत् २ सुखमैन्द्रियकंदैत्या
देहयोगेनदेहिनां सर्वत्रलभ्यतेदैवाद्यथादुःखमयत्नतः ३ तत्प्रयासोनकर्तव्योयतआयुर्व्ययःपरं नत
थाविन्दतेक्षेमंमुकुन्दचरणाम्बुजं ४ ततोयतेतकुशलःक्षेमायभयमाश्रितः शरीरंपौरुषंयावन्नविपद्येत
पुष्कलं ५ पुंसोवर्षशतंह्यायुस्तदर्धंचाजितात्मनः निष्फलंयदसौरात्र्यांशेतेन्धंप्रापितस्तमः ६ मुग्ध
स्यबाल्येकैशोरेक्रीडतोयातिविंशतिः जरयाग्रस्तदेहस्ययात्यकल्पस्यविंशतिः ७ दुरापूरेणकामेनमो
हेनचबलीयसा शेषंगृहेषुसक्तस्यप्रमत्तस्यापयातिहि ८ कोगृहेषुपुमान्सक्तमात्मानमजितेन्द्रियः
स्नेहपाशैर्दृढैर्बद्धमुत्सहेतविमोचितुं ९ कोन्वर्थतृष्णांविसृजेत्प्राणेभ्योपियईप्सितः यंक्रीणात्यसुभिः
प्रेष्ठैःतस्करःसेवकोवणिक् १० कथंप्रियायाअनुकम्पितायाःसंगंरहस्यंरुचिरांश्चमन्त्रान् सुहृत्सुच स्नेहसितःशिशूनां कलाक्षराणामनुरक्तचित्तः ॥

शरीरमकल्पंयावच्चजरसाहतो यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयोनायुषः आत्मश्रेयसितावदेवविदुषःकार्यःप्रय
त्नोमहान्संदीप्तेभवनेतुकूपखननंप्रत्युद्यमःकीदृशः आयुर्व्ययप्रकारमाह पुंसइतित्रिभिः यद्यस्मात्पादेन ६ विंशति
वर्षाणिप्राप्नोति ७ दुरापूरेणदुःखेनसम्पूर्यमाणेन ८ अतएवगृहासक्तोपिमुच्यत्वादित्याह कोगृहेष्विति सन्नतीमयास्य
नीयामोक्षंतदसंभवंदर्शयन् कौमारएवावश्यमितरदुपपादयति कोगृहेष्वितिसप्तभिः ९ प्रेष्ठैरसुभिःक्रीणातिसेवा
लाद्यावितंमृगीकस्मापितस्करादिरसुभिःपर्यात्मनं तस्मिन्नर्थे तत्संवसकोर्थेविसृजेत् १० किंचकथमित्यादि प्रियायाःसंगादि
कंस्मरन्कथंसंमोहितोस्तीत्यन्वयः मन्त्रान्हितविद्यालापान् सुहृत्सुचमंगलेषु स्नेहसितस्नेहेनासक्तोबद्धः कलानिमधुरा
ण्यक्षराणियेषांतेषुमनसाचक्षुरक्तचित्तस्य ११ ॥

श्रीः
भा० म०
५
१४

नाः स्वस्वगृहे स्थिताः हृदयाद्दूदयंगमाः मनोज्ञा उरवः परिच्छदो येषु तान् गृहीत्वा जीविकाऊल्पाऊलपरे पतन्ति ११
कोशाकृत्वकोपा कारेकीटः सयथा गृहं ऊर्वन्नात्मनो निर्गमाय द्वारमपि न विदधाति स्वातिष्ठ माकमाल्यीहमानः तत्र वित्तम
कामापिदाघदग्धेनेन विदाहितः सन्नुपमर्जनं तन्नाह उपस्थ्यवणा जिह्वासम्भवस्वादिकमन्यमानः शतादिवतोमाहामध्य
मः कण्ठविषुजेन विरक्तः स्यात् १२ इदं तमो हद्विदर्णयन्नाह ऊर्ध्ववणाव्यायवियत् तीयमाणानिजमायुः पुरुषार्थचवि
हतेन बुध्यते स्वतएव नापरये ये णाडः श्वितं चित्रापि नि विथतेः इः १ व हिन करोतियतः स्वऊहं वेरामेव तिर्यग्भव १३ यस्मात
वौर्यकरोती त्याह विज्ञप्तिति किंपमभिनिविष्टवेतो यस्ययमः परवित्तहन्ते: प्रेमन्नक कलत्रणारहद्वर्दिशादिकं दोषयथापि
विद्वान्स्वपथ्यायपथं गां मस्थापः सन्नुपरिविनिहृत्य मेव १४ तदकाकोशृहेषुमानित्यादि समभिः श्लोकैः कपयादिनगृहादिषु.

उद्यानुस्मरेस्माद्दूहिनिर्देदयाग्रातृस्वत्स्वपितवोवदीनो शुद्धान्मनोज्ञो फपरिच्छदो स्वगृहीत्वा ऊल्याः पद्मभृग्य
ते वर्गान् १२ यजे कोशाकृद्रिवेहमानः कर्मीगिलो माद्वविस्मकामः गेपस्थ्यजैधं वबहुमन्यमानः कथंविव
ज्येतद्विवर्तमोहः १३ ऊर्ध्ववणापायवियन्निजायुर्नवृध्यते र्थ विहितप्रमतः सर्वत्र तापत्रयदुः खितात्मा निर्विद्य
तेन स्वऊर्ध्वदामः १४ वित्तेषु नित्याभिनिविष्टचेता विद्वांश्च दोषं परवित्तहन्तुः प्रेत्येह चाथाप्यजितेन्द्रिया
स्तदशान्तकामोहरते ऊर्द्ध्वी १५ विद्वानपीत्थं दनुजा ऊर्ध्वं पुत्रान्नस्तलो का युनकल्पते वै यः स्त्रीयपाव
क्यविभिन्नभावस्तमः प्रपद्येत यथा विमूढः १६ यतो न कश्चित् क्व च कुत्र विद्वान्दीनः स्वमात्मानमलं समर्थः
विमोचितुं कामदृशांविहारक्रीडामृगो यन्निगडो विसर्गः १७ ततो विदूरात्परिहृत्य दैत्या दैत्येषु संगं विषया
यात्मकेषु उपेतनारायणमादिदेवं समुक्तसंगैरिषितोपवर्गः १८

ससस्य वै पुण्याय संभवमुपसंहरति विद्वानपीति स्वलो का यात्मपरा मर्थायन कल्पते किंतु विमूढो यथा तथा विद्वानपि त
मः श्वभिनिवेशमेव प्रपद्यते तत्र हेतुः यदति स्त्रीयमिदं याव क्यमिदमिति भिन्नो भावो भावना यस्य सः १६ तस्मात्कौमार एव
भागवतान् धर्मानाचरेदिति सहेतुकमुपसंहरति यतः कश्चिदपि स्वमात्मानं मोचितुं न समर्थः ततः नारायणमुपेत.
नारायणमुपेतेन्वयः स्वसामर्थ्ये हेतुः अलेदीनोलेपटः अतः कामोह पियामांसां मां विहारक्रीडायोनिमित्तं क्रीडा
मृगः विहारमितिपाठे तासां विहार स्थानमात्मानं यतस्तासां क्रीडामृगः सइत्यन्वयः किंच यत्र यासु निगडः शृंखव
लातत्व्यो विसर्गः पुत्रादिरूपो भवति १७ विदूरात् दैत्येः संगं परिहृत्य यद्वा सुविदूरात् पीत्येन नारायणमुपेतेत्यन्वयः य
स्मात्स एवापवर्ग इषितं दृष्टः १८

श्री
ग्र
२४

बालानामस्माकं तद्भजनमशक्यमिति चेत्तत्राह न हीति बह्वायासः श्रमप्रयासः १९ आत्मत्वात्सर्वत्र सिद्धत्वादिति चेद्दे

तद्व्यनुपपादयन्नित्यत्वं दर्शयन्नेव भिः ब्रह्माद्यैर्ये स्थावरादियैस्तेषु भाजी वेषु भौतिकेषु अजीवेषु घटादि

षु महत्स्वहत्स्थव भूतेषु आकाशादिषु २० गुणसाम्ये प्रधाने गुणव्यतिकरे महत्तत्त्वादौ च परः सूक्ष्मस्वरूपः २१ कथं तर्हि दृश्यत्वे

ए(?) भोक्तृभोग्यादिभेदः मायायेत्याह प्रत्यगात्मा द्रष्टा भोक्ता तत्स्वरूपेण व्याप्यव्यापकतया निर्देश्यः दृश्यरूपेण देहादि

रूपेण च व्याप्यकतया निर्देश्यो माययाईयते स्वतत्त्वेन व्याप्यः वस्तुतस्तु स्वयमविकल्पितो निर्देश्योपि सन् यद्वा श्रुति

र्देश्योपि च निर्देश्यः सद्विकल्पितद्वयतद्व्याप्यः २२ यतः केवलानुभवात्मक आनन्द एव स्वरूपं यस्य न तु समपरवेत

न ह्यच्युतं प्रीणयतो बह्वायासोऽसुरात्मजाः आत्मत्वात्सर्वभूतानां सिद्धत्वादिह सर्वतः १९ परावरेषु भूते

षु ब्रह्मान्तस्थावरादिषु भौतिकेषु विकारेषु भूतेष्वथ महत्सु च २० गुणेषु गुणसाम्ये च गुणव्यतिकरे तथा

एक एव परो ह्यात्मा भगवानीश्वरोऽव्ययः २१ प्रत्यगात्मस्वरूपेण दृश्यरूपेण च स्वयं व्याप्यव्यापकनि

र्देश्यो ह्यनिर्देश्योऽविकल्पितः २२ केवलानुभवानन्दस्वरूपः परमेश्वरः माययान्तर्हितैश्वर्य ईयते गुण

सर्गया २३ तस्मात्सर्वेषु भूतेषु दयां कुरुत सौहृदं भावमासुरमुन्मुच्य यया तुष्यत्यधोक्षजः २४ तुष्टे

च तत्र किमलभ्यमनन्त आद्ये किं तैर्गुणव्यतिकरादिह ये स्वसिद्धाः धर्मादयः किमगुणेन च काङ्क्षितेन

सारं जुषां चरणयोरुपगायतां नः २५ धर्मार्थकाम इति योऽभिहितस्त्रिवर्ग ईक्षा त्रयी नयदमौ विविधा च

वार्ता मन्ये तदेतदखिलं निगमस्य सत्यं स्वात्मार्पणं स्वसुहृदः परमस्य पुंसः २६

सर्वं च हरिः सर्वेषु स्वयमेव [illegible] गुणात्मकः सर्गो यस्याः सा गुणसर्गा तया मायया अन्तर्हितमैश्वर्यं येन सः २३

तस्मात्सर्वेषु भूतेषु [illegible] भावमासुरं त्यक्त्वा यया दयया [illegible] २४ ततः किमत आह तुष्टे च तत्र तस्मिन्

किमलभ्यं न किमपि गुणानामीश्वरादेव [illegible] धर्मादयः तैः किं किमगुणेन च काङ्क्षितेन [illegible] गायतां नोऽस्माक

म् [illegible] २५ ननु च ध

र्मादयः पुरुषार्थाः [illegible] कामश्चेति त्रिवर्गः तदर्थं च [illegible] त्रयी

[illegible] विविधा च वार्ता [illegible] निगमस्य [illegible]

[illegible] परमस्य पुंसः स्वात्मार्पणम् [illegible]

[illegible] परमस्य पुंसः स्वात्मार्पणमेव सत्यं [illegible] भगवता [illegible]

[illegible]

तेषां विष्णुमार्गं प्रकर्षं प्रदायमाहज्ञानमितियतोनारदः श्रोतानरऋषिमाहप्राणानामधिकारइतिमयांकृतेत्याहभगवतः
एकांतभक्तानांयत्पादरजःतेनशुद्धात्मनांज्ञानानांदेहिनांसर्वेषामपितज्ज्ञानंस्यात् ननुउत्तमानामेवेतिनियमः २७
श्रुतपूर्वंमयापिनारदात्श्रुतंविज्ञानसंयुतंमनुभवपर्यंतधर्मंचकृत २८ तथातिविस्मिताःपृच्छंति प्रह्लादइति नाभ्यामृते
न्यगुरुनविद्मःएवदासमनात्सर्वमेवाहेनारदपार्श्वंगइतिवेनयाहुः बालानामपिप्रतिपोषकाणामस्माकमेतादृशीबुद्धिः
येनायौ श्रुतस्तवान्यत्रगमनेनसंभवति २९ सएवागागतस्त्वपिनसंभवतीत्याहुः बालस्यांत दुरन्वयः दुर्विदः वि

ज्ञानंतदेतदमलंदुरवापमाहनारायणोनरसखःकिलनारदाय एकांतिनांभगवतस्तदकिंचनानांपा
दारविंदरजसाप्लुतदेहिनांस्यात् २७ श्रुतमेतन्मयापूर्वंज्ञानंविज्ञानसंयुतं धर्मंभागवतंशुद्धंनारदाद्दे
वदर्शनात् २८ दैत्यपुत्राऊचुः प्रह्लादत्वंवयंचापिनर्तेन्यंविद्महेगुरुं एताभ्यांगुरुपुत्राभ्यांबालानामपि
हीश्वरौ २९ बालस्यांतःपुरस्थस्यमहत्संगोदुरन्वयः छिंधिनःसंशयंसौम्यस्याच्चेद्विस्रंभकारणं ३० ६
इतिभागवतेसप्तमस्कंधेषष्ठोध्यायः ६ नारदउवाच एवंदैत्यसुतैःपृष्टोमहाभागवतोसुरः उवाच
स्मयमानस्तान्स्मरन्मदनुभाषितं १ प्रह्लादउवाच पितरिप्रस्थितेस्माकंतपसेमंदराचलं युद्धोद्यमं
परंचक्रुर्विबुधादानवान्प्रति २ पिपीलिकैरहिरिवदिष्ट्यालोकोपतापनः पापेनपापोभक्षीतिवादि
नोवासवादयः ३ तेषामतिबलोद्योगंनिशम्यासुरयूथपाः वध्यमानाःसुरैर्भीतादुद्रुवुःसर्वतोदिशं
४ कलत्रपुत्रमित्राप्तान्गृहान्पशुपरिच्छदान् नावेक्षमाणास्त्वरिताःसर्वेप्राणपरीप्सवः ५ व्यलुंपन्राज
शिबिरममराजयकांक्षिणः इंद्रस्तुराजमहिषींमातरंममचाग्रहीत् ६ नीयमानांभयोद्विग्नांरुदतीं
कुररीमिव यदृच्छयागतस्तत्रदेवर्षिर्ददृशेपथि ७ प्राहनैनांसुरपतेनेतुमर्हस्यनागसं मुंचमुंचमहाभा
गसतींपरपरिग्रहम् ८ ॥

विस्रंभकारणंविश्वासहेतुः ३० इतिभावार्थेसप्तमेषष्ठोध्यायः ६ सप्तमेमातृगर्भस्थेस्वस्मिन्नारदभाषितं प्रह्ला
देवर्णयामासशिष्यप्रत्ययसिद्धये १ अष्टाविनारदादेतन्मयागर्भइतीरितं तत्स्तानकथामाहपद्यैःषोडशभिःस्त
धीः अस्माकंपितरिहिरण्यकशिपौ १ स्वकृतेनैवपापेनपापोसावभक्षितभक्षितइतिहर्षेणवदंतोयुद्धोद्यमचक्रुः
३ ४ राजःशिबिरंआवासंव्यालुंपन् सर्वस्वापहारेणनाशितवंतः ६ ७ अनागसंनिरपराधामनोनोतुंनार्हसीतिअ

अविषह्यं असह्यं यतः अनया प्रसवपर्यन्तमास्यतां ततश्चार्थस्य पदवीं मार्गं गतः प्राप्तः सन् जाते पुत्रे हत्वा मोक्ष्यामीत्यर्थः
९ साक्षात्स्वगुणैरेव महान् ननु पित्रादिसंबंधात् त्वया हेतुनानेन संस्थां मृत्युं न यास्यति तत्र हेतवोक्तिः किल्बिष इत्यादयः
१० अनन्तस्य प्रियो योऽहं स वा प्रियो यस्य तस्य मम भक्त्या एनां प्रदक्षिणीकृत्य ११ इहोष्यतामित्याहेति शेषः १२ अन्तिके समीपे
१३ अन्तर्वत्नी गर्भिणी इच्छया भर्तुरागमनानन्तरं प्रसूतये एवमपि स्वगर्भस्य क्षेमाय १४ तस्याः शोकशान्त्यै धर्मस्य तत्त्वं भक्ति
लक्षणं ज्ञानमात्मानात्मविवेकः तदुभयं प्रादात् ईश्वरः समर्थः १५ १६ भूयाद्भवेत् वैशारदी स्याद्येन स्थितः देहाद्यहंकार

इंद्र उवाच आस्तेऽस्या जठरे वीर्यमविषह्यं सुरद्विषः आस्यतां यावत्प्रसवं मोक्ष्येऽर्थपदवीं गतः ९ नारद उवाच
अयं निष्किल्बिषः साक्षान्महाभागवतो महान् त्वया न प्राप्स्यते संस्थामनन्तानुचरो बली १० इत्युक्तस्तां वि-
हायेंद्रो देवर्षेर्मानयन्वचः अनंतप्रियभक्त्यैनां परिक्रम्य दिवं ययौ ११ ततो नो मातरमृषिः समानीय निजाश्र-
मे आश्वास्येहोष्यतां वत्से यावत्ते भर्तुरागमः तथेत्यवात्सीद्देवर्षेरंतिके साकुतोभया यावद्दैत्यपतिर्घोरात्त-
पसो न न्यवर्तत १३ ऋषिं पर्यचरत्तत्र भक्त्या परमया सती अंतर्वत्नी स्वगर्भस्य क्षेमायेच्छाप्रसूतये १४ ऋषिः
कारुणिकस्तस्याः प्रादादुभयमीश्वरः धर्मस्य तत्त्वं ज्ञानं च मामप्युद्दिश्य निर्मलं १५ तत्तु कालस्य दीर्घत्वात्स्त्री-
त्वान्मातुस्तिरोदधे ऋषिणानुगृहीतं मां नाधुनाप्यजहात्स्मृतिः १६ भवतामपि भूयान्मे यदि श्रद्दधते वचः
वैशारदी धीः श्रद्धातः स्त्रीबालानां च मे यथा १७ जन्माद्याः षडिमे भावा दृष्टा देहस्य नात्मनः फलानामिव वृ-
क्षस्य कालेनेश्वरमूर्तिना १८ आत्मा नित्योऽव्ययः शुद्ध एकः क्षेत्रज्ञ आश्रयः अविक्रियः स्वदृग्घेतुर्व्यापको-

रहित इत्यर्थः १७ को मे वैशारदी धीरित्यपेक्षायां नारदोक्तमेव देहात्मविवेकप्रकारमाह जन्मेति द्वाभ्यां जन्माद्या
जायतेऽस्ति वर्धते विपरिणमते अपक्षीयते नश्यतीत्येवंरूपा इमे षड्भावा विकाराः वृक्षस्यैव यथा फलानां दृश्यन्ते तद्व-
दात्मनि तु अविस्थिता देहस्य दृष्टा इत्यर्थः ईश्वरा विकारसमर्था मूर्तिर्यस्य तेन १८ तदेवं देहधर्मैस्तद्वैलक्षण्येन आत्मनो
देहाद्भेदो दर्शितः इदानीमात्मधर्मैरेव भेदं स्फुटं द्वादशकेनाह आत्मा नित्यः अविनाशी वा अरे अयमात्मेति श्रुतेः
अव्ययः अपक्षयशून्यः स वा एष महानज आत्मेति श्रुतेः शुद्धः निरवद्यं निरंजनमिति श्रुतेः एकः एकमेवाद्वितीयमिति
श्रुतेः क्षेत्रज्ञः विज्ञातारमरे केन विजानीयादिति श्रुतेः आश्रयः यस्मिन्द्यौः पृथिवी चान्तरिक्षमिति श्रुतेः अविक्रियः निष्कलं नि-
ष्क्रियं शान्तमिति श्रुतेः स्वदृक् आत्मज्योतिः सम्राडिति होवाचेति श्रुतेः हेतुः स इमाँल्लोकानसृजतेति श्रुतेः व्यापकः सत्यं ज्ञानमनन्त

श्री:
भा॰ स॰
टी॰
१९

परैः श्रेष्ठैः विवेकसमर्थैर्द्वादशभिरेवं विद्वान् असद्भावं मिथ्याबुद्धिं त्यजेत् २० नन्वेवं विविक्तात्मतत्त्वानिनोऽप्यपरोक्षानुभवेन
ब्रह्मतापत्तिः कथं स्यात् यतो हेकारादिकं त्यजेदिति पर्यायांतत्प्राप्तिप्रकारं सदृष्टांतमाह स्वर्णमिति क्षेत्रेषु स्फुरत्त्व
लोकतोपु ग्रावसु योगैर्धमनाद्युपायैस्तदुपायाभिज्ञो हेमकारो यथा स्वर्णं प्राप्नुयात् आत्मयोगैरात्मप्राप्त्युपायैर्ब्रह्मग
तिं ब्रह्मतां अध्यात्मवित् आत्माधिकृतकार्यकारणाभिज्ञानवान् लभेत २१ अध्यात्मविवेकमात्मप्राप्त्युपायमाह अष्टाविति
त्रिभिः मूलप्रकृतिः महदहंकारो पंचतन्मात्राणि इत्यष्टौ त्रयः सत्त्वादयः ते च प्रकृतिगुणा एव न तद्भिन्नाः एकादशेन्द्रिया
णि पंचमहाभूतानि चेति षोडश पुमानात्मा एकः प्रोक्तः कपिलादिभिराचार्यैः एकत्वे हेतुः सर्वेषु सादिषु अन्वयात् त
त्र मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुष इति २२ जग

एतैर्द्वादशभिर्विद्वानात्मनो लक्षणैः परैः अहं ममेति असद्भावं देहादौ मोहजं त्यजेत् २० स्वर्णं यथा ग्रावसु हे
मकारः क्षेत्रेषु योगैस्तदभिज्ञ आप्नुयात् क्षेत्रेषु देहेषु तथात्मयोगैरध्यात्मविद्ब्रह्मगतिं लभेत २१ अष्टौ प्रकृ
तयः प्रोक्तास्त्रय एव हि तद्गुणाः विकाराः षोडशाचार्यैः पुमानेकः समन्वयात् २२ देहस्तु सर्वसंघातो जग
त्तस्थुरिति द्विधा अत्रैव मृग्यः पुरुषो नेति नेतीत्यतत्त्यजन् २३ अन्वयव्यतिरेकेण विवेकेनोशतात्मना
सर्गस्थानसमाम्नायैर्विमृशद्भिरसत्वरैः २४ बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति वृत्तयः ता येनैवानुभूयन्ते
सोऽध्यक्षः पुरुषः परः २५ एभिस्त्रिवर्णैः पर्यस्तैर्बुद्धिभेदैः क्रियोद्भवैः स्वरूपमात्मनो बुध्येद्गंधैर्वायुमिवान्व

त जंगमं तस्थुः स्थावरं अत्रैव सर्वसंघातात्मके देह एव मृग्यः अन्वेष्टव्यः सम्यक् चेतन इत्याह नेति नेतीत्यन्यापोहेन क्रियमा-
णमतत्त्वमेवातत्त्यजन् अनात्मवर्गात् पृथगुपलभ्यमान इत्यर्थः २३ मार्गणप्रकारमेव प्रपंचयन्नाह सत्त्वेनान्वयः अतएव स
र्गादिभ्यः स्वरूपव्यतिरेकः अनयोर्द्वंद्वैकत्वे तयोर्विवेकः एवंभूतेन उशता शुद्धेनात्मना मनसा सर्गस्थानसमा
म्नायैः स्थितिसृष्टिसंहारैः यतो वा इमानि भूतानि जायंते इत्यादिश्रुत्यर्थपर्यालोचनेनेत्यर्थः विमृशद्भिर्विचारयद्भिः
असत्वरैः अव्यग्रैः मृग्य इति सर्वत्रान्वयः २४ विमर्शप्रकारमाह बुद्धेरिति द्वाभ्यामध्यक्षः साक्षी २५ अत एभिर्बुद्धिभेदैः प-
र्यस्तैः व्यभिचरद्भिः आत्मधर्मत्वेन निरस्तैः बुद्धिधर्मैरेव वा त्रिवर्णैः त्रिगुणात्मकैः क्रियोद्भवैः कर्मजन्यैर्बुद्धेर्वा
त्रिगुणात्मकत्वात् कर्मकर्तृत्वात् तत्प्रकाशकत्वेनानुवृत्त्या आत्मा बुद्धिसंबन्धात् तदवस्थावानिव भातीति न तत्त्वतः अतः आत्मनः स्वरू-
पं बुध्येत् जानीयादित्यर्थः अत्र दृष्टान्तः उक्तधर्मैर्गंधैस्तदाश्रयं वायुमिव २६

ननु तर्हि यथाऽऽत्मनोपाधिकोपि वायोर्गंधो विवेकज्ञानैर्न निवर्तते एवमात्मनः संसारो न निवर्तते इत्याशंक्याह एतद्द्वारः
बुद्धिद्वारकत्वात् तदयं ह्याहंकारो वाऽनुस्मृतः हि यस्मात् बुद्धेर्ये गुणाः कर्माणि च तैर्निबद्ध इति तथा स चाज्ञानमूलः अतोऽपार्थो
मिथ्याभूतोपि स्वप्न इवाप्यते वायोस्तु गंधवत्तु संबंधस्य वास्तवत्वादिष मोहशांतः २७ यस्मादेवं निवृत्तिर्घटते तस्माद्बीज
मज्ञानं तस्य निर्हरणं दहनं किं तत् योगः कथंभूतः धियः प्रवाहं ज्ञानादिरूपमुपरमयतीति तथा २८ तदेवं ज्ञानप्रका
रमुक्त्वा तत्साधनं धर्मं स्वतःसेनावदोक्तमेवाह तत्रोक्तं पंचभिः येर्धर्मैर्यथानुष्ठितैर्वा रतिरिति यत्सहस्रोपाया भगवता
क्तः तथा हि गीतासु यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणमिति भक्त्या मा

एतद्द्वारो हि संसारो गुणकर्मनिबंधनः अज्ञानमूलोऽपार्थोऽपि पुंसः स्वप्न इवाप्यते २७ तस्माद्भवद्भिः कर्तव्यं
कर्मणां त्रिगुणात्मनां बीजनिर्हरणं योगः प्रवाहोपरमो धियः २८ तत्रोपायसहस्राणामयं भगवतोदि
तः यदीश्वरे भगवति यथा यैरंजसा रतिः २९ गुरुशुश्रूषया भक्त्या सर्वलब्धार्पणेन च संगेन साधुभक्ता
नामीश्वराराधनेन च ३० श्रद्धया तत्कथायां च कीर्तनैर्गुणकर्मणां तत्पादांबुरुहध्यानात्तल्लिंगेक्षार्हणादि
भिः ३१ हरिः सर्वेषु भूतेषु भगवानास्त ईश्वरः इति भूतानि मनसा कामैस्तैः साधु मानयेत् ३२ एवं निर्जितषड्
वर्गैः क्रियते भक्तिरीश्वरे वासुदेवे भगवति यया संलभते रतिं ३३ निशम्य कर्माणि गुणानतुल्यान्वीर्या
णि लीलातनुभिः कृतानि यदातिहर्षोत्पुलकाश्रुगद्गदं प्रोत्कंठ उद्गायति रौति नृत्यति ३४ यदा ग्रहग्रस्त
इव क्वचिद्धसत्याक्रंदते ध्यायति वंदते जनं मुहुः श्वसन्वक्ति हरे जगत्पते नारायणेत्यात्ममतिर्गतत्रपः ३५
तदा पुमान्मुक्तसमस्तबंधनस्तद्भावभावानुकृताशयाकृतिः निर्दग्धबीजानुशयो महीयसा भक्तिप्रयोगे

श्रीभा॰टि॰स्कं॰७

मभिजानाति यावान्यश्चास्मि तत्त्वतः इत्यादि २९ तत्रैवांतरंगान्धर्मानाह गुरोः शुश्रूषया भक्त्या प्रेम्णा सर्वेषां लब्धाना
मर्पणेन च ३० तल्लिंगानां मूर्तीनामीक्षणमर्हणं चादिशब्दाद्वंदनादीनां तेषु ३१ ३२ निर्जितः षण्णां कामक्रोधलोभ
मोहमदमात्सर्याणां वर्गो यैः ३३ भगवद्भक्तेर्लिंगमाह निशाम्येति त्रिभिः गुणान्भक्तवात्सल्यादीन् अतिह
र्षेणोद्गताः पुलका अश्रूणि च तैर्गद्गदं यथा भवति तथा एवं प्रोत्कंठ उद्गायति ३४ ३५ तस्य भावः चेष्टादिः तस्य भा
वो भावना तेनानुकृते आशयाकृती मनःशरीरे यस्य निर्दग्धं बीजं अज्ञानमनुशयो वासना च यस्य सः समेति प्राप्नोति

श्रीः भा० स० टी० ७

तीतः किमतस्त्राह अधोक्षजस्यालंभं मनसा स्पर्शं पाठांतरे तस्याश्रयणं अशुभः रागादियुक्त आत्मा मनो यस्य संसृतिच
क्रशातनं तन्निवर्तकं बुधा विदुः तदेव ब्रह्मणि निर्वाणं लयो मोक्षः तदात्मकं सुखं विदुः हृदीश्वरं मेतयामिणं ३७ भक्ति
वशात्कोतिव नमेतवमित्याह क इति छिद्रवत् आकाशवत् विषयाणामुपपादनैरर्जनैः किं न किंचिद्धेतुः सर्वदेहिनां सामान्य
तः विषयन पूर्वेस्न उपादि साधारणत्वात् नित्यार्थः नचैवं मादृशां पातकं कस्मादस्य पुनः नारदोक्तानुवादः नु पवादस्य प्रकरणस्य
३८ अनर्थकं च विषयार्जनमित्याह रायः अर्थाः क्षणभंगुरमायुर्यस्य तदुक्तमितिहासेषु धनं हि पुरुषो लोके पुरुषं धनमे
ववा धनं पुरुषमेकं त्यजतितस्यां किं धनस्येति ३९ यन्नदुःखेन संभिन्नं न च ग्रस्तमनंतरं अभिलाषोपनीतं च तत्सुखं स्वःपदा

अधोक्षजालंभमिहाशुभात्मनः शरीरिणः संसृतिचक्रशातनं तद्ब्रह्मनिर्वाणसुखं विदुर्बुधास्ततो भजध्वं हृद-
यहृदीश्वरं ३७ कोतिप्रयासोसुरबालका हरेरुपासने स्वे हृदि छिद्रवत्सतः स्वस्यात्मनः सख्युरशेषदेहिनां
सामान्यतः किं विषयोपपादनैः ३८ रायः कलत्रं पशवः सुतादयो गृहा मही कुंजरकोशभूतयः सर्वेर्थका-
माः क्षणभंगुरायुषः कुर्वंति मर्त्यस्य कियत्प्रियं चलाः ३९ एवं हि लोकाः क्रतुभिः कृता अमी क्षयिष्णवः सा-
तिशया न निर्मलाः तस्माददृष्टश्रुतदूषणं परं भक्त्योक्तयेशं भजतात्मलब्धये ४० यदर्थ इह कर्माणि विद्व-
न्मान्यसकृन्नरः करोत्यतो विपर्यासममोघं विंदते फलं ४१ सुखाय दुःखमोक्षाय संकल्प इह कर्मिणः
सदाप्नोतीहया दुःखमनीहायाः सुखावृतः ४२ कामान्कामयते काम्यैर्यदर्थमिह पूरुषः स वै देहस्तु पार-
क्यो भंगुरो यात्युपैति च ४३ किमु व्यवहितापत्यदारागारधनादयः राज्यकोशगजामात्यभृत्याप्ता ममतास्पदाः

पदमिति निर्वेदनाः स्वर्गादिभोगा अपि न सर्वोत्कृष्टा इत्याह एवं हीति तदायि सर्वेहेतुः क्रतुभिः कृताः निर्जितास्तद्युक्तं कर्मजितो लोकः २
क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्षीयत इति श्रुतेः अतएव पुण्यतारतम्येन सातिशयाः न च निर्मलाः स्पर्धादिसत्वात्
न विद्यते दृष्टं श्रुतं च दूषणं यस्मिन् ४० किं च यदर्थं यत्संकल्प्य अतः संकल्पितान् विपर्यासं विपरीतं फलं अमोघं अवश्यं
प्राप्नोति ४१ तदेव दर्शयति सुखायेति ईहया ईहया क्रियया वा यः पूर्वं मनोहारयाद्देतोः सुखेनावृतो व्याप्त आसीत् स ईहया
दुःखमाप्नोत्येव ४२ किं च कामानुभोगान् काम्यैर्विषयैः कर्मभिर्वा पारक्यः श्वादिभोज्यः न त्वात्मीयः भंगुरश्च ४३ किमु देहा
तद्व्यवहिता अपत्यादयो ममता विषयाः पारक्या इति वक्तव्यं ४४ किं च सर्वपुरुषार्थस्य किमेतैरित्याह किमेतैरिति

भोगावसराभावाच्चैवैः कृतप्रयोग इत्याह निरूप्यतामिति प्राचीनैः कर्मभिः क्लिश्यमानस्य कर्मभिः कियानर्थ इति वान्वयः ४६
ननु कर्मसु समाप्तेषु भोगावसरः स्यान्न ह्याह कर्माणीति नैवं देहकर्मतत्फले देहादिकं च परमार्थ इत्याह उभयं कर्म च देहश्च
विवेकतः कृतानेनैव तनुते ४७ यदर्थाश्च यायदधीनाः ४८ भूतानां प्राणिनां जीवसंज्ञितः अंतर्यामी ४९ अनुग्रहाणामस्मि

निरूप्यतामिह स्वार्थः कियान्देहभृतोऽसुराः निषेकादिष्ववस्थासु क्लिश्यमानस्य कर्मभिः ४६ कर्माण्यारभ-
ते देही देहेनात्मानुवर्तिना कर्मभिस्तनुते देहमुभयं त्वविवेकतः ४७ तस्मादर्थाश्च कामाश्च धर्माश्च यदपाश्रयाः
भजतानीहयात्मानमनीहं हरिमीश्वरं ४८ सर्वेषामपि भूतानां हरिरात्मेश्वरः प्रियः भूतैर्महद्भिः स्वकृतैः कृ-
तानां जीवसंज्ञितः ४९ सर्वेषामपि भूतानां हरिरात्मेश्वरः प्रियः देवोऽसुरो मनुष्यो वा यक्षो गंधर्व एव वा भजन्मु-
कुंदचरणं स्वस्तिमान्स्याद्यथा वयं ५० नालं द्विजत्वं देवत्वमृषित्वं वासुरात्मजाः प्रीणनाय मुकुंदस्य न वृत्तं न बहुज्ञ-
ता ५१ न दानं न तपो नेज्या न शौचं न व्रतानि च प्रीयतेऽमलया भक्त्या हरिरन्यद्विडंबनं ५२ ततो हरौ भगवति भक्तिं
कुरुत दानवाः आत्मौपम्येन सर्वत्र सर्वभूतात्मनीश्वरे ५३ दैतेया यक्षरक्षांसि स्त्रियः शूद्रा व्रजौकसः खगा मृगाः
पापजीवाः संति ह्यच्युततां गताः ५४ एतावानेव लोकेऽस्मिन्पुंसः स्वार्थः परः स्मृतः एकांतभक्तिर्गोविंदे यत्स-
र्वत्र तदीक्षणं ५५ इति श्रीभागवते सप्तमे सप्तमः ७ नारद उवाच अथ दैत्यसुताः सर्वे श्रुत्वा तदनुवर्णितम् जगृ-
हुर्निरवद्यत्वान्नैव गुर्वनुशिक्षितम् १ अथाचार्यसुतस्तेषां बुद्धिमेकांतसंस्थितां आलक्ष्य भीतस्त्वरितो राज्ञ
आवेदयद्यथा २ श्रुत्वा तदप्रियं दैत्यो दुःसहं तनयानयम् कोपावेशचलद्गात्रः पुत्रं हंतुं मनो दधे ३ प्रश्रयावन-
तं दांतं बद्धांजलिमवस्थितम् सर्पः पदाहत इव श्वसन्प्रकृतिदारुणः ५

कुमारनाधिकार इत्यपि न वाच्यमित्याह देव इति पंचभिः ५० ५१ अमलया निष्कामया विडंबनं नटनमात्रं ५२ ५३ अच्युत-
तां प्रकृतत्वे ५४ अध्यायद्वयोक्तमुपसंहरति एतावानिति तदीक्षणं गोविंददृष्ट्या समानत्वं ५५ इति भावार्थे सप्तमस्कंधे सप्त-
मोऽध्यायः ७ अष्टमिति कथासंगे निबद्धे दैत्याहतः स्वयं आविर्भूय नृसिंहेन सच ब्रह्मादिभिस्तुतः अंतःकृपासुधापूर्णो बहिः
क्रोधोद्धतकेसरी दैत्येंद्रपरिभावेन समभजं तं स्वभावयत् १ एकांतसंस्थितां प्रत्यद्भिः श्रायश्चायथावत् २ स च हंतुं मनो दधे
कथंभूतः कोपस्यावेशेनाइकेण चलत् गात्रवपुर्यस्य सः ३ क्षिप्त्वा तिरस्कृत्य पापेन सरोषेण तिरश्चीनेन वक्रेण ४ ५

श्री भा॰ म॰ टी॰ २८

मंदात्मन्नल्पबुद्धे मदाज्ञातिलंघिनां वायमालयमद्य नेष्यामि ६ अभीनवत् किंबलं यस्य सः किंबलः ७ वशं प्रणीता
इत्यर्थहेतवः सर्वेश्वराइति ८ उरवः क्रमाः पादविक्षेपा यस्य वक्रमपराक्रमइतिवा ओजः आदिरूपः सत्त्वं धैर्यं बुद्धिर्वा ९ मत्तुल
मैकवद्यं ममापि प्राप्तं बलं स्यादत आह जहीति आत्मनः स्वस्य स्वभावं जह अजितादात्मनो मनस एते विना अन्ये विद्विषो न संति
किंचन हि द्विषत्वे हि साम्येन मनसो धारणमेव ममार्हणमाराधनं १० मयाहि दिग्विजये सर्वे जिताः अतः सापत्ने न संतीति

हे दुर्विनीत मंदात्मन् कुलभेदकराधम स्तब्धं मच्छासनोद्धृतं नेष्ये त्वाद्य यमक्षयं ६ क्रुद्धस्य यस्य कंपंते त्रयो लोकाः
सहेश्वराः तस्य मेभीतवन्मूढ शासनं किंबलोत्यगाः ७ प्रह्लाद उवाच न केवलं मे भवतश्च राजन् स वै बलं बलिनां चाप
रेषां परेवरेमी स्थिरजंगमा ये ब्रह्मादयो येन वशं प्रणीताः ८ स ईश्वरः काल उरुक्रमोसावोजः सहः सत्त्वबलेंद्रियात्मा
स एव विश्वं परमः स्वशक्तिभिः सृजत्यवत्यत्ति गुणत्रयेशः ९ जह्यासुरं भावमिमं त्वमात्मनः समं मनो धत्स्व न सं-
ति विद्विषः ऋतेजितादात्मन उत्पथस्थितात् तद्धि ह्यनंतस्य महत्समर्हणं १० दस्यून् पुरा षण्न विजित्य लुंपतो मन्यं-
त एके स्वजिता दिशो दश जितात्मनो ज्ञस्य समस्य देहिनां साधोः स्वमोहप्रभवाः कुतः परे ११ हिरण्यकशिपुरुवा
च व्यक्तं त्वं मर्तुकामोसि योतिमात्रं विकत्थसे मुमूर्षूणां हि मंदात्मन् ननु स्युर्विक्लवा गिरः १२ यस्त्वया मंदभाग्यो
क्तो मदन्यो जगदीश्वरः क्वासौ यदि स सर्वत्र कस्मात्स्तंभे न दृश्यते १३ सोहं विकत्थमानस्य शिरः कायाद्धरामि ते गो-
पायेत हरिस्त्वाद्य यस्ते शरणमीप्सितम्
१४ ॥

मत्स्यमिति चित्रं माह दस्यूनिति एके भवादृशा मंदाः पुरा आदौ लुंपतः स्वयं संहरतः षड्रिंद्रियलक्षणान् दस्यून् न विजित्य अजित्वा दश
दिशः स्वयं जिता मन्यंते साधोस्तु जिन वित्तस्य देहिनां समस्य ज्ञस्य विदुषः स्वाज्ञानकल्पिताः परे शत्रवः कुतः स्युः ११ व्यक्तमिति
स्पष्टं विक्लवा असंबद्धा इत्यर्थः १२ हे मंदभाग्य यथा स विद्यते तर्हि क्वास्ति प्रह्लाद आह सर्वत्रास्ति हिरण्यकशिपुराह तर्हि क-
स्मात् स्तंभे नास्ति प्रह्लाद स्तंभे निरीक्ष्यमाणो न स्यात् आह दृश्यत इति १३ हिरण्यकशिपुस्तं मत्सरपत्राह १४ ॐ नमो
भगवते वासुदेवाय ॐ रामचंद्राय नमः
ॐ अग्नये नमः

२८

मोहमिति प्रह्लादेन मूर्ध्नि बद्धाञ्जलिना निरीक्ष्यमाणो स्तम्भं ताडितवान् १६ तत्पदं तस्य ध्वनेराश्रयं १७ भगवांस्तदा प्राह
भूपतेरुपाबभूव किमर्थं निजभृत्येन प्रह्लादेन यद्भाषितं तद्वचनं इति तत्सत्यं विधातुं कर्तुं तथा भूतेष्वखिलेषु आत्म-
नो व्याप्तिं च सत्यां कर्तुं स्तम्भे प्रहृप्पत तत्किमर्थं भौतिकेषु च भावेषु भूतेषु च मत्सत्त्वं च भगवानास्त इति तेन च भृत्येन भाषि-
तं तत्सत्यं कर्तुं तथा अत्यद्भुतं देहं धारणकं मतियोऽतन्नृपमुद्वहन् दधत् तत्किमर्थं निजभृत्यैः सनकादिभिः ब्राह्मणैर्नतरु
मनुनत्रिभिः स्तिमिर्जन्मभिः ब्राह्मणो जातो भवितेति तत्सत्यं कर्तुं तथा अत्यद्भुतं ब्रह्मस्तम्भवरं स्तम्भस्थं तं च रूपमुद्वहन् तद्वनमृ-
गाकारेण च मनुष्याकारेण उद्वहन् सभायां मध्ये प्रहृप्पत तत्किमर्थं निजभृत्येन हिरण्यकशिपुना ब्रह्माणं प्रति यद्भाषितं

एवं दुरुक्तैर्मुहुरर्दयन् रुषा सुतं महाभागवतं महासुरः खड्गं प्रगृह्योत्पतितो वरासनात् स्तम्भं तताडातिबलः
स्वमुष्टिना १५ तदैव तस्मिन्निनदोऽतिभीषणो बभूव येनाण्डकटाहमस्फुटत् यं वै स्वधिष्ण्योपगतं त्वजादयः
श्रुत्वा स्वधामात्ययमङ्ग मेनिरे १६ स विक्रमन्पुत्रवधेप्सुरोजसा निशाम्य निर्ह्रादमपूर्वमद्भुतं अन्तःसभायां न
ददर्श तत्पदं वितत्रसुर्येन सुरारियूथपाः १७ सत्यं विधातुं निजभृत्यभाषितं व्याप्तिं च भूतेष्वखिलेषु चात्म-
नः अदृश्यतात्यद्भुतरूपमुद्वहन् स्तम्भे सभायां न मृगं न मानुषम् १८ ॥

भूतेभ्यः त्वद्विसृष्टेभ्यो मृत्युर्मा भून्मम प्रभो इति तथा नान्तर्न बहिर्दिवा न नक्तं न मनुष्यैर्न मृगैरिति च ब्रह्मणा च निजभृत्येन तथा
स्थितिं यद्भाषितं सत्यं कर्तुं पूर्वं हिरण्यकशिपुना भाषितं नूनमेतद्विरोधेन मृत्युर्मे भवितेति तथा यमज्ञस्त्विद्धयोमवद्-
ति वचनाबुदे निजभृत्येन प्रतिभाषितं श्रेयसस्तान् संस्थानं प्राप्स्यति अनेन तान् च वरस्थानेन स्वभक्तयद्दियाति
तं च यद्भाषितं तत्सत्यं कर्तुं प्रादुर्बभूव चकारात् निजभाषितं यत्कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति इति तथा ते-
षामहं समुद्धर्ता मृत्युसंसारसागरादित्यादि
तच्च सत्यं कर्तुं प्रादुर्बभूवेति
इत्यस्य फलमिति दिक् ४०

श्रीः
भा०स्क
टीः
१९

सदैत्यः एवंध्वनिंश्रुत्वानदाशयंसत्वंप्राणिविशेषंसर्वतोविलोकयन्स्तंभस्यमध्यान्निर्गच्छन्नृमृगेंद्रयोर्मिश्रंरूप
महोकिमेतदितिमीमांसितवान् इतिशेषः तस्यैवमलंभयानकंनृसिंहरूपंमीमांसमानस्याग्रतोनृसिंहरूपोह
रिःसमुत्थितः १९ भयानकत्वमेवदर्शयंस्तद्रूपमनुवर्णयतित्रिभिः प्रतप्तंचामीकरंस्वर्णमिवपिंगानिचंडानि
लोचनानियस्मिन् स्फुरंत्यःसटाःजटाःकेसराःकंठरोमाणिस्फुरद्भिः सटाकेसरैर्जृंभितंसाटोपमाननंयस्मिन् करालाःती
व्रादंष्ट्रायस्मिन् करवालःखड्गःतद्वच्चंचलात्क्षुरांतवत् तीक्ष्णाजिह्वायस्मिन् भृकुटीयुक्तेनमुखेनोल्बणं २० स्त

सत्वमेवंपरतोविपश्यन्स्तंभस्यमध्यादनुनिर्जिहानं नायंमृगोनापिनरोविचित्रमहोकिमेतन्नृमृ
गेंद्ररूपं मीमांसमानस्यसमुत्थितोग्रतोनृसिंहरूपस्तदलंभयानकं १९ प्रतप्तचामीकरचंडलोचनंस्फु
रत्सटाकेसरजृंभिताननं करालदंष्ट्रंकरवालचंचलक्षुरांतजिह्वंभ्रुकुटीमुखोल्बणं २० स्तब्धोर्ध्वकर्णंगि
रिकंदराद्भुतव्यात्तास्यनासंहनुभेदभीषणं दिविस्पृशत्कायमदीर्घपीवरग्रीवोरुवक्षःस्थलमल्पमध्यमं
२१ चंद्रांशुगौरैःछुरितंतनूरुहैर्विष्वग्भुजानीकशतंनखायुधं २२ श्रीकमलदलविपुलनयनाभि
रामायश्रीरामच
द्रायनमो
नमः

स्तब्धौऊर्ध्वौकर्णौयस्मिन् गिरिकंदरवदद्भुतंव्यात्तंप्रसृतमास्यंनासेचयस्मिन्हनुकपोलभेदेनविदारणेन
भीषणंदिविस्पृशत्कायोयस्मिन् अल्पत्वमासः अदीर्घह्रस्वापीवराचस्थूलाग्रीवायस्मिन्उरुविशालंवक्षःस्थलं
यस्मिन्तनुत्वात् अल्पंमध्यमंउदरंयस्मिन् २१ चंद्रांशुवद्गौरैः
स्तनूरुहैर्लोमभिःछुरितंव्याप्तंविष्वक्सर्वतःप्रसृताभु
जानेषांप्रनीकालोमाःतेषांशतानियस्मिन्नखाएवायुधा यस्मिन् २२

१९

इत्यासद्यं शत्रुममृगाङ्कं सर्वाणि च निजानि चक्रादीनि उत्तमाणि वज्रादीनि तत्प्रायुधप्रवेकाः अस्त्रोत्तमाः तैर्विज्ञाविनादैत्यदा
नवायेन तद्रूपं मीमांसमानस्याग्रतः समवस्थित इति पूर्वेणान्वयः २३ तदाविर्भावप्रयोजनविमर्शपूर्वकं तेन सह दैत्य
स्य युद्धमाह समभिः प्रायेणामहामायाविनां हरिणा मे यमेवं भूतो वधः मृत्युर्हन्तुः स्मृतः चिन्तितः तथाप्यनेन समुद्य
तेन न किं विस्मयादित्येवं ब्रुवन्नभ्युपतदित्यन्वयः २४ तदा सोऽसुरो नृसिंहस्याजस्य सिंदीप्तोपतितः सन् प्रलद्यतः अदृष्टो

इत्यासद्यं सर्वनिर्जितशत्रुद्ध्वप्रवेकविज्ञाविनदैत्यदानव २३ प्रायेणामेयं हरिणोरुमायिनावधः स्मृतो
नेन समुद्यतेन किं एवं ब्रुवस्त्वभ्यपतद्गदायुधोनदन्नृसिंहं प्रतिदैत्यकुञ्जरः २४ अलक्षितोऽग्नौ पतितः
पतङ्गमो यथा नृसिंहौजसि सोऽसुरस्तदा न तद्विचित्रं खलु सत्त्वधामनि स्वतेजसा यो नु पुरापिबत्तमः
२५ ततोऽभिपद्याभ्यहनन्महासुरो रुषा नृसिंहं गदयोरुवेगया तं विक्रमन्तं सगदं गदाधरो महोरगं ता
र्क्ष्यसुतो यथाग्रहीत् २६ स तस्य हस्तोत्कलितस्तदासुरो विक्रीडतो यद्वदहिर्गरुत्मतः असाध्वमन्यन्त
हृतौकसोऽमरा घनच्छदा भारत सर्व
धिष्ण्यपाः २७

भूत् सत्त्वधामनि स्वतेजसि अंकाशे हरौ पतितस्य तमोमयस्यादर्शनं न तद्विचित्रं न भवति तत्र हेतुः यो हरिः पुरा सृष्ट्यादौ
प्रलयकालीनं तमः स्वतेजसापिबत्तस्मिन् २५ विक्रमन्तं समन्तात्संचरन्तं २६ हस्तादुत्कलितः निःसृतः तदा अम
रा देवाः सर्वे धिष्ण्यपाः असाध्वमन्यन्त हृतान्यौ
कांसि स्थानानि येषां ते तच्छ्रियाच्च
न च्छदाः मेघान्तरिताः सन्तः २७

श्रीः
भा॰स॰
टी॰
३॰

यस्य हस्तान्नृहरेरयं मुक्तः तं नृहरिं स्ववीर्याच्छङ्कितं मन्यमानः खड्गं चर्मणी प्रगृह्य पुनस्तमासज्जत अभ्यपद्यतेत्यन्वयः २८
श्येनस्येव वेगो यस्य तं शतचन्द्रवर्त्मभिः खड्गमार्गैः अच्छिद्रं यथा भवत्येवमुपर्यधश्चरन्तं अट्टहासमेवाह खरं तीव्रं उत्स्वनेन
महाशब्देनोल्बणं यं कुर्वंस्तद्भयेन हरेः तेजसा वा निमीलिते अक्षिणी यस्य २९ गृहीतो दृष्टान्तः व्यालो यथा आखुं मूषकं वि॰
दारयति दृष्टान्तः अहिं गरुड इवेति विष्वक् सर्वतः स्फुरन्तं ग्रहणेनातुरं विवशं इन्द्रेण महायुद्धेऽक्षतेन कुलिशेन न क्षतत्वचं

तं मन्यमानो निजवीर्यशङ्कितं यद्धस्तमुक्तो नृहरिं महासुरः पुनस्तमासज्जत खड्गचर्मणी प्रगृह्य वेगेन जितश्रमो
मृधे २८ तं श्येनवेगं शतचन्द्रवर्त्मभिः चरन्तमच्छिद्रमुपर्यधो हरिः कृत्वाट्टहासं खरमुत्स्वनोल्बणं निमीलि
ताक्षं जगृहे महाजवः २९ विष्वक्स्फुरन्तं ग्रहणातुरं हरिर्व्यालो यथाखुं कुलिशाक्षतत्वचं द्वार्यूरुमापात्य ददार ली
लया नखैर्यथाहिं गरुडो महाविषं ३० संरम्भदुष्प्रेक्ष्यकरालदलोचनो व्यात्ताननान्तं विलिहन्स्वजिह्वया अ॰
सृग्लवाक्तारुणकेसराननो यथान्त्रमाली द्विपहत्यया हरिः ३१ नखाङ्कुरोत्पाटितहृत्सरोरुहं विसृज्य तस्यानुच
रानुदायुधान् अहन्समस्तान्नखशस्त्रपार्ष्णिभिर्दोर्दण्डयूथोऽनुपथान्सहस्रशः ३२

गपि यस्य द्वारि सभायामन्तर्न बहिः कुतः ऊरौ निधाय न भूमौ न वा खे न त्वेन त्वक्समभिरस्त्रमद्भिर्वा एवं दिवानक्तमपि दिह्वायसं।
ध्यायामिति द्रष्टव्यं ३० दैत्यवधमुक्त्वा तद्गत्यवधमाह द्वाभ्यां संरम्भेण दुष्प्रेक्ष्याणि करालानि लोचनानि यस्य असृग्लवाक्तस्य
लवैर्विन्दुभिः आक्ताः सिक्ताः अत एव अरुणाः केसरा आननं च यस्य सः कुञ्जरवद्द्विपहत्यया गजवधेन हरिः सिंहो यथा एवंभूतस्त॰
स्यानुचरानुद्धृतायुधान् अहन्नित्यन्वयः ३१ नखाङ्कुरैरुत्पाटितं हृत्सरोरुहं यस्य तं दोर्दण्डानां यूथानि यस्य सः तमनुपथा ये तानन्यां
श्चान्यानपि तत्पक्षपातिन इत्यर्थः ३२

दैत्यवरस्याग्रसनूहोरारोपमाहद्वाभ्यां सन्नाभिरवधूनाः शवंपिनाः परापननूपशीर्यननस्यदृष्यविशुद्दरोवि
र्येषां नतिरस्कृनप्रभाः प्रभवन्नितिशेषः दिशिभाः दिग्नाः २३ नस्यसन्नाभिकृन दिव्यानिविमानानैःसंकुला
भ्यासा सनीशेत्सर्यनस्यस्यानान प्रकर्षणोहसर्पन २४ स्वभृत्येश्वर्यमाश्चर्यमिवमत्वाक्वोनूहलेननस्यासनेउ
पविष्टेभैयात्वोपिनभंबाभाननासेवननलाहिनो दैत्येशः प्रतियोद्धायेन २५ लोकत्रयस्यमस्तकं ज्वरोंशिरोव्यथे
त्युप्रः सहैपहर्षस्यवेगेनउत्कलिनानिविकसितानानन्यनानानियासांताः नूहरिवहेशः २६ लोकत्रयस्यमस्तेना

सन्नावधूनाः नलदापरापतेगृहाश्चन हृष्टिविशुद्दरोचिषः शुंभोपयः श्यासहनाविव स्तम्भर्विद्वास्भी
नादिगिभाविद्युक्तस्य: २३ पौरस्तस्योत्तिमविमानसंकुलाप्रोत्सर्पनदुमावपदानिपीडिता शैलाःस
मुत्पेनरयुध्यरहिसानन्नेजसाक्वकुभोनरेजिरे २४ ननःसभायामुपविष्टमुन्नमेनृपासनेसंभृननेन
सविशं प्रलक्षितम्त्रैरपसामर्षणाप्रवेदवक्रेनचभाजकश्चन २५ निशम्यलोकत्रयमस्तकज्वरेन
मादिदेशंहरिणाहतंशुभे प्रहर्षवेगोत्कलिनाननाशुकः शस्तनवर्षैर्विहगुरुस्त्रियः २६ नदाविमा
नावलिभिर्नभस्तलंदिदृक्षुनोसंकुलमासनाविनो स्वानकाउरुभयोपज्ञजितिरेगंधर्वशुश्वानरनल
गुस्त्रियः २७ नवोपवज्यविबुधास्त्रेसंइगिरिशास्त्यः अप्सरः पिनरःसिद्धाविद्याधरमहोरगाः २८
मनवःप्रजानायनयोगंधर्वाप्सरचारणाः यक्षाःकिंपुरुषाभून्नवेनालासिद्धकिन्नराः नेविस्मयार्थ
दाःसर्वेमूनेरक्तुरुदात्यः॥२९ भूमिंवद्धाञ्जलिपुटाःप्रासीनेनीचैर्नमस्य ईभिरेनरसिंहस्तुलंनानिहुनावरा
णुपवकः ५० ब्रह्मोवाच ननोस्मनेनायदुरंनशक्तयेविचित्रवीर्यायपवित्रकर्मणे विश्वस्यसर्गस्थिति
सयमानगुणैः सलीलयासंदधनेक्षयात्मने ५१ रुद्रउवाच कोपकालोयुगांनस्तेहनोयरमसुरो

किनांविमानावलिभिः स्वराणामानेकाः पटहाः नेजेजिरेवादिनाः स्त्रियोप्सरसोननृनुः २० २८ गंधर्वाश्चप्स
रसश्चारणाश्चेयर्थः २९ नरसिंहस्तुलेपुरुषोत्तम अस्याद्यागुसिंहस्यशोकयाउलवेनसः शारदेवास्तवन्समर
शाश्लोकःपृथक्पृथक् ४० अनंतायअनंतंप्रसादयितुंनेनोस्मिअनेनैनहेतुः दुरंताः शक्तयोयस्यनस्मैनः
शास्त्रोकःपृथक्पृथक् विचित्राणि वीर्याणिप्रभावायस्यनस्मै मर्त्योपविजाणि शोधकानि कर्माणियस्य विचित्रवीर्यत्वमेवाह विश्वसे
विचित्राणि वीर्याणि प्रभावायस्यनस्मै मर्त्योपवित्राणि शोधकानिकर्माणियस्य ततः सन्निधानकोपकालाभिज्ञानाययाकोपाव
नि संदधने सम्यक् करोतिएवमप्यक्षयात्मनेप्रपञ्चनस्वरूपाय ५१ भद्रस्तवनकोपकालाभिज्ञानाययाकाप्यव

श्री० भा० स० टी० २१

इंद्रस्त्वं नास्माकं हविर्भागादिलाभाः पुरुषार्थः किं नत्वमाराधयैवं भवताशुनरनेन संरंभेण स्वकार्यमेवसाधितं मा
स्यवसिद्धत्वात्परसंहरेनं कोपमित्याशयेनाह हे परमतोस्मान् त्रायतारत्नं भवतास्वीयाएव भागाहेतास्त
स्माहृताः शंनयामिमोस्त्वेव वयसेशुभोमहत्वात् अस्मदीयं हृदयकमलेचतत्त्वस्त्वद्गृहमेवेतावत्पर्यं नभवेहेतत्वेन
असमात्स्पतिपर्यायेनित्यस्थिने नदैत्येनाक्रांतं व्याप्तं सत् तत्वबोधिभयापाकरणेन विकासनीतं नवत्रैलोक्ये अर्थसा
धनार्थं मयस्त्वत्सस्मृतिवेत् तत्राह कालग्रस्तमितिनेत्वां हेनभसिंहनरस्यसिंहस्याकाराभ्यामाविर्भूत ४१
ऋषयऊचुः त्वंवनेनेन अस्माकं महाअनुग्रहोः कृतइत्याहुः त्वं नोयदात्मपरंध्यानलक्षणं तपः परमत्वेहेतः आत्म
नः तवतेजः प्रभा रूपं तदेवाह येनतपसात्मनिलीनमिदं विश्वं ससर्जसृष्टवानसि तत् अमुनादैत्येन विप्रलुप्तं

इंद्रउवाच प्रत्यानीताः परमभवता त्रायता नः स्वभागा दैत्याक्रांतं हृदयकमलं त्वद्गृहं प्रतिबोधि काल
ग्रस्तं कियदिदमहो नाथ शुश्रूषतां ते मुक्तिस्तेषां नहि बहुमता नारसिंहापरैः किं ४२ ऋषयऊचुः
त्वं नः तपः परममार्थ यदात्मतेजो येनेदमात्मपुरुषात्मगतं ससर्ज तद्विप्रलुप्तममुनाद्य शरण्यपाल र
क्षागृहीतवपुषा पुनरन्वमंस्थाः ४३ पितरऊचुः श्राद्धानि नोधिबुभुजे प्रसभं तनूजैर्दत्तानि तीर्थसमये
पिबत्तिलाम्बु तस्योदरान्नखविदीर्णवपाद्य आर्च्छत्तस्मै नमो नृहरयेखिलधर्मगोप्त्रे ४४ सिद्धाऊ
चुः यो नो गतिं योगसिद्धामसाधुरहारषीद्योगतपोबलेन नानादर्पं तं नखैर्निर्ददार तस्मै तुभ्यं प्रणताः
स्मो नृसिंह ४५ ॥ ॥

ऽपि नसन् हे शरण्यपाल अद्य रक्षार्थं गृहीतेनानेन वपुषा पुनरपि तपः करुनेत्यनुज्ञातवानसि तस्मै तेनमइत्युत्तरश्लोक
वर्तिपादस्यानुषंगः ४३ पितरस्त्वं श्राद्धोद्धरेणेन परमोपकारिणं प्रणमंति श्राद्धानि प्रदत्तानि यो दत्तानि नो
स्माकं पुत्रैर्दत्तानि प्रसभं बलात् स्वयं बुभुजे किंच तीर्थस्नानसमये दत्तं तिलोदकमप्यपिबत् तानि तस्योद
रात् यआर्च्छत् प्राप्तवान् कथंभूतात् नखैर्विदीर्णा वपा यस्य तस्मात् एवं पावित्रदारणस्य तज्ज्ञनीपंजोद्धरण
मेवफलमितिभावः ४४ योगसिद्धां गतिं अणिमादिसिद्धिं नाना अनेकादर्पा
यस्य तं नखैर्भित्वा अहिंसीत्यर्थः ४५ ॥

राम २१

विद्यामंतर्द्धानादिलक्षणां पृथग्धारणयानुराद्धां संप्राप्तां संख्ये युद्धे ४७ रत्नानि पद्मरागादीनि स्त्रीरत्नानि उत्तमाः स्त्रि
यः आसां स्त्रीणां दत्त आनंदो येन तत्संबोधनं पाटनेनैतासां दत्त आनंदो येनेति ४८ नृसिंहेनावलोकिताः संतो
मूर्द्धिवंद्यं जलयो मनवः प्रोचुः मनवो वयं धर्मपालकाः परिभूताः सेतवो वर्णाश्रमधर्ममर्यादा येषां ते अनुशाधि
आज्ञापय ४९ प्रजापतयो पितृदेवलोकिताः प्रोचुः हे परेश त्वया अभिसृष्टाः प्रजेशा वयं येन निषिद्धाः संतः
प्रजा न सृजामः स एष भिन्नवक्षा यस्य सः अनिश्चितः शेते अतः परं प्रजाः सृजाम इति तत्रैव आहुः हे सत्वमू

ॐ विद्याधरा ऊचुः विद्यां पृथग्धारणयानुराद्धां न्यषेधदज्ञो बलवीर्यदृप्तः स येन संख्ये पशुवद्धतस्तं माया
नृसिंहं प्रणताः स्म नित्यं ४७ नागा ऊचुः येन पापेन रत्नानि स्त्रीरत्नानि हृतानि नः तद्वक्षःपाटनेनासां
दत्तानंद नमोस्तु ते ४८ मनव ऊचुः मनवो वयं तव निदेशकारिणो दितिजेन देव परिभूतसेतवः भव
ता खलः स उपसंहृतः प्रभो करवाम ते किमनुशाधि किंकरान् ४९ प्रजापतय ऊचुः प्रजेशा वयं ते परेशा
भिसृष्टा न येन प्रजा वै सृजामो निषिद्धाः स एष त्वया भिन्नवक्षा नु शेते जगन्मंगलं सत्वमूर्तेवतारः ५० गं
धर्वा ऊचुः वयं विभो ते नटनाट्यगायका येनात्मसाद्वीर्यबलौजसा कृताः स एष नीतो भवता दशामिमां
किमुत्पथस्थः कुशलाय कल्पते ५१ चारणा ऊचुः हरे तवांघ्रिपंकजं भवापवर्गमाश्रिताः यदेष सा
धुहृच्छयस्त्वयासुरः समापितः ५२ यक्षा ऊचुः वयमनुचरमुख्याः कर्मभिस्ते मनोज्ञैस्त इह दिति
सुतेन प्रापिता वाहकत्वं स तु जनपरितापं तत्कृतं जानता ते नरहर उपनीतः पंचतां पंचविंश ५३ किं
पुरुषा ऊचुः वयं किंपुरुषास्त्वं तु महापुरुष ईश्वरः अयं कुपुरुषो नष्टो धिक्कृतः साधुभिर्यदा ५४ वै

र्ते तवायमवतारो जगतां मंगलं ५० गंधर्वा अपि तदवलोकिताः प्रोचुः हे विभो वयं ते त्वदीयाः नटाः नर्तकाः नाट्यगु
णगायकाः येनात्मसात् स्वाधीनाः कृताः तव च पुनः तेन वीर्यं शौर्यं बलं शक्तिः ताभ्यामोजः प्रभावो यस्य तेन इमां दशां नीतः उत्पथस्थो विन
ष्टमित्याहुः किमिति ५१ भवापवर्गं संसारनिवर्तकं पादाम्बुजमाश्रिताः यद्यस्मात् साधूनां हृदि भयजनकत्वात् शेते
तिष्ठतीति तथाभूतो असुरः त्वया समापितः अंतं नीतः ५२ मनोज्ञैः कर्मभिः अनुचरेषु मुख्याः पंचतां मृत्युं हे पंच
विंशतत्वनियामक ५३ किंपुरुषाः तावत्ताने के वयं वराकाः इत्याहुः वयं किंपुरुषाः त्वं तु
महान् पुरुषः प्रभावः पुरुषः न त्वयं महांश्चेत् साधुभिर्धिक्कृतः ... इत्याहुः अयमिति ५४ ॥ ॥

श्री॰
भा॰स॰
टी॰
२२

सत्त्वेनावृतगुणेनैव याहृतः प्रतिदिशाभद्रं कृतं ५५ अमुना दितिजेन विष्टिं निर्मूल्यं कर्म अनुवर्तिनः कारिताः अतः परं
नः विभवाय समृद्धये भव ५६ नोऽस्माकं भक्तानां शरणद आश्रयप्रद सर्वेषां लोकानां सर्वमंगलमेतद्रूपं अद्य
दृष्टं नः एवं विधिकरः किंकरः ५७ इति श्रीभावार्थदीपिकायां सप्तमस्कंधे अष्टमोऽध्यायः ८ नवमे वर्णयते भी
त्या चोदितो नत्वा स्तौति यः कोपं शमयन् नृसिंहमतिभीषणं १ उग्रो यद्यप्यवाय स्वभक्तानां नृकेसरी केस
री वस्वपोनानाम अप्यत्युग्रविग्रहः २ इत्याद्यागमैर्ज्ञेयः भक्तानुकंपिना माहृ एवमिति सप्तभिः एवं हृतन एव स्थिता

किन्नरा ऊचुः वयमीश किन्नरगणास्तवानुगा दितिजेन विष्टिममुनानुकारिताः भवता हरे स वृजिनोऽवसा
दितो नरसिंह नाथ विभवाय नो भव ५६ विष्णुपार्षदा ऊचुः अद्यैतद्धरिनररूपमद्भुतं ते दृष्टं नः शरणद स
र्वलोकशर्म सोऽयं ते विधिकर ईश विप्रशप्तः तस्येदं निधनमनुग्रहाय विद्मः ५७ इति श्रीभागवते सप्तम
स्कंधे प्रह्लादानुचरिते दैत्यराजवधो नामाष्टमोऽध्यायः ८ नारद उवाच एवं सुरादयः सर्वे ब्रह्मरुद्रपु
रःसराः नोपैतुमशकन्मन्युसंरंभं सुदुरासदं १ साक्षाच्छ्रीः प्रेषिता देवैर्दृष्ट्वा तं महदद्भुतम् अदृष्टाश्रुतपूर्व
त्वात्सा नोपेयाय शंकिता २ प्रह्लादं प्रेषयामास ब्रह्मावस्थितमंतिके तात प्रशमयोपेहि स्वपित्रे कुपि
तं प्रभुं ३ तथेति शनकै राजन्महाभागवतोऽर्भकः उपेत्य भुवि कायेन ननाम विधृतांजलिः ४ स्वपादमू
ले पतितं तमर्भकं विलोक्य देवः कृपया परिप्लुतः उत्थाप्य तच्छीर्ष्ण्यदधात्कराम्बुजं कालाहिवित्रस्तधि
यां कृताभयं ५ स तत्करस्पर्शधुताखिलाशुभः सपद्यभिव्यक्तपरात्मदर्शनः तत्पादपद्मं हृदि निर्वृतो
दधौ हृष्यत्तनुः क्लिन्नहृदश्रुलोचनः ६ ॥

स्तवेनः प्रह्लादेति मन्युना संरंभं आवेशो यस्य तं उपगंतुं नाशक्नुवन् महदद्भुतं रूपं दृष्ट्वा शंकिता सती तं नोपेयाय उपे नव
गाम ब्रह्मणैव प्रहितः प्रह्लादेति २ उपेहि उपगच्छ ३ ४ कालरूपः अहिः तस्मात् वित्रस्ता धीर्येषां कृतं अभयं येन
५ तस्य करस्पर्शेन धुतं निरस्तं अखिलं अशुभं यस्य सः सपदि तत्क्षणमेव अभिव्यक्तं परात्मदर्शनं यस्य तत्पादपद्मं हृदि दधौ
निर्वृतः सन् हृष्यद्धृष्यन्ती तनुः रोमांचिता यस्य क्लिन्नं हृदयं यस्य अश्रूणि लोचनयोर्यस्य परमप्रेमभरा
र्द्रतया दयोनसा धनत्वेनेमर्थः ६ ॥ रोम ॥

राम॰
२२

सुसमाहितं तं नैवाह नासिकेवन्यस्तहृदयं ईक्षणं च येनेति ७ स्वामिनि विवशसमस्तेषु तत्त्वहा पाङ्गनहृष्टये प्रह्लादः स्तौ
ति सप्तभिर्हि चत्वारिंशता नाहं हरिं नत्वा तावदात्मनो भगवत्स्तवनानधिकारमिवाशंकयाधिकारं संभावयन्नाह ब्रह्मादयः
तिपंचभिः मुनयो मननशीलाः सिद्धास्ता निनोपि कपंभूताः सत्त्वे एवैकस्मिंस्तानो विस्तारो यस्याः सा मतिर्येषां तथा
विधा अपि वचसां प्रवाहैरपि नयावद्भिर्वचनैर्माराणैर्गुणैरपि यं आराधयितुं नापिप्रुः न पूर्णाः न शक्ता इत्यर्थः स हरिर्मेऽ
ग्रयोनेर्मम तोषं प्राप्तुमर्हतीति नन्वहेतु उग्रा घोरा आसुरी जातिर्यस्य एवं हरितोषणे स्वस्यायोग्यतामाशंक्य योग्यतां संभावय
ति मन्ये इति द्वाभ्यां अभिजनः सत्कुले जन्म रूपं सौन्दर्यं श्रुतं पांडित्यं ओजः इंद्रियनैपुण्यं तेजः कांतिः प्रभावः प्रतापः
पौरुषमुद्यमः बुद्धिः प्रज्ञा योगो अष्टांगः एते धनादयो द्वादश आपि गुणाः परमस्य पुंसः आराधनाय न भवंति हि यतः
केवलया भक्त्यैव सन्तगजेंद्राय तुष्टो भवत ८ एवं भक्त्यैव केवलया हरेः तोषः संभवतीत्युक्तं इदानीं भक्तिं विना नान्य

अस्तौषीद्धरिमेकाग्रमनसा सुसमाहितः प्रेमगद्गदया वाचा तन्न्यस्तहृदयेक्षणः ७ प्रह्लाद उवाच ब्र
ह्मादयः सुरगणा मुनयोऽथ सिद्धाः सत्त्वैकतानगतयो वचसां प्रवाहैः नाराधितुं पुरुगुणैरधुनापि पिप्रुः
किंतोष्टुमर्हति स मे हरिरुग्रजातेः ८ मन्ये धनाभिजनरूपतपःश्रुतौजस्तेजःप्रभावबलपौरुषबुद्धियो
गाः नाराधनाय हि भवंति परस्य पुंसो भक्त्या तुतोष भगवान् गजयूथपाय ९ विप्राद्द्विषड्गुणयुता
दरविंदनाभपादारविंदविमुखात् श्वपचं वरिष्ठं मन्ये तदर्पितमनोवचनेहितार्थप्राणं पुनाति स
कुलंनतुभूरिमानः १० नैवात्मनः प्रभुरयं निजलाभपूर्णो मानं जनादविदुषः करुणो वृणीते यद्यज्ज

त्वं किंचित्तोषहेतुः स्यादित्याह विप्रादिति पूर्वोक्ता धनादयो द्विषड् द्वादशगुणास्तैर्युक्तात् विप्रादपि श्वपचं वरिष्ठं मा
न्ये यद्वा सनत्सुजातोक्ता द्वादश धर्मादयो गुणा द्रष्टव्याः तदुक्तं धर्मश्च सत्यं च दमस्तपश्च अमात्सर्यं ह्रीस्तितिक्षा
नसूया यज्ञश्च दानं च धृतिः श्रुतं च महाव्रता द्वादश ब्राह्मणस्येति कथंभूतात् अरविंदनाभस्य पादारविंदाद्विमुखात्
कथंभूतं श्वपचं तस्मिन्नरविंदनाभे अर्पितानि मनआदीनि येन तं ईहितं कर्म वरिष्ठत्वे हेतुः स एवंभूतः श्वपचः सर्वं कुलं
पुनाति भूरिमानो गर्वो यस्य स तु विप्रः आत्मानमपि न पुनाति कुतः कुलं यतो भक्तिहीनस्यैते गुणा गर्वायैव भवंति न त्वशु
द्धये अतो हीनत्वमिति भावः १० नहि किंचित् धनाद्यपेक्षितैः संमानं प्राह तत्र भगवान् अपेक्षते तेनेत्याह नैवेति अयं प्रभुरीश्वरः
अविदुषो लोकाज्जनात् मानं पूजां आत्मनोऽर्थं न वृणीते नेच्छति यतो निजलाभेनैव पूर्णः नहि पूर्णस्येच्छा संभवतीत्याह करु

श्री॰
भा॰ स॰
टी॰
३३

णः कृपालुः अतोहमपीतेष्वनवहितः यथाशक्तिनिर्भयंमानेयद्यथायद्यस्मात् यद्येनधनादिनाभगवतेनेमानंविदधीततदे
वात्मनेभवतिनान्यत् यथाशुविद्धनेवतिलकादिश्रीः योभाशतिर्वैवस्यभवतिनतत्साक्षात्तस्यैवकर्तेश्शकानेतद्भत्
११ यस्मादेवं भगवान् भक्त्यैव तुष्यति तस्मादहं नीचोपि विगतविक्लवः गतशोकः सन् ईश्वरस्य महि महिमानं सर्वश्र
यत्नेन स्वमनीषानुसारेणानुवर्णयामि गृणामि अज्ञानेनापि स्तुतिकरणे हेतुमाह येनैवं महिम्नानुवर्णितेनाविद्ययासं
सारमनुप्रविष्टः पुमान् पूयेत सद्यः तन्महि गृणामि अन्यस्य तथाशोधकस्याभावादित्यर्थः १२ नन्वेवमात्मनः स्व
तावदनधिकारपरिहृतोपीदानीं तु स्तवन् कोपोपसंहारं प्रार्थयते सर्वे हीति ब्रह्मादयोपीशाज्ञयाभीतचित्ताः तोविद्यतः
सर्वे ब्रह्मादयः तन्मूर्तयः तव विधिकराः तवनियोगकर्तारो भक्ताः यदा त्वेन च वयमसुराइव वैरभावेनैते भक्ताविद्य

तस्मादहंविगतविक्लवईश्वरस्यसर्वात्मनामहिगृणामियथामनीषं नीचोजयागुणविसर्गमनुप्रवि
ष्टः पूयेतयेनहिपुमाननुवर्णितेन १२ सर्वेह्यमीविधिकरास्तवसत्त्वधाम्नोब्रह्मादयोवयमिवेशनचो
द्विजन्तः क्षेमायभूतयउतात्मसुखायचास्यविक्रीडितंभगवतोरुचिरावतारैः १३ तद्यच्छमन्युमसुर
श्चहतः त्वयाद्यमोदेतसाधुरपिवृश्चिकसर्पहत्या लोकाश्चनिर्वृतिमिताः प्रतियन्तिसर्वेरूपंनृसिंहवि
भयायजनाःस्मरन्ति १४ ॥

अतुयैवतवरुचिरैरवतारैः विविधंक्रीडनंअस्यविश्वस्यक्षेमादिप्रयोजनायनतुभयोत्पादनाय १३ ननुतस्माद्वयो
भयपरिहारायमन्युंयच्छउपसंहरयदर्थंअयंमन्युः सचासुरः साधुनासेनोपघातार्थंअयंहतः अतःपरंकोपेना
कार्याभावान्नियच्छ ननुनैषांवधेनसाधुः किंमोदेतनह्यहंवृश्चिकादेः परोपद्रवकारिणोन्यस्यवधात्नयाह
साधवःतेनतस्यैवतत्त्वंजानतइतिसाधुरपिमोदेतएवतर्हिबहूनांस्वभावहन्ताहंकोपंनत्यजामीतिचेत् नयाह
लोकाश्चनिर्वृतिंइताःप्राप्ताःसन्तःप्रतियन्तिकोपोपसंहारंप्रतीक्षन्तेनहिजनानांस्वभावहन्ताहंकोपंन
त्यजामीतिचेत् नयाहलोकाश्चनिर्वृतिंइताः पुनर्भवाभावायमन्युंधारयामीतिचेत् नयाह रूपमितिविभयाया
भयनिवृत्तयेनृरूपस्मरणादेवभवयानिवृत्तेर्नेनमन्युधारणेनमह्यंनमस्तीत्यर्थः १४॥ ॥ ॥

राम॰
३३

तं वेद्मि भेषि नर्हिं त्वं मामीति चेत् तत्राह नाहमिति भो अजित ते अस्मात् रूपात् अहं न बिभेमि कथंभूतात् आ
स्यं च जिह्वा च अर्कवत् नेत्रे च भ्रुकुटी च ताभी रभसं साटोपं च उग्रा दंष्ट्रा च एतान्यतिभयानकानि यस्मिन् तस्मात्
आंत्रमय्यः स्रजो यस्मिन् तत् आंत्रस्रक् तस्मात् क्षतजानि रक्ताः केसराणि यस्मिन् शंकुवदुन्नतौ स्तब्धौ कर्णौ यस्मिन्
तत् च तत् च तस्मात् निर्ह्रादेन भीता दिग्गजा यस्मात् अरीन् भिंदंतीत्यरिभिदः अरिभिदो तानि नखाग्राणि यस्मिन् एवंभू
तादपि ते रूपादहं न बिभेमि १५ मद्भयं तन्यदस्तीत्याह त्रस्तोऽस्मीति दुःसहो यद् उग्रः संसारचक्रे कदनेन दुःखेनाह
हं त्रस्तोऽस्मि न त्वत्तः ग्रसतां हिंस्राणां मध्ये स्वकर्मभिर्बद्धः संप्रणीतः निक्षिप्तोऽस्मि हे कृपणवत्सल हे उशत्तम कदा त्व
त्प्रीतः सन् अपवर्गभूते शरणे तवांघ्रिमूले ह्वयसे मामाह्वास्यसि १६ दास्यसत्तमं मन्यानीति रिति चेन्न नहि

नाहं बिभेम्यजित तेऽतिभयानकास्यजिह्वार्कनेत्रभ्रुकुटीरभसोग्रदंष्ट्रात् आंत्रस्रजः क्षतजकेसरशंकु
कर्णान्निर्ह्रादभीतदिगिभादरिभिन्नखाग्रात् १५ त्रस्तोऽस्म्यहं कृपणवत्सल दुःसहोग्रसंसारचक्रक
दनाद्ग्रसतां प्रणीतः बद्धः स्वकर्मभिरुशत्तम तेंऽघ्रिमूलं प्रीतोऽपवर्गशरणं ह्वयसे कदा नु १६ यस्मा
त्प्रियाप्रियवियोगसयोगजन्मशोकाग्निना सकलयोनिषु दह्यमानः दुःखौषधं तदपि दुःखमतद्धि
याहं भूमन् भ्रमामि वद मे तव दास्ययोगं १७ सोऽहं प्रियस्य सुहृदः परदेवताया लीलाकथास्तव नृसिंह
विरिंचगीताः अंजस्तितर्म्यनुगृणन् गुणविप्रमुक्तो दुर्गाणि ते पदयुगालयहंससंगः १८ ॥ ॥

नानायोनिषु भ्रमतः मम दुःखस्य ज्ञानाभावात् त्वमेव तदुपदिशेति प्रार्थयते यस्मात् प्रिये प्राप्तेऽप्रिये च प्राप्ते यथासं
ख्यं वियोगसंयोगाभ्यां जन्म यस्य तेन शोकाग्निना सकलयोनिषु दह्यमानोऽस्मि दुःखस्य प्रतीकारः कार्य इति चेन्न यतः
दुःखस्यौषधं प्रतीकारः तदपि दुःखमेव एवमपि अतद्धिया देहाद्यभिमानेन भ्रमामि अतः हे भूमन् विभो मे तव
दास्ययोगं रूपं निस्तारोपायं वद १७ ननु दास्ययोगेन प्रहृतोऽस्यापि तदनन्तरायभूतानां पूर्वोक्तानां नानादुःखानां कुतः परि
हारः तत्राह सोऽहं त्वद्दासः सन् भो नृसिंह तव लीलाकथा अनुगृणन् दुर्गाणि महादुःखान्यंजसा नितरां तर्मि तरा
मि तरिष्यामीत्यर्थः तत्र हेतुः गुणैः रागादिभिर्विप्रमुक्तः सन् तत्कुतः ते पदयुगमेवालयो येषां भक्तानां ता
एव हंसा ज्ञानिनः तैः संगो यस्य मम सोऽहं कथंभूतस्य कथास्तत्राह प्रियस्येत्यादि कुतो ज्ञाताः विरिंचेन गीताः तत्संप्र
दायप्राप्ताः यथा चाथर्वणीश्रुतिः देवा ह वै प्रजापतिमब्रुवन् इत्यादिश्रुतिः दास्यप्रहृतस्य भगवदनुग्रहेणोत्तरणं:

नतोऽवीतरागतयाभगवद्गुणानुवर्णनेनतत्त्वदुःखानभिभवःस्यादितिवाक्यार्थः १८ ननुदुःखेनग्रस्यमानस्यप्रतीकारो
लोकेप्रसिद्धएवकिंमदास्यादिनानत्याह बालस्येति भोनृसिंहस्तप्तस्यतत्प्रतिविधिःदुःखप्रतीकारःइहलोकेयो
ऽसावदृष्टःसत्स्यापेक्षितानामात्रवेदेवत्वदुपेक्षामात्रमेवनतन्त्वात्यंतिकःनवैवाह बालस्यापितरौशरणंरक्षकौविहनभवतः
ताभ्यांपाल्यमानस्यापितस्यदुःखदर्शनात् क्वचिदजीर्णतोदिदुःखताभ्यामेवतद्दर्शनाच्चनचार्तस्यरोगिणःअग
मौषधंशरणंक्वचित्पाषधेयेमृत्युदर्शनात् नचउदन्वतिसमुद्रेमज्जतः पुंसोनौःशरणंनयासहमज्जनदर्शनात् अतः
त्वमेवशरणमितिभावः अत्रचैवंकाकाव्याख्यायंतत्प्रतिविधिर्यइहदेहिनामव्यतिविधिर्यइहहन्तवत्प्रसिद्धः सन्नु
पेक्षितानांकिमंजसेष्टः अपितुनेष्टएवयस्तावदिहप्रतिविधिरिष्टःसचिरमंजसानैवांजसेत्यादियोज्यंबालस्येत्या
दिहपूर्ववदेवयोज्यं १९ नतुकेचित्तुनाश्चिंतेनचिंतनदाचित् कश्चिद्दैवैकोपिदृश्यतएवेत्याशंक्यातत्रापितद्रूपे
णत्वमेवरक्षकोऽन्यद्वारीकृतस्यतस्यैवसर्वात्मतामाह यस्मिन्निति परोवावरोवापरोऽवीनः पित्रादिःपरोब्रह्मादिर्वाभावःकर्तात

सोहंप्रियस्यसुहृदःपरदेवतायालीलाकथास्तवनृसिंहविरिंचगीताः अंजस्तितर्म्यनुगृणन्गुणवि
प्रमुक्तोदुर्गाणितेपदयुगालयहंससंगः १८ बालस्यनेहशरणंपितरौनृसिंहनार्तस्यचागदमुदन्वति
मज्जतोनौः तप्तस्यतत्प्रतिविधिर्यइहांजसेष्टः तावद्विभोतनुभृतांत्वदुपेक्षितानाम् १९ यस्मिन्यतो
यर्हियेनचयस्ययस्माद्यस्मैयथायदुतयस्त्वपरःपरोवा भावःकरोतिविकरोतिपृथक्स्वभावःसंचोदि
तस्तदखिलंभवतःस्वरूपं २० मायामनःसृजतिकर्ममयंबलीयःकालेनचोदितगुणानुमतेनपुंसः छंदो
मयंयदजयार्पितषोडशारंसंसारचक्रमजकोऽतितरेत्त्वदन्यः २१

त्कारकैर्यद्यत्करोतितत्सर्वंभवतएवस्वरूपंनतुपृथक् यस्मिन्निति अधिकरणायतोनिमित्तात् यर्हियस्मिन् कालेयेनकरणे
नयेनकर्त्रासंचोदितत्त्वयस्यसंबंधियस्मात् अपादानात् यस्मैसंप्रदानायतदीप्सिततमं यःकर्ताएवसमस्तविभक्
त्यर्थः तथायेनप्रकारेणेतिक्रियाविशेषणभूतानामव्ययानामर्थः पृथक्स्वभावःसत्वादिप्रकृतिःकरोतिउत्पाद
यतिविकरोतिरूपांतरंनयतीति २० अन्येनान्यस्यरक्षकस्याभावात् संसारित्वाच्चनित्यमुक्तस्त्वमेवमांशरणागतंरक्षे
तिप्रार्थयतेमायेतिद्वाभ्यां नरदेहस्यपुंसोनुमतेनेक्षणेनअनुग्रहेणमनःप्रधानंलिंगं मायासृजतिकथंभूता
कालेनचोदिताःगुणाःयस्याःकथंभूतंमनःकर्ममयंऊर्ध्वरूपंबलीयःदुर्जयंछंदोमयंवेदोक्तकर्मप्रधानंचतितरे
त् भोग्यजत्वदन्यः अजयाजीवस्याविद्ययानज्ञानगार्थअर्पिताःषोडशअराविकारायस्मिन् २१ ॥ ॥

यदेवंभूतं संसारचक्रात्मकं मनः तत्कालेनैव तेन भोग्यत्वम् अन्यः त्वत्तः पृथक् स्थितः त्वामभजन्नित्यर्थः २१ ननु ममापि मायासंबंधात् कर्तृत्वादि विशेषाभावात् तत्र को विशेष इत्यत आह स इति स्वधाम्ना चित्शक्त्या नित्यं विजितात्मगुणा येन सहितस्त्वं यतः कालः मायाशोधकः अत एव वशीकृता विसृज्यानां कार्याणां विसर्गे सापनानाशशक्तयो येन अतः इदं देहवत्निष्पीड्यमानं मां उपाकर्ष स्वसमीपं नय २२ ननु लोकपालानां भोगा न भुंक्ते पित्रे राज्यमिदं दास्यामि किमिति संसारदुःखं जसेन आह दृष्टा इति त्रिभिः श्रियः संपदः विभवः उद्भवः आयुरादयो दृष्टा इति का कथा नित्यं शक्तेन देवाह ये अस्मित्पितः कोपहासविकृत भ्रूभंगमात्रेण विध्वस्ताः स च त्वया निरस्तः २३ यस्मादेवं तस्मात् आशिषः भोगान् ज्ञः तत्परिपाकं च विद्वान् अहं मे इंद्रियं इंद्रियैर्भो

सत्त्वं हि नित्यविजितात्मगुणः स्वधाम्ना कालो वशीकृतविसृज्यविसर्गशक्तिः चक्रे विसृष्टमजयेश्वर षोडशारे निष्पीड्यमानमुपकर्ष विभो प्रपन्नं २२ दृष्टा मया दिवि विभोऽखिलधिष्ण्यपानामायुः श्रियो विभव इच्छति यान् जनोऽयं यस्मात्पितुः कुपितहासविजृम्भितभ्रूविस्फूर्जितेन लुलिताः स तु ते निरस्तः २३ तस्मादमूस्तनुभृतामहमाशिषोऽज्ञ आयुः श्रियं विभवमैंद्रियमाविरिंच्यात् नेच्छामि ते विलुलितानुरुविक्रमेण कालात्मनोपनय मां निजभृत्यपार्श्वं २४ कुत्राशिषः श्रुतिसुखा मृगतृष्णिरूपाः क्वेदं कलेवरमशेषरुजां विरोहः निर्विद्यते न तु जनो यदपीति विद्वान्कामानलं मधुलवैः शमयन्दुरापैः २५ क्वाहं रजःप्रभव ईश तमोऽधिकेऽस्मिन् जातः सुरेतरकुले क्व तवानुकं

पं अस्मत्तो भोगप्रदं भिन्नं आयुष्यादिकमपि तेन कामितेन कालात्मना उरुविक्रमेण विलुलितान् विध्वस्तान् अणिमादीनपि २४ किं च वर्तमानकालीनाः भोगाः तुच्छा इत्याह कुत्रेति श्रुतेः श्रवणे एव सुखं येषां ते तासां मृगतृष्णिकावन्मिथ्याभूताः वा आशिषः क्व अशेषाणां रुजां रोगाणां विरोहः उद्भवस्थानं कलेवरं पचेत् सर्वोऽपि जनः किं न विरज्यते तत्राह यद्यपि यदपि इति एवं विद्वानयं जनस्तथापि न निर्विद्यते विरक्तो न भवति ततः कामएवानलः तं मधुलवैः स्वल्पैः दुरापैः शमयन् कामाग्निशमनव्यग्रस्य निर्वेदावकाशो नास्तीत्यर्थः यद्वा अग्निं स्वमिव मन्यमानो विद्वान् दुरापैरपि कामैः शमयन्नपि न निर्विद्यते इति भावः २५ तर्हि त्वं कथं निर्विण्णोऽसि अत्र तु हे पिमपि प्रह्लादायात्मानमिवाह क्वेति रजःप्रभवः अस्य प्रभवो जन्म यस्य सः समस्तानां विशेषतां तमोऽधिके यस्मिन् तस्मिन् असुराणां कुले जातो हं कुत्र तवानुकंपा

५१

ब्रह्मादीनां शिरसि यो नैवार्पितः स एष त्वत्कमलसंतापहरः करः प्रसादः ७र्थ कार्थरूपो मि शिरस्यर्पित इति यत
यथानुरूपं पृच्छेति वा २६ न चैत्वयीदमिति वैषम्यमित्याह नैषेति एनेब्रह्मादय उन्नमा अयमस्मतो नीच इत्येषा परव
रमितिः जन्तोः प्राकृतस्य यथा न यथा भवतो नैव स्यात् अत्र हेतुः जगत आत्मनः सुहृदश्च तर्हि सर्वेषु समः प्रसादः प्
कःनूपस्थितिरत्राह संसेवया तव प्रसादो भवति न तु चेस्सेवानुरूपं न तु जातिकृतासारेणाधमादीनां उदयो भव
ति एवं सत्यपि वैषम्याभावे दृष्टान्तः सुरतरुर्यथा मेवक सेव संकल्पानुसारेण फलं ददाति न च विषमस्तद्वत् न च प
रावरत्वमव्यकारणमिति शेषः २७ यतस्त्वत्कृतमहाकृपया मया प्राप्तमिति तत्कृतोपकारमेव मानयेत्याशयेनाह एवं
मिति विषयान्वयात्त्वं पतितोस्मि पतनं नारदेनात्मसात्कृत्वा पूर्वमनुगृहीतः सोहं कथं नु त्वज्जनसेवां विसृजामि कथंभूतो

नैषा परावरमतिर्भवतो ननु स्याज्जन्तोर्यथात्मसुहृदो जगतस्तथापि संसेवया सुरतरोरिव ते प्रसादः
सेवानुरूपमुदयो न परावरत्वं २७ एवं जनं निपतितं प्रभवाहिकूपे कामाभिकाममनु यः प्रपतन् प्र
संगात् कृत्वात्मसात्सुरर्षिणा भगवन्गृहीतः सोहं कथं नु विसृजे तव भृत्यसेवाम् २८ मत्प्राण
रक्षणमनन्त पितुर्वधश्च मन्ये स्वभृत्यऋषिवाक्यमृतं विधातुं खड्गं प्रगृह्य यदवोचदसद्विधि
त्सुः त्वामीश्वरो मदपरोवतु कं हरामि २९

अनुगृहीतोस्मि प्रभव एवाहिकूपः कूपः तस्मिन् कामानभितः कामयमानं जनं निपतितमनु तत्प्रसंगात्प्रप
तन्नहं नदेवेन त्वद्भक्तश्रीनारदस्यानुग्रहेण त्वया स्वात्मसात्कृतोस्मि अयमेव च मम परमोनुग्रहः कथं नु
विसृजामीति नृकमत्प्राणरक्षणं २८ न चेदं त्वया मदनुग्रहार्थं कृतं किं त्वन्यार्थमित्याह भो अनन्त यदेतत्प्रा
णरक्षणं माहं तद्वधत्स्वमनुपितुर्वध उभयं स्वभृत्यऋषिवाक्यमृतं विधातुमित्यहं मन्ये कुतः यद्यस्मात्
असत् अत्युग्रंविधित्सुः खड्गं प्रगृह्यावोचत् किं मदपरो मद्व्यतिरिक्तः ईश्वरोस्ति नहि त्वामिदानीमवतु त
व कं शिरो हं हरामीति पाठान्तरे पाय मेवार्थः यद्यदावोचत् तदा मत्प्राणरक्षणमिति वान्वयः एतच्च सर्वं वि
धानं निजभृत्यभाषितमित्यत्र चैवं व्याख्यातं २९ ॥

नवेदंपदृश्यानेनरदृशांदेत्पहृननेचत्वयिस्वाभाविकं किंत्वमायानेगुणोपाधिकंसत्सर्वात्मकेत्वयिस्वतःनद्दयो
गादित्याह एकइतिएतज्जगत् त्वमेवैकः यद्यतः अमुष्याद्यावंतेचपृथगवस्यसिविरामंकरोपिसन्मात्रतया
कारणत्वेनावधित्वेनचवर्तसेइत्यर्थः अनेनमध्यतस्त्वमेवकुतः नहिभेदप्रतीतिरतआह निजमाययागुणव्यति
करात्मकमिदंजगत्सृष्ट्वानदनुप्रविष्टःत्वंतैर्गुणैः देवतिर्यङ्मनीनेवरस्त्वकइवहृनेवचसूवासितःप्रतीतः नद्वत्
स्वयोपकर्मनिर्गुणोपिह्यजोव्यक्तोभगवान्प्रहाने: परःस्वमायागुणमाविद्यावाध्यबाधकतामागइत्यादि २९
नत्ववदेयतज्जगदहमेवतर्हिजगतोवैषम्येणममवैषम्यमपिकिंनस्यादित्यतआह त्वैवैत्वमेवइदंसदसत् कार्य
कारणात्मकंजगत् नतुत्वत्तःपृथक्भवांस्ततोन्यः आद्यन्तयोःपृथगवस्थानात् यद्यस्मादेवमतोमयात्मी
योयंपरइतियाबुद्धिः साअपार्थामायैवकार्यकारणभेदंदृष्टांतेनसाधयति यद्यतःयस्यजन्मईक्षणंप्रकाशश्च
यस्मिन्निधनेस्थितिश्चतद्वैतदेवअष्टिबीजंकारणंतरुःकार्यंतयोर्यथावस्तुकालमात्रेत्वं अयमर्थःकारणस्याद्य

एकस्त्वमेवजगदेतदमुष्ययत्त्वमाद्यन्तयोःपृथगवस्यसिमध्यतश्च सृष्ट्वागुणव्यतिकरंनिजमाय
येदंनानेवतैरवसितस्तदनुप्रविष्टः ३० त्वेवाइदंसदसदीशभवांस्ततोन्योमायायदात्मपरबुद्धिरियं
ह्यपार्था यद्यस्यजन्मनिधनस्थितिरीक्षणंचतद्वैतदेववसुकालवदष्टितर्वोः ३१ न्यस्येदमात्मनि
जगज्जगद्विलयाम्बुमध्येशेषात्मनानिजसुखानुभवोनिरीहः योगेनमीलितदृगात्मनिपीतनिद्रः
तुर्येस्थितोनतुतमोनगुणांश्चयुंक्षे ३२

वनीलत्वात्साधारणगुणयोगात्पृथ्वीवस्तुदेवेनवस्तुमात्रेअजत्सृष्टेनतत्रतरोर्यथापृथ्वीमयबीजमात्रत्वेनस्यच
यथाभूतस्तुसमात्रत्वेएवंसर्वमपिकार्यंकारणात्मकंजगत् परमकारणात्मकमेवेतितथाचपारमर्षंसूत्रंतदनन्य
त्वमारंभणशब्दादिभ्यइतिश्रुतिश्चवाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यमितिति ३१ नत्वनावदेतेपृथगा
वस्थानंदर्शयति न्यस्येतिइदंजगत् आत्मनाआत्मनेवात्मनिनिक्षिप्यसत्वमेवानुभवन्निष्क्रियःसन्प्रलयोदक
मध्येशयनंकरोषिनर्हिकिंजीववस्यैवममापितमोहत्तिरूपानिद्रास्तिनहिनहियोगएवतत्रबाह्यहिनिभावस्यानि
द्रोचानइत्याह योगेनमीलितेदृशौयेन आत्मनास्वरूपप्रकाशेननिपीतानिद्रायेनयस्तुर्येअवस्थानुयानिरि
तेस्वरूपस्थितस्त्वंनतुतमसइवात्मनानमोयुंक्षेयोजयसिनपश्यसिनजागत्स्वप्नयोरिवगुणानविषयानचेत्यर्थः

इदानीं कारणत्वेदाने दैवि पि दृष्यनवस्थानं दर्शयन्म जातस्त्वमेवेत्येतत्प्रपंचयति चतुर्भिः यत्त्वमशेषः शेष
शीर्षे तस्यैव ते इदं जगत् वपुः स्वरूपं नान्यस्य यतस्त्वमध्यनोपि स्माः कथंभूतस्य निजया कालशक्त्या संचोदिताः
प्रकृतेर्धर्माः सत्त्वादयो येन स्वरूपत्वे हेतुः तं ततः शयनात् शेषपर्यंकात् विरमत्समाधिर्यस्य तस्य तव नाभेः स
काशादेकार्णवे दकेमहाब्जं लोकपद्मं अभूत् कथंभूते आत्मनि तत्वयावगूढं सत् स्वकणिकातः सूक्ष्माद्वटबी
जान्महावटद्रव यद्वत् तद्वत्कारणत्वेना जगतः सतत्मथ्यस्तत्वमेव वर्तसहत्यर्थः ३३ एतदेव वपुः स्वस्य च स्वबुद्ध्या
नुभवेन स्फुरयितुं तस्य जन्मलीनेत्र वपुष्यनाविंदत् पुनश्चेतनत्वस्याभावाह तस्मिन् निरसंभवो यस्य सः कविर्ब्रह्मा
अतः पद्मादन्यदपश्यन् बीजमुपादानकारणं च ततं व्याप्तं स्वस्मिन् व्यापिसंतमपिनाविंदत् पुनश्चेतनत् उदकं अंतः

तस्यैव ते वपुरिदं निजकालशक्त्यासंचोदितप्रकृतिधर्मणआत्मगूढं अंभस्यनंतशयनाद्विरमत्स
माधेर्नाभेरभूत्स्वकणिकावटवन्महाब्जं ३३ तत्संभवःकविरतोन्यदपश्यमानःत्वां बीजमात्मनितत
तं स्वबहिर्विचिंत्य नाविंददब्दशतमप्सुनिमज्जमानोजातेंकुरेकथमुहोपलभेत बीजं ३४ सत्वात्म
योनिरतिविस्मितआश्रितोब्जंकालेनतीव्रतपसापरिशुद्धभावः त्वामात्मनीशभुविगंधमिवाति
सूक्ष्मं भूतेंद्रियाशयमये विततं ददर्श ३५ एवंसहस्रवदनांघ्रिशिरःकरोरुनासास्यकर्णनयना
भरणायुधाढ्यं मायामयंसदुपलक्षितसन्निवेशंदृष्ट्वामहापुरुषमापमुदं विरिंचः ३६ तस्मै भ
वान्हयशिरस्तनुवं च बिभ्रद्वेदद्रुहावतिबलौमधुकैटभाख्यौ हत्वानयच्छ्रुतिगणांश्चरजस्तमश्च
सत्वं तव प्रियतमां तनुमामनंति ३७ ॥ ॥

ऽङ्कुरे जाते सति बीजे तत्र दृश्यं तत्कारणं पृथक् कथं नाम उपलभेतेत्यर्थः ३४ भवदुपासनं तत्या तस्मिन्नेव दृष्ट
वानित्याह स त्विति परा हत्या आश्रितः सन् तीव्रेण तपसा ध्यानेन संमार्जनेऽपि गुणोपादानत्वाद्दर्शनं सूक्ष्मं
३५ ईश्वरत्वेन दृष्टवानित्याह एवमनेन प्रकारेण सहस्रमयं परिमितानि यानि वदनादीनि तैराढ्यं
मायामयं माया प्रधाने सत्ताश्रयं च तेनोपलक्षितः सन्निवेशः पादादिरचना यस्य ३६ तदा भवांस्तस्यानु
ग्रहं कृतवानित्याह तस्मा इति हयग्रीवमूर्तिं बिभ्रत्सन् रजस्तमो रूपौ मधुकैटभाख्यौ हत्वा तस्मै श्रुतिगणान्
समर्पितवान् तत्र हेतुः सत्त्वमिति ३७ ॥

एकः त्वमेवेत्यादिभिरिहाभिहितैर्वैर्यदुक्तं पतापानेन रद्वणां न हि पदवच्च सन्तोषाधिकेन न स्वत इति तदुपसंह
रति विभावयसि पालयसि हंसि चानयसि कलौ त्वं न प्रकटोऽपि यतः न दास्यच्छन्नोऽभवः यतः त्रिषु युगेष्वावि
र्भावात् स एव त्रियुग इति प्रसिद्धः ३८ न चैवं भगवतः न त्वं निरूपणस्य चैव न हि चारायोग्यत्वात् तां निर्वेदयन्ना
र्थयन्नेनैतदिति त्रिभिः असाधु बहिर्मुखं तीव्रं दुर्दमं हर्षशोकभयैरेषणाश्चैनणावा चार्त्तः खिन्नमपि त्वत्कथा
स्वनं संप्रीयते न तस्मिन्नेवंभूते मनसि अनुसंसरति कथं तव गतिं विचारयामि ३९ किंच जिह्वा अवितृप्ता सती भोज्यं अच्युत मा
मां अन्यतो मधुरादिरसं प्रत्याकर्षति उदरं त्वन्यथा सततं प्रत्यपवयति किंचिदाहारमामामं शनिपचुलाटचूवद्वः
कर्मशक्तिः कर्मेंद्रियाणि लुनंति त्रोटयंति ४० न केवलमहमेव एवं कष्टदशामयं किं तु महाजनोऽप्येवं इत्याह एव
मिति अतः सर्वं जनं नेन पालयति प्रार्थयते एवमितिभवः संसार एव वैतरणी यमनदी तस्यां अन्योन्यतो यानि जन्मादी

इत्थं नृतिर्यगृषिदेवझषावतारैर्लोकान् विभावयसि हंसि जगत्प्रतीपान् धर्मं महापुरुष पासि युगानु
वृत्तं छन्नः कलौ यदभवस्त्रियुगोऽथ स त्वं ३८ नैतन्मनस्तव कथासु विकुंठनाथ संप्रीयते दुरितदुष्टमसा
धु तीव्रं कामातुरं हर्षशोकभयैषणार्त्तं तस्मिन्कथं तव गतिं विमृशामि दीनः ३९ जिह्वैकतोऽच्यु
त विकर्षति मावितृप्ता शिश्नोऽन्यतस्त्वगुदरं श्रवणं कुतश्चित् घ्राणोऽन्यतश्चपलदृक् क्व च कर्म
शक्तिर्बह्व्यः सपत्न्य इव गेहपतिं लुनंति ४० एवं स्वकर्मपतितं भववैतरण्यामन्योन्यजन्ममर
णाशनभीतभीतं पश्यञ्जनं स्वपरविग्रहवैरमैत्रं हंतेति पारि-- पीपृहि मूढमद्य ४१ को न्वत्र
तेऽखिलगुरो भगवन् प्रयास उत्तारणेऽस्य भवसंभवलोपहेतोः मूढेषु वै महदनुग्रह आर्तबंधो किं तेन ते

निन्येभ्यो अतिभीतं स्वपरयोर्विग्रहे वैरं मैत्रं च यस्य एवंभूतं जनं पश्यन् त्वं हे पारचर नद्याः पारे स्थित
नित्यमुक्त हंत इति अनुकंपायां समित्येवं मत्कं पायय पीपृहि वैतरणीमुत्तारय पालय ४१ एकेन मया कथं सर्वो जनस्तार
णीय इति चेन्नाह को न्विति कोऽत्र ते अत्र सर्वजनोत्तारणे प्रयासः न कोऽपि यतः अस्य विश्वस्य भवसंभवलो
पानां उत्पत्तिस्थितिसंहाराणां हेतोः किमेतत् इत्यर्थमिति भावः उचितं चैतदित्याह मूढेष्विति त्वादृशानां दीया
श्चेन्नाराधयामि इत्यत्र तत्राह संधार्य इति चेन्न तत्राह न वयमिति प्रियजनाः भक्तास्तान् ये सेवमाना नानासाकंतेन

उत्तारणेन किं कोतिशयासोस्त्वेवालकाहरेः कोन्वत्रतेखिलगुरो भगवन्प्रयासः उद्धारेदस्य गुणमेअ्यास्थितो नाशणामी।
श्रोनसत्त्वमकरोद्दपनीयमायां ४२ तत्सपत्स्यादहंत्वंतानावज्ञारविद्यामितानवतेवक्तनार्थस्याः किमनेननिर्बंधेनेत्या
नत्राह नैवेति हे परस्वत्वीत्रमत्वद्वीर्यगायनमेवमहामृतेनतस्मिन्मग्नचित्तस्य सोऽहं भववैतरण्याः नैवोद्विजे किंतु
विमूढान् शोचामितानेवाह ततोमहामृतादिमुखं वेत्तोयेषां तन्नं इंद्रियार्थनिमित्तंयन्मायासुखं तेनहर्षेभरंकुटुं
बादिभारमुद्वहतः ४३ तेनावेशुर्किं गृह्णातोसस्त्वनतस्वात्मनयेउपदेक्ष्यसीतिवेत्तत्राह प्रायेणेतिविमुक्तिविम
त्तिनेच्छामितर्हिलोकमपिप्रार्थयमानमेवकिमितिनिर्विण्णासीतिवेत्तत्राह तन्नान्यमस्यजनस्य शरणं नपश्यामि ४४

नैवोद्विजे परदुरत्ययवैतरण्यास्त्वद्वीर्यगायनमहामृतमग्नचित्तः शोचे ततो विमुखचेतस इंद्रियार्थ
मायासुखाय भरमुद्वहतो विमूढान् ४३ प्रायेण देव मुनयः स्वविमुक्तिकामा मौनं चरंति विजने न परा
र्थनिष्ठाः नैतान्विहाय कृपणान्विमुमुक्ष एको नान्यं त्वदस्य शरणं भ्रमतोऽनुपश्ये ४४ यन्मैथुनादिगृ
हमेधिसुखं हि तुच्छं कंडूयनेन करयोरिव दुःखदुःखं तृप्यंति नेह कृपणा बहुदुःखभाजः कंडूतिव
न्मनसिजं विषहेत धीरः ४५ मौनव्रतश्रुततपोध्ययनस्वधर्मव्याख्यारहोजपसमाधय आपवर्ग्याः प्रा
यः परं पुरुष ते त्वजितेंद्रियाणां वार्ता भवंत्युत न वात्र तु दांभिकानां ४६

ननु तेऽपि स्त्रीसंभोगादिना सुखिन एव न कृपणा इत्यत आह यदिति करयोः कंडूयनेन संघर्षणेनोत्तरदुःखमनुदुःखं यस्मिन्
तद्धि दुःखं त्वत्वादेवततोनिर्विद्यमुच्येरन् तत्राह कृपणाः बहुदुःखभाजोपि इह गृहमेधिसुखेन तृप्यंति अलमिति न
मन्यंते कंडूतिवत्तामस्य दुःसहत्वात् ननु केचित्कंडूतिमपि सहंते कामं चेत्यत आह तत्प्रसादात्कश्चिद्धीर एवमम
नसिजं कामं विषहेत न तु सर्वः अत्रापि कंडूतिवदिति दृष्टांतः ४५ ननु मौनादिभिर्मोक्षसाधनैः सुलभैर्वत्तेषामपिमु
क्तिः तत्राह मौनेति हे पुरुष ते त्वत्पर्यास्मिन् यो मौनादयो दश अपवर्ग्याः अपवर्गहेतवः प्रसिद्धाः रहः विविक्तवासः
तेतु प्रायशः अजितेंद्रियाणां इंद्रियभोगाय अर्थार्थी विक्रीणतोवार्ताः जीवनोपाया भवंतीति दांभिकानां वात्रापि
भवंतिवा नवा दंभस्यानियतफलत्वात् ४६ ॥ ॥ ॥

ननुज्ञानंनभक्तिंविनासकामैर्मौनादिभिर्नभवत्येवेत्याह रूपेइतित्रिभिः बीजांकुराविवप्रवाहापन्नेइमेसदसा
दसतीकार्यकारणेएवतेतवरूपेउपलक्षणभूतेवेदेनस्पष्टप्रकाशितेनचान्यत् स्वसमवेतंगौरत्वादिकमिवदेवद
त्तादेः कुतः अरूपकस्यप्राकृतरूपादिशून्यस्यअतः युक्तासंयुक्ताएवभक्तियोगेनप्रसन्नंत्वामुभयत्रकार्यकारणे
चानुगतंपश्यन्तिमथनेनदारुषुवह्निमिवनान्यतः स्यात् ज्ञानमितिशेषः यद्वाज्ञानप्रकारमेवाह एतदुभया
न्यतः प्रधानपरमाण्वादेर्नस्वार्थमपेक्षतेत्यादिश्रुतेः अतस्त्वमेवकारणत्वात्सर्वंजगत्स्थूलमिति ४७ तदेवाहु
रितिहृदयंमनःचित् चित्तंअनुग्रहः अहंकारः देवतावर्गोवासगुणःस्थूलः विगुणःसूक्ष्मः मनवचसामनोव
चः तेननिरुक्तंप्रकाशितंकिमपित्वत्तोन्यन्नास्ति ४८ अभक्तास्त्वसिद्धेरनुगतमपित्वांनजानंतीत्याह नैतेइति नैतेगु

रूपेइमेसदसतीतववेदसृष्टेबीजांकुराविवनचान्यदरूपकस्य युक्ताःसमक्षमुभयत्रविचिन्वतेत्वां
योगेनवह्निमिवदारुषुनान्यतःस्यात् ४७ त्वंवायुरग्निरवनिर्वियदंबुमात्राःप्राणेंद्रियाणिहृदयंचिदनु
ग्रहश्च सर्वंत्वमेवसगुणोविगुणश्चभूमन्नान्यःत्वदस्त्यपिमनोवचसानिरुक्तं ४८ नैतेगुणानगुणि
नोमहदादयोयेसर्वेमनःप्रभृतयःसहदेवमर्त्याः आद्यंतवंतउरुगायविदंतिहित्वामेवंविमृश्यसुधि
योविरमंतिशब्दात् ४९ तत्तेर्हत्तमनमःस्तुतिकर्मपूजाःकर्मस्मृतिश्चरणयोःश्रवणंकथायां संसे
वयात्वयिविनेतिषडंगयाकिंभक्तिंजनःपरमहंसगतौलभेत ५०

णगुणाभिमानिनोदेवाः आद्यंतवंतः जडोपाधित्वात् अनाद्यंतंनिरुपाधिंत्वांनविदंतिहियस्मात् सुधियोविद्वांसः
एवंविचार्यशब्दात् अध्ययनादिव्यापारादुपरमंतित्वामेवसमाधिनोपासतइत्यर्थः तथाचश्रुतिः किमर्थावयमध्
येष्यामहेकिमर्थंवयंयक्ष्यामहइति नानुध्यायेद्बहूञ्छब्दान्वाचोविग्लापनंहितदितिचस्मृतिश्च यदातेमोहकलि
लंबुद्धिर्व्यतितरिष्यति तदागंतासिनिर्वेदंश्रोतव्यस्यश्रुतस्यचेत्यादि ४९ उपसंहरतितदिति हेअर्हत्तमनमःस्तुति
कर्मपूजाः प्रणामस्तुतिसर्वकर्मार्पणानिकर्मपरिचर्याचरणयोः स्मृतिश्चकथायांश्रवणंचेत्येवंषडंगयासम्य
क् सेवयाविनापरमहंसानांगतौप्राप्यत्वयिजनः कथंभक्तिंलभेत यस्मादेवंभक्तिंविनानमोक्षोनचभक्तिः संसेव
याविनापरमहंसानांदास्ययोगमेवदेहीतिप्रकारणार्थः ५० ॥ ॥

श्री॰ भा॰ स॰ टी॰ २८

एतावद्वर्णितगुण इत्यस्य यतमन्युः उपसंहृतकोपः ५१ कामान्पूरयतीति तथा यद्वा पुरुषार्थप्रवाहोऽस्मीत्यर्थः
५२ अप्रीणतः अप्रीणयतः नमस्कुर्वतः कामसेवनेन शोचितं ५३ प्रीणंति तोषयंति ५४ एकांतित्वात् निरुपाधिक
भक्तत्वात् ५५ इति श्रीभावार्थदीपिकायां सप्तमस्कंधे नवमोऽध्यायः ९ दशमे त्वनुगृह्याथ भक्तिमेनं हरिर्हरो प्र
संगाद्धिरण्यकशिपोरनुग्रहमीरयेत् तत्सर्ववरजातं १ कथमेवं भृत्यलक्षणज्ञानं स्यात् तत्राह यइति त्वत्तः नत्वो

नारद उवाच एतावद्वर्णितगुणो भक्त्या भक्तेन निर्गुणः प्रह्लादं प्रणतं प्रीतो यतमन्युरभाषत ५१ श्री
भगवानुवाच प्रह्लाद भद्र भद्रं ते प्रीतोऽहं तेऽसुरोत्तम वरं वृणीष्वाभिमतं कामपूरोऽस्म्यहं नृणाम् ५२ मा
मप्रीणत आयुष्मन्दर्शनं दुर्लभं हि मे दृष्ट्वा मां न पुनर्जंतुरात्मानं तप्तुमर्हति ५३ प्रीणंति ह्यथ मां धीराः
सर्वभावेन साधवः श्रेयस्कामा महाभागाः सर्वासामाशिषां पतिं ५४ एवं प्रलोभ्यमानोऽपि वरैर्लोक
प्रलोभनैः एकांतित्वाद्भगवति नैच्छत्तानसुरोत्तमः ५५ इति श्रीभागवते सप्तमस्कंधे नवमोऽध्यायः
९ नारद उवाच भक्तियोगस्य तत्सर्वमंतरायतयार्भकः मन्यमानो हृषीकेशं स्मयमान उवाच ह १
प्रह्लाद उवाच मा मां प्रलोभयोत्पत्त्यासक्तं कामेषु तैर्वरैः तत्संगभीतो निर्विण्णो मुमुक्षुस्त्वामुपाश्रितः
२ भृत्यलक्षणजिज्ञासुर्भक्तं कामेष्वचोदयत् भवान्संसारबीजेषु हृदयग्रंथिषु प्रभुः नान्यथा तेऽखि
लगुरो घटेत करुणात्मनः यस्त आशिष आशास्ते न स भृत्यः स वै वणिक् ४ अहं त्वकामस्त्वद्भक्तः
त्वं च स्वाम्यनपाश्रयः नान्यथेहावयोरर्थो राजसेवकयोरिव ५ ॥

उत्पत्त्या स्वभावेनैवासक्तं मां तेषां कामानां संगाद्भीतः २ ननु किमहं भक्तं प्रलोभयामि नहि किं त्वं वरं वृणीष्वेति वदता
त्वयाभिप्रायोऽन्य एवेत्याह भृत्यलक्षणेति हृदयग्रंथिषु बंधकेषु अन्यथा अनर्थसाधने प्रवर्तनं न घटेतेत्यर्थः ३
कथमेवं भृत्यलक्षणज्ञानं स्यात् तत्राह यइति त्वत्तः नतु कामनयापि सेव्यसेवकयोः स्वामिभृत्यभावः प्रसि
द्धः सत्यं सोऽपि विक्रेतृक्रेतृतादिक इत्याह स्वामिन्यात्मनः आशिषो य आशासानो नैव भृत्यः भृत्यहेतुकमात्मनः
स्वाम्यमिच्छन् यो भृत्याय ददाति स चैव स्वामी ५ आवयोस्तु नादृक्संबंध इत्याह अहं त्विति अनपाश्रयो निरा
भिसंधिः अन्यथा कामाद्यभिसंधिना अर्थः प्रयोजनं नास्ति ५ ॥ ॥ ॥

रामः
२८

नत्वन्यथापि परमोदारस्य मम किमपि तोषार्थं वृणीष्वेति वदन्तमाह यदीति कामानां हृदि असंरोहं अनुत्पत्तिं भवतः
सकाशात् ७ ननु कामा नष्टाः सत्यं को दोषस्तत्राह इन्द्रियादीनि यस्य जन्मना नश्यन्तीति आन्तरहेतुः कामा भवेयुर
एतमाह विमुञ्चतीति भगवत्त्वाय तत्समानैश्वर्याय तथा च श्रुतिः यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः अथ म
र्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति ९ निर्दोषान् कामान् दातुमिच्छन्तं प्रत्याशास्यत्रमस्यति ॐ नम इति १० एवमेका
न्तभक्तस्त्वं तथापि महाशाकारणीयाऽस्त्याह नेति मे एकान्तिनः कदाचिदपि इहामुत्र च मत्त आशिषो न वाञ्छन्त्येव तथा
पि तेन त्वं मन्वन्तरमात्रं भोगान् भुंक्ष्व ११ ननु तर्हि बन्धः स्यादित्यत आह कथा इति हे भवान् सर्वेषु भूतेषु सन्तमेकमीशं यज्ञाधि
ष्ठातारं मामात्मन्यावेश्य यजस्व नहि प्रीतेनैव कर्मणा बन्धः स्यात् तेनाह योगेन मय्यर्पणेन कर्म हिन्वन् त्यजन् यज

यदि रासीश मे कामान् वरांस्त्वं वरदर्षभ कामानां हृद्यसंरोहं भवतस्तु वृणे वरं ७ इन्द्रियाणि मनः प्राण
आत्मा धर्मो धृतिर्मतिः ह्रीः श्रीः तेजः स्मृतिः सत्यं यस्य नश्यन्ति जन्मना ८ विमुञ्चति यदा कामान् मानवो
मनसि स्थितान् तर्ह्येव पुण्डरीकाक्ष भगवत्त्वाय कल्पते ९ ॐ नमो भगवते तुभ्यं पुरुषाय महात्मने ह
रयेऽद्भुतसिंहाय ब्रह्मणे परमात्मने १० नृसिंह उवाच नैकान्तिनो मे मयि जात्विहाशिष आशासतेऽमु
त्र च ये भवद्विधाः अथापि मन्वन्तरमेतदत्र दैत्येश्वराणामनुभुंक्ष्व भोगान् ११ कथा मदीया जुषमाणः
प्रियास्त्वमावेश्य मामात्मनि सन्तमेकं सर्वेषु भूतेष्वधियज्ञमीशं यजस्व योगेन च कर्म हिन्वन् १२ भोगेन पु
ण्यं कुशलेन पापं कलेवरं कालजवेन हित्वा कीर्तिं विशुद्धां सुरलोकगीतां वितायमामेष्यसि मुक्तबन्धः
१३ य एतत्कीर्तयेन्मह्यं त्वया गीतमिदं नरः त्वां च मां च स्मरन् काले कर्मबन्धात् प्रमुच्यते १४ प्रह्लाद

स्व किं च भोगेन सुखानुभवेन मा रक्षं पुण्यं हित्वा मुक्तबन्धः सन् लोकानुग्रहार्थं कीर्तिं च वितत्य मां प्राप्स्यसि कुशले
न पुण्याचरणेन पापं हित्वेति विभीषामात्रं अन्यथा तस्य राज्यप्रहृतेः ननु तस्य प्राचीनं पापमस्ति न हि अधिगमे उत्तरपूर्वयो
रघयोरश्लेषविनाशौ भवतः तदव्यपदेशादिति न्यायात् तत् स्वहृतत्वात् तेन विधूतत्वात् इति सूत्रेषु न चेदं प्रारब्धपापाभि
प्रायं तस्य भोगेनैव कर्महानिमिति वचनानुपपत्तेः न चासावविद्वानिति वाच्यं भगवतैव तत्त्वानर्थ्यतस्यानन्तरेवक्ष्यमाण
त्वात् अत एव योगेन कर्म हिन्वन्निती इदपि लोकसंग्रहार्थं कर्माणि प्रवर्तितस्यानुद्वेगमात्रायतिः सर्वमनवद्यं १३ किं च य
इति त्वां च मां च हृदि स्मरन्नेव स्मरन् यत् त्वत्स्तोत्रं यः कीर्तयेत् सोऽपि कर्मबन्धाद्विमुच्यते जनः तत्र बन्धशब्दे त्वर्थः १४
ईश्वराज्ञां प्राप्य कर्माधिकारः सन् पितुर्निष्कृतिं प्रार्थयते त्रिभिः वरं वरणीयमेतत् परं ब्रह्मणे नत्वम् १४ ॥ ॥

श्री०
भा० स०
टी०
२८

विद्धामर्षाशय क्रोधेन विद्ध आशयो यस्य १५ तेऽपाङ्गेन संदृष्टः पूतः पूत एव तथापि विभोः कृपणवत्सल कार्पण्येन प्रार्थये इत्य
र्थः १६ यद्यपि त्वद्दृष्ट्या मोक्षो विश्वस्यापि तिनत्रिः सप्तपूर्वजाः तथापि त्रिःसप्तभिः सह तेनेति प्राकृ कल्पमतिपद्याभि
प्रायेणोक्तं १७ यद्यस्मात्समदृष्टमनसा ब्रह्मभावा ये येषां तेऽपि कीकटा अपि देशाः तत्र त्वादृशा पूयन्ते ते पूता भवन्ति १८ ननु
त्वद्भक्तानामयं महिमा तिनच्चिन्त्य हन्त नाहं शोन भवामीति चेत् तत्राह सर्वात्मनेति द्वाभ्यां मद्भावेन मद्भक्त्या विगतास्पृ
हा येषां १९ त्वामनुव्रतानां किं चित्स्पृहाः तेऽप्येवं लक्षणाः संतो मद्भक्ता भवन्ति यतो भवान् मे भक्तानां सर्वेषां प्रतिरूप

विद्धामर्षाशयः साक्षात्सर्वलोकगुरुं प्रभुं भ्रातृहेति मृषादृष्टिः त्वद्भक्ते मयि चाघवान् १५ तस्मात्पिता मे पूये
त दुरन्ताद् दुस्तरादघात् पूतस्तेऽपाङ्गसंदृष्टः तदा कृपणवत्सल १६ श्रीभगवानुवाच त्रिःसप्तभिः पिता पूतः
पितृभिः सह तेऽनघ यत्साधोऽस्य कुले जातो भवान्वै कुलपावनः १७ यत्र यत्र च मद्भक्ताः प्रशान्ताः समदर्शि
नः साधवः समुदाचाराः ते पूयन्तेऽपि कीकटाः १८ सर्वात्मना न हिंसन्ति भूतग्रामेषु किंचन उच्चावचेषु
दैत्येन्द्र मद्भावेन गतस्पृहाः १९ भवन्ति पुरुषा लोके मद्भक्ताः त्वामनुव्रताः भवान्मे खलु भक्तानां सर्वेषां
प्रतिरूपधृक् २० कुरु त्वं प्रेतकार्याणि पितुः पूतस्य सर्वशः मदङ्गस्पर्शनेनाङ्ग लोकान्यास्यति सुप्रजाः
२१ पित्र्यं च स्थानमातिष्ठ यथोक्तं ब्रह्मवादिभिः मय्यावेश्य मनस्तात कुरु कर्माणि मत्परः २२ नारद उवा
च प्रह्लादोऽपि तथा चक्रे पितुर्यत्सांपरायिकं यथाह भगवान्राजन्नभिषिक्तो द्विजोत्तमैः २३ प्रसादसु
मुखं दृष्ट्वा ब्रह्मा नरहरिं हरिं स्तुत्वा वाग्भिः पवित्राभिः प्राह देवादिभिर्वृतः २४ ब्रह्मोवाच देवदेवा
खिलाध्यक्ष भूतभावन पूर्वज दिष्ट्या ते निहतः पापो लोकसंतापनोऽसुरः २५ योऽसौ लब्धवरो मत्तो न वध्यो
मम सृष्टिभिः तपोयोगबलोन्नद्धः समस्तनिगमानहन् २६ दिष्ट्या तत्तनयः साधुर्महाभागवतोऽर्भकः
त्वया विमोचितो मृत्योर्दिष्ट्या त्वां समितोऽधुना २७ एतद्वपुस्ते भगवन्ध्यायतः प्रयतात्मनः सर्वतो गोप्तृ संत्रा
सान्मृत्योरपि जिघांसतः २८ श्रीनृसिंह उवाच मैवं विभोऽसुराणां ते प्रदेयः पद्मसंभव वरः क्रूरनिसर्गाणा

धृक् उपमानभूतः श्रेष्ठः खल्वित्यर्थः २० मदङ्गस्पर्शनेन सर्वशः पूतस्येतोऽपि नः पापशंकैव नास्ति केवलं सुप्रजा
त्वेनैव कार्याणि कुरु तात २१ वेदवादिभिरुक्तं मम मतिं च मत्परः सत्कर्माणि कुरु २२ सांपरायिकं मरणोत्तरकार्यं निर्मा
यास्तैः श्रुतैः समस्तानिगमान् धर्मानित्यर्थः अहन् हतवान् सत्यापहतः २६ एतद्दिष्ट्या समितः सम्यक्प्राप्तः
२७ सर्वतः संत्रासात् गोप्तृ रक्षकं एवं रमन्त्यानप्रदेयः क्रूरो निसर्गः स्वभावो येषां मन्ये तदीरे २८ ॥ ॥

रामः
२८

शिशुपालदंतवक्रयोर्द्विषतोः श्रीकृष्णे सायुज्यं कथमिति यत्पृष्टं तत्र देवनयोः पूर्वजन्मकथनादिभिरुपपादितमुपसं
हरति एवमिति सप्तभिः ३३ दितेः पुत्रत्वं प्रापितौ विप्रशापेन तौ राक्षसौ बभूवतुः ३४ ३५ तच्चित्तौ श्रीरामे चित्तं ययोस्तौ ३६
करूषजो दंतवक्रः हरौ सायुज्यं समीयतुः ३७ कृष्णनिंदादि दिना पूर्वकृतं यत् एनः पापं तत् ध्यानेन तदात्मानः संतो जहुः
हुः तदात्मत्वे दृष्टांतः कीटः पेशस्कृतो ध्यानेन यदा तदात्मा भवतीति ३८ अभिदा भेददर्शनशून्यया ३९ हरेः सात्म्यं
सारूप्यं ४० प्रह्लादचरितार्थमुपसंहरति एषेति चतुर्भिः अवतारः श्रीनृसिंहरूपः तस्य कथा आख्याने तिशेषः ४१

ततः संपूज्य शिरसा ववंदे परमेष्ठिनं भवं प्रजापतीं देवान् प्रह्लादो भगवत्कलाः ३१ ततः काव्यादि
भिः सार्द्धं मुनिभिः कमलासनः दैत्यानां दानवानां च प्रह्लादमकरोत्पतिं ३२ प्रतिनंद्य ततो देवाः प्रयुज्य
परमाशिषः स्वधामानि ययू राजन् ब्रह्माद्याः प्रतिपूजिताः ३३ एवं तौ पार्षदौ विष्णोः पुत्रत्वं प्रापितौ
दितेः हृदि स्थितेन हरिणा वैरभावेन तौ हतौ ३४ पुनश्च विप्रशापेन राक्षसौ तौ बभूवतुः कुंभकर्ण
दशग्रीवौ हतौ तौ रामविक्रमैः ३५ शयानौ युधि निर्भिन्नहृदयौ रामसायकैः तच्चित्तौ जहतुर्देहं यथा
प्राक्तनजन्मनि ३६ ताविहाथ पुनर्जातौ शिशुपालकरूषजौ हरौ वैरानुबंधेन पश्यतस्ते समीयतुः
३७ एनः पूर्वकृतं यत्तद्राजानः कृष्णवैरिणः जहुस्त्वंते तदात्मानः कीटः पेशस्कृतो यथा ३८ यथा यथा
भगवतो भक्त्या परमयाभिदा नृपाश्चैद्यादयः सात्म्यं हरेस्तच्चिंतया ययुः ३९ आख्यातं सर्वमेतत्ते यन्मां त्वं
परिपृष्टवान् दमघोषसुतादीनां हरेः सात्म्यमपि द्विषां ४० एषा ब्रह्मण्यदेवस्य कृष्णस्य च महात्मनः
अवतारकथा पुण्या वधो यत्रादिदैत्ययोः ४१ प्रह्लादस्यानुचरितं महाभागवतस्य च भक्तिर्ज्ञानं विरक्ति
श्च याथात्म्यं चास्य वै हरेः ४२ सर्गस्थित्यप्ययेशस्य गुणकर्मानुवर्णनं ४२ परावरेषां स्थानानां कालेन
व्यत्ययो महान् ४३ धर्मो भगवतो नाथ भगवान्येन गम्यते ४३ आख्यानेस्मिन्समाम्नातमाध्यात्मिकमशे

प्रह्लादस्य चरितमित्यादेः समाम्नातमिति तत्रीयेनान्वयः अस्य तत्त्वेनोक्तं सर्गस्थित्यप्ययानामीशस्य हरे याथात्म्यं त
स्वरूपेन कृतेन हरेर्गुणकर्मानुवर्णनं चेत्यर्थः ४३ परावरेषां देवदैत्यानां दीनां यानि स्थानानि तेषां व्यत्ययो विपर्यासः ४४
अध्यात्मिकं आत्मानात्मविवेकादि ४४ एतत् श्रवणादिफलमाहात्म्य इति द्वाभ्यां एतत् य आद्यः कीर्तयेत् ४५ ॥ ॥

श्री॰
भा॰ स॰
टी॰
९॰

एतेन यन्नो गृहेषु स्वलीलां नामेवाह देवेंद्रस्य प्रथमानो च वर्धंयः श्रुत्विः सन्यवेन प्रणमन्प्रभावं प्रभावमिति निश्चियंवा
लोकं वैकुंठे ४६ महाप्रहर्षारस्य भाग्यं येन देवो रहः वयेन मद्भाग्यमिति विषीदं ते प्रत्याह यूयमिति त्रिभिः येषां गृ
हे गृहान् मुनयोभियंतिसर्वतः समायांति न तत्र सुहृत्तमाः यतः गृहे गूढं नराकारं गूढं सत् श्रीकृष्णाख्यं परंब्रह्म साक्षाद्वस
तीति ४७ नतु हृत्विस्माकं मातुलेयः कथं ब्रह्म स्वयमुच्यते तत्राह सवा इति सायंब्रह्मैव कथंभूतः महद्भिर्विमृग्यं यत् कै
वल्यनिर्वाणसुखं निरुपाधिः परमानंदः तदनुभूतिरूपः वः युष्माकं खल्वपि प्रियः न हि दृष्टादिरूपो भवति विधिकृत्
प्रायाज्ञवती ४८ नन्वपरं ब्रह्म चेत् कथं प्रहसद्भिः सुहृत्सीश्वरतिः कथं वा यथा माया वरणं तस्येत्याशंक्याह नयस्य रूपं तत्त्वे
भवादिरपि धिया सत्त्वज्ञा वस्तुतया इदमिति साक्षान्नोपवर्णितं मद्युष्माकं स्वयमेव प्रसन्नोस्माकं तु मौनादि साधनैः नत्या

एतद्यच्चादि गुरुश्च स्य गृहेषु लीलां देवेंद्रस्य प्रथमवर्धं श्रुतः यदवेत देवात्मजस्य च सतो गुरुस्य प्रणयं श्रुत्वा प्र
भावमतुलं नाभ्ययमेति लोकं ४६ यूयं नृलोके बत भूरिभागा लोकं पुनाना मुनयोभियंति येषां गृहाना
वसतीति साक्षात् गूढं परं ब्रह्म मनुष्यलिंगं ४७ सवा अयं ब्रह्म महद्विमृग्य कैवल्यनिर्वाणसुखानुभू
तिः प्रियः सुहृद्वः खलु मातुलेयः आत्मार्हणीयो विधिकृद्गुरुश्च ४८ नयस्य साक्षाद्भवपद्मजादिभी
रूपं धिया वस्तुतयोपवर्णितं मौनेन भक्त्योपशमेन पूजितः प्रसीदतामेष स सात्वतां पतिः ४९ स एष
भगवान् राजन् व्यतनोद्विहतं यशः पुरा रुद्रस्य देवस्य मयेनानंतमायिना ५० राजोवाच कस्मिन्क
र्मणि देवस्य मयो हन् जगदीशितुः यथा चोपचिता कीर्तिः कृष्णेनानेन कथ्यतां ५१ नारद उवाच नि
र्जिता असुरा देवैर्युध्यनेनोपबृंहितैः मायिनां परमाचार्यं मयं शरणमाययुः ५२ स निर्माय पुरस्तिस्रो

सादः सार्थनीय एवेत्याह मौनेनेति स एष सात्वतां पतिः नः प्रसीदतु न हि यस्माद्यस्य गृहे परं ब्रह्म वसति न च तद्दर्शनाय
मुनयः तद्गृहानभियांति न च तस्य साक्षात् रूपादि रूपेण वर्ण्यते तेन च स्वयमेव प्रसन्नः अतो यूयमेव नतोऽस्मत्तोपि भूरिभागा इ
ति भावः ४९ ननु ननु रुद्रस्य त्रिपुरभेदादिकं श्रीरुद्रः कृतवान् स एव भूतं ईश्वरोपास्य तत्त्वेन जातीति किं यमित्याह प्रजायते
स्यापि नत्वा हाख्यादेवाशो भवानवेकस्येति वक्तुं मात्यानःपरि पतिः स एष इति राजा युधिष्ठिर उवाच जगदीशितुर्दे
वस्य कीर्तिः कस्मिन्कर्मणि मुवा हतवान् ५१ अनेन श्रीकृष्णेनोपबृंहितैः संवर्द्धितैः ५२ हैमी रौप्या चायसी चेति तिस्रः
पुरो निर्माय तेभ्योऽरदात् विनिर्गमः दुर्लक्ष्या वयापायसंयोगागमनागमनेया सांपराविनिर्वर्त्यः परिच्छदा यास्तु ५२॥ ॥

राम॰
९॰

असुराणां सेनान्य: सेनापतय: पूर्ववैरं स्मरंत: ५४ असंख्य अभिमंत्रितेषास्त्रं पुरेषु विशेषत ५६ तत: शरान्सूर्यमंडला
न्मयूखसंदोहा: रश्मिसमूहास्तद्यत: येभ्य: ५७ कूपरसे रसपूर्णे निर्मितकूपा शुने ५८ वज्रसारा: वज्रवत् दृढांगा:
महौजसो महाबला: मेघदलना: मेघभेदिनो विद्यु ६० कालेमध्याह्ने ६१ ६२ आत्मनोन्यस्य वादयोरपि वादैर्वे
मदिरूपकल्पितं अथो हितं परिहृत्य हत कश्चिद्दर्पी स्वर: समर्थो नास्ति ६३ असौ श्रीकृष्ण: प्रथमं संग्राम: तत्सायर्थ

नाभिरलेसुरसेनान्यो लोकांस्त्रीन्नेष्यमानद्ध्य संरेनोनाशयांचक्रु: पूर्ववैरमलक्षिता: ५४ ततस्ते सेश्वरा
लोका उपासर्थे शरं विभो आहितस्तावकान्देवविनष्टान्विशालयै: ५५ अथानुगृह्य भगवान्मा भैष्टेति
सुरान्विभु: शरं धनुषि संधाय पुरेष्वस्त्रं व्यमुंचत ५६ ततोग्निवर्णा इषवउत्पेतु: सूर्यमंडलात् यथा मयूख
संदोहा नादृश्यंत पुरो यत: ५७ तै: स्पृष्टा व्यसव: सर्वे निपेतु: स्मपुरौकस: नानानीय महायोगी मय:
कूपरसे न्यधात् ५८ सिद्धामृतरसस्पृष्टा वज्रसारा महौजस: उत्तस्थुर्मेघदलना वैद्युता इव वह्नय: ५९
विलोक्य भग्नसंकल्पं विमनस्कं वृषध्वजं तदायं भगवान्विष्णुस्तत्रोपायमकल्पयत् ६० वत्स आसीत्
दा ब्रह्मा स्वयं विष्णुरयं हि गो स्वयं विशोक: शोकार्तं स्मरन्देवगतिं वतो ६१ देवोसुरो नरोन्यो वा नेश्वरो
स्तीह कश्चन आत्मनोन्यस्य वा दिष्टं दैवेनापोहितुं द्वयो: ६२ तद्दिव्यायमयो योगी रसपालानिदं जगो
स्वयं विशोक: शोकार्तान्स्मरन्दैवगतिं वतो ६३ अथासौ शक्तिभि: स्वाभि: शंभो: प्राधानिकं व्यधात् य
मंज्ञानविरक्त्यृद्धितपोविद्याक्रियादिभि ६४ रथं सूतं ध्वजं वाहान्धनुर्वर्मशरादि यत् सन्नद्धो रथमास्थ
य शरं धनुरुपाददे ६५ शरं धनुषि संधाय मुहूर्तेभिजितीश्वर: ददाह तेन दुर्भेद्यान्हरोथ त्रिपुरान्नृप
६६ दिवि दुंदुभयो नेदुर्विमानशतसंकुला: देवर्षिपितृसिद्धेशा जयेति कुसुमोत्करै: अवाकिरन्जगु
र्हृष्टा नन्नृतुश्चाप्सरोगणा: एवं दग्ध्वा पुरस्तिस्रो भगवान्पुरहा नृप ब्रह्मादिभि: स्तूयमान: स्वधामप्र
त्यपद्यत ६८ एवंविधान्यस्य हरे: स्वमायया विडंबमानस्य नृलोकमात्मन: वीर्याणि गीतान्यृषिभि

६५ अभिजिति मध्याह्ने ६६ विमानशतानि संकुलानि संकीर्णानि येषां ते देवादय: ६७ ६८ आदितआरभ्य संध्या
र्थं विगमयति एवंविधानीति नृलोकं नराकारमात्मनो विडंबमानस्य अनुकुर्वत: ६९ ॥ ॥

श्री० भा० स० टी० ३१

इति श्रीभावार्थे सप्तमस्कंधे दशमोध्यायः १० एकादशे नृणां धर्माः साधारण्येन वर्णिनां विशेषेन च वर्णानां स्त्रीणां
चाप्याथ योषितां १ तदेवं दशभिः स्वीनभक्तियोगादुदीरितो अथ पंचभिरध्यायैः कर्मयोगानुवर्ण्यते २ दैत्यपतेः
प्रह्लादस्य साधूनां सभासु सभाजितं सत्कृतं ईहितं चरितं श्रुत्वा पुनर्नारदं पप्रच्छ कथंभूतस्य ईहितं महत्तमानामग्रण्यः
श्रेष्ठस्य तत्र हेतुः उरुक्रमे आत्मा मनो यस्य १ श्रवणेच्छाया हेतुः यत् येन धर्मेण तद्विज्ञानात् परं ज्ञाने भक्तिं च विं
दति २ ३ तत्स्तुतिकारैर्धर्मज्ञत्वं तत्राह नारायणपरा इति ४ अजाय श्रीनारायणाय नमस्येवं भगवान् तस्माद्
तेन स्वयोदात्मनः श्रवणेन सम्भावन विशिष्टमस्तीय इति ६ अथ धर्मं तावद् धर्मप्रमाणमाह धर्ममिति धर्मस्य मूलं प्रमा

इति श्रीभागवते सप्तमस्कंधे दशमोध्यायः १० श्रीशुक उवाच श्रुत्वेहितं साधुसभासभाजितं महत्तमाग्रण्य उरु
क्रमात्मनः युधिष्ठिरो दैत्यपतेर्मुदान्वितः पप्रच्छ भूयस्तनयं स्वयंभुवः १ युधिष्ठिर उवाच भगवन् श्रोतुमिच्छा
मि नृणां धर्मं सनातनं वर्णाश्रमाचारयुतं यत्पुमान्विंदते परं २ भवान्प्रजापतेः साक्षादात्मजः परमेष्ठिनः सु
तानां संमतो ब्रह्मंस्तपोयोगसमाधिभिः ३ नारायणपरा विप्रा धर्मं गुह्यं परं विदुः करुणाः साधवः शांता
स्त्वद्विधा न तथापरे ४ नारद उवाच नत्वा भगवतेऽजाय लोकानां धर्मसेतवे वक्ष्ये सनातनं धर्मं नारायणमुखाच्छ्रु
तं ५ योऽवतीर्यात्मनोंशेन दाक्षायण्यां तु धर्मतः लोकानां स्वस्तयेध्यास्ते तपो बदरिकाश्रमे ६ धर्म
मूलं हि भगवान्सर्ववेदमयो हरिः स्मृतं च तद्विदां राजन्येन चात्मा प्रसीदति ७ सत्यं दया तपः शौचं तिति
क्षेक्षा शमो दमः अहिंसा ब्रह्मचर्यं च त्यागः स्वाध्याय आर्जवं ८ संतोषः समदृक्सेवा ग्राम्येहोपरमः शनैः
नृणां विपर्ययेहेक्षा मौनमात्मविमर्शनम् ९ ॥

णां स्मृतं च स्मृतिः तद्विदां वेदवादिनां येन चात्मा मनः प्रसीदति तत्प्र्याति तथा च याज्ञवल्क्यः श्रुतिः स्मृतिः सदाचारः स्व
स्य च प्रियमात्मनः सम्यक्संकल्पजः कामो धर्ममूलमिदं स्मृतमिति मनुश्च वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदां आचा
रश्चैव साधूनामात्मनस्तुष्टिरेव चेति ७ तत्र तावत्सर्वसाधारणं धर्ममाह सत्यमिति पंचभिः तपः एकादश्युप
वासादि ईक्षा युक्तायुक्तविवेकः शमो मनसः संयमः दमो बाह्येंद्रियाणां त्यागो दानं स्वाध्यायो जप उचितवाचः ८
संतोषो दैवलब्धेनालंबुद्धिः समदृशां महतां सेवा ग्राम्येहोपरमः प्रवृत्तकर्मभ्यो निवृत्तिः विपर्ययेहेक्षा निष्फलक्रि
याणामीक्षणं मौनं वृथालापनिवृत्तिः आत्मविमर्शनं देहादिव्यतिरिक्तात्मानुसंधानं ९ ॥ ॥

आप्नोति देवत्वेन नित्य बुद्धिः १० अस्य श्रीहरेः लस्य श्रवणादयो नव इज्यायर्थवते ११ एवं त्रिंशल्लक्षणवान् १२ इदानीं व
र्णधर्मान्वक्तुं द्विजानां लक्षणमाह संस्कारा यत्र वै नो गर्भाधानादयो यस्मिन्नविच्छिन्नाः स द्विजः न हि शूद्रस्यापि संस्क
राविच्छेदे सति द्विजत्वे स्यात् इत्याह अजो ब्रह्मा यमेवं भूतसंस्कारयुक्तं जगाद स द्विजः शूद्रेणैव न मेवं तत्संस्कारयुक्तं जगाद त
दोपनयनेन वेदं ग्रहीतो नासौ द्विजः तथा च स्मृतिः विवाहमात्रे संस्कारं शूद्रोपि लभते सदा न केनचित्समसृजद्ब्रह्मा
ने प्रजापतिरिति श्रुतिः निसृष्टाय आत्मस्यागमसृजत् त्रिष्टुभा राजन्यं जगत्या वैश्यं न केनचिच्छन्दसा शूद्रमिति अतो विवाहमात्रेति
त्र संस्कारस्यनावश्यकत्वात् उपनयनस्य तु सर्वेषां निषेधात्तस्य द्विजत्वे इत्यर्थः पाठान्नैवैदिकादय इति गर्भा
धानादय इत्यर्थः वैदिकानामावश्यकात् धर्मानाह इज्येति जन्मना विशुद्धेन कुलेन कर्मणा च आचारेण अ

अध्यायाद्दे सेवि भागोभूते भक्तयथार्हतः तेषात्मदेवताबुद्धिः स्वतनोरनुरूपोऽस्य १० श्रवणकीर्तनं चास्य
स्मरणं महतां गतेः सेवेज्यावनतिर्दास्यं सख्यमात्मसमर्पणं ११ नृणामयं परो धर्मः सर्वेषां समुदाहृ
तः त्रिंशल्लक्षणवान् राजन् सर्वात्मा येन तुष्यति १२ संस्कारा यत्राविच्छिन्नाः स द्विजोऽजो जगाद यं इज्या
ध्ययनदानानि विहितानि द्विजन्मनां १३ जन्मकर्मावदातानां क्रियाश्चाश्रमचोदिताः १३ विप्रस्याध्या
पनादीनि षडन्यस्याप्रतिग्रहः राज्ञो वृत्तिः प्रजागोप्तुरविप्राद्वा करादिभिः १४ वैश्यस्तु वार्तावृत्तिश्च
नित्यं ब्रह्मकुलानुगः शूद्रस्य द्विजशुश्रूषा वृत्तिश्च स्वामिनो भवेत् १५ वार्ता विचित्रा शालीनयायावरशि

वदातानां शुद्धानां शुक्लानां द्विजानां वर्णानां चैतानि विहितानीत्यर्थः ब्रह्मचर्याद्याश्रमविहिताः क्रियाश्च शूद्रस्य वर्ण
धर्म एव आश्रमभेदेऽपि न विशेषाभावात् १३ ब्राह्मणादीनां चतुर्वर्णानामपि वृत्तिरूपान्धर्मानाह विप्रस्येति सार्द्धैः सप्तभिः
विप्रस्य षट्कर्माणि विहितानीत्यनुषङ्गः तत्र तु अध्यापनेयाजने प्रतिग्रहश्च जीविकायै आह मनुः यस्मात्त्रयाणां कर्मणामा
साधीनि कर्माणि जीविका याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रह इति अन्यस्य क्षत्रियस्य अप्रतिग्रह इति प्रतिग्रहो
तिरिक्तं याजनमध्यापनं वा पञ्च तु जानातीति दृष्टानि चानन्तरमेव उक्तं नैराजन्यमिति श्रूयते च अश्वपतिकैकेयप्रभृतीनां
क्षत्रियाणां शस्त्रप्रदर्शनादि प्रजापालनेऽधिकृत्य तस्य क्षत्रियस्य वृत्तिमाह राज्ञ इति आदिशब्देन दण्डशुल्कादि १४ वा
र्ता कृषिवाणिज्यादिलक्षणमाह नित्यस्य मः शूद्रस्य द्विजशुश्रूषा वृत्तिः स्वामिनो द्विजस्य तु शुश्रूषा वृत्तिस्तु भवेत्
१५ विप्रस्य स्वकल्पभेदेन वृत्तिमाह वार्तेति विचित्रा कृष्यादि रूपा शालीनं याच्याविनैव प्राप्तमयाचितं यायावरं प्रत्यहं

श्री॰ भा॰ प॰ टी॰ ३२

धान्य याज्ञाशिलं शालिहेत्रादौ स्वामिन्यन्नवार्णा योऽश्नन् डुक्कनेश्वापत्यमदिपतिं नव तायादानिशिलोंक्कनेहृदयमे
वीहृ त्यचवर्द्वैन्यति श्रीयैसेडन्नमा १८ हृतिश्रेवन्यवस्याद्भवयन् श्रापृश्नीराहजचन्यानीवः उन्नमोश्रश्णायर
नादिहृपं अतेराजन्यंदत्रियस्तशतिग्रहादन्याभजेत १० चतुर्विधांशूर्वोक्तांविप्रहृतिमितरेषामपिहृदयमाह
अतामिनाभ्यामिति १८ स्नाकेयावेद्द्अतमिति १९ नयोस्तद्जनेहेतमाह सर्ववेदमयइति २० वर्णानाम
भिग्राजवहृणांधर्मानाहमहृषामइतिचतुर्भिः शत्रुनाम्नत्वश्रीविल्पपरत्वे २१ शौर्यशुद्धान्साहः वीर्यप्रभावः
तेजः प्रागल्भ्य २२ २३ शूर्मत्रयजः नमस्कारेणैवपंचयज्ञानुष्ठानेनत्याचयाज्ञवल्क्यः नमस्कारेणमंत्रेणायेचय
जेत्स अनुन्योभोत्रमोहृहिमनापदिभजेन्नरः अतेराजन्यमापन्नसर्वेषामपिसर्वशः १० अतामृताभ्यां
जीवेतमृतेनप्रताशृतेनवा सत्यानृताभ्यांजीवेतनश्वहृत्याकथंचन १८ अतमृच्छशिलंप्रोक्तममृतेयद
सेवितं मृतेनतिसयाञ्चास्यात्प्रमृतेकर्षणंस्मृते १९ सत्यानृतेनतवाणिज्यंश्वहृत्तिर्नीचसेवनं २९
वर्जयेत्तांसदाविप्रोराजन्यश्चजुगुप्सितं २० सर्ववेदमयोविप्रःसर्वदेवमयोनृप २१ शमोदमस्तपः
शौचंसंतोषःक्षांतिरार्जवं ज्ञानंदयाच्युतात्मत्वंसत्यंचब्रह्मलक्षणं २१ शौर्यंवीर्यंधृतिस्तेजःस्त्या
गश्चात्मजयःक्षमा ब्रह्मण्यतात्रसादश्चरक्षाचक्षत्रलक्षणं २२ देवगुर्वच्युतेभक्तिस्त्रिवर्गपरि
पोषणं आस्तिक्यमुद्यमोनित्यंनैपुण्यंवैश्यलक्षणं २३ शूद्रस्यसंनतिःशौचंसेवास्वामिन्यमायया।
अमंत्रयज्ञोह्यस्तेयंसत्यंगोविप्ररक्षणं २४ स्त्रीणांचपतिदेवानांतच्छुश्रूषानुकूलता तद्बंधुष्वनुवृ
त्तिश्चनित्यंतद्व्रतधारणं २५ संमार्जनोपलेपाभ्यांगृहमंडलवर्तनैः स्वयंचमंडितानित्यंपरिमृष्टपरि
च्छदा २६ कामैरुच्चावचैःसाध्वीप्रश्रयेणदमेनच वाक्यैःसत्यैःप्रियैःप्रेम्णाकालेकालेभजेत्पतिं

यस्मात्महापयेदिति २४ स्त्रीधर्मानाहस्त्रीणामितिपंचभिः पतिरेवदेवोयासांतस्यपत्युः शुश्रूषानुकूलता
चेतस्यचहृतेनियमः तस्यधारणंयतच्चतद्यंपतिव्रतानांलक्षणंधर्मश्च २५ किंचसंमार्जनोपलेपाभ्यामि
त्यादिः पतिंभजेदित्युत्तरेणान्वयः परिमृष्टाउद्वर्तनादिनानिर्मलीकृता २८ ३० किंचसंतुष्टालोलुपेन
तावन्मात्रभोगेप्रलोलुपादक्षाप्रनलसाप्रियासत्याचवाग्यस्याः सवत्राणि प्रथमनाश्रवहिनाश्रयातिमहापाप
तकस्त्र्यन्यथाहयाज्ञवल्क्यः आपृष्टेः संश्रतीतोहिमहापातकहृषितइति २८ ॥ ॥

तत्परा सती भजेत् श्रीरिव हर्यात्मना पत्या सह २९ प्रतिलोमानुलोमजातानां वृत्तिमाह वृत्तिरिति तत्तत्कुलकृ
ता कुलपरम्पराप्राप्ता चौर्यहिंसादिकं तु निषेधयति अपापानामचौराणां चेति तत्र च प्रदर्शनार्थं कोशस्थान्त्यजलोकस
ञ्ज्ञाविशेषानाह श्रीरत्नजेति रजकः चर्मकारश्च नटो बुरुड एव च कैवर्तमेदभिल्लाश्च सप्तैते चान्त्यजाः स्मृताः अन्तेवसा
यिनश्चाण्डालपुक्कसमातङ्गादयः तेषामपि ग्राम एव वस्तुनिर्णेजनादि वृत्तिरित्यर्थः ३० श्रेष्ठादपि परधर्मान्नीचोऽपि स्व
धर्म एव श्रेयानित्याह प्राय इति स्वभावेन शमादिलक्षणेनाभिहितो धर्मः शर्मकृत् सुखकृत् स्मृतः कैर्वेददृग्भिः
चतुर्थे योगे भगवता चोक्तं श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितादिति ३१ ननु स्वाभाविकस्य कर्मणो बन्धहे
तुत्वात् कथं स्वभावविहितं श्रेय इति ३२ ननु काम्यानि कर्माणि कुर्वन् तत्फलोपभोगपरश्च कथं निर्गुणतां यायात्
न तदुक्तं श्रेयो दृष्टान्तेनोपपादयितुं मन्यमानः कथं विरज्यते तदुक्तं नमोऽह इत्यादि न चाधिकारभेदेन व्यवस्था स्यादित्या

याः पतिं हरिभावेन भजेत् श्रीरिव तत्परा हर्यात्मना हरेर्लोके पत्या श्रीरिव मोदते २९ वृत्तिः संकरजा
तीनां तत्तत्कुलकृता भवेत् अचौराणामपापानामन्त्यजान्तेवसायिनां ३० प्रायः स्वभावविहितो नृणां
धर्मो युगे युगे वेददृग्भिः स्मृतो राजन् प्रेत्य चेह च शर्मकृत् ३१ वृत्त्या स्वभावकृतया वर्तमानः स्वक
र्मकृत् हित्वा स्वभावजं कर्म शनैर्निर्गुणतामियात् ३२ उप्यमानं मुहुः क्षेत्रं स्वयं निर्वीर्यतामियात्
न कल्पते पुनः सूत्यै उप्तं बीजं च नश्यति ३३ एवं कामाशयं चित्तं कामानामतिसेवया विरज्येत यथा
राजन्नग्निवत्कामबिन्दुभिः ३४ यस्य यल्लक्षणं प्रोक्तं पुंसो वर्णाभिव्यञ्जकं यदन्यत्रापि दृश्येत तत्तेनै

नमाह उप्यमानमिति द्वाभ्यां पुनः सूत्यै सस्यसम्पत्तये ३३ कामाशयं कामवासनारूपेणाशयस्मिन् तत्तदुत्कट
वासनाविशेषस्य सह सेवकस्य ममाप्यातिसम्भवात् चेदुक्तं नियमेन बहुशः कामान्भुञ्जानस्यैव नित्यनैमित्तिकैर्विशुद्धचे
तसः तद्दोषदर्शनेन च यथा याति सौभरिप्रभृतीनामिव शनैर्विरागो भवति यथा सवीर्ये क्षेत्रे शनैर्निर्वीर्यं भवति यथा
च प्रज्वलितोऽग्निर्न द्युतबिन्दुभिः शाम्यति महता तु अम्बुनापूरेण शाम्यते न तु प्रस्तावादुक्तं तत्स्वकर्मोपरमेव निर्णय
उपदेशो मे स्ववासनानामधिकारिणां न तु अन्यत्र चैवं बालानां तद्दूषितधियो दोहतारामेति विनिहितेति ततः सर्वमनवद्य
मेव शमादिभिरेव ब्राह्मणादिव्यवहारो मुख्यः न जातिमात्रादित्याह यस्येति यद्यदि अन्यत्र वर्णान्तरेऽपि दृश्येत तद्वर्णा
न्तरं तेनैव लक्षणनिमित्तेनैव वर्णेन विनिर्दिशेत् न तु जातिनिमित्तेनेत्यर्थः ३५ इति श्रीभावार्थे सप्तमे एकादशः

श्री॰ भा॰ स॰ टी॰ १३

हाद्दशेवर्णानेधर्मो ब्रह्मचारिवनस्थयोः वर्णानामाश्रमाणां च साधारण्येन वक्ष्यन् वर्णानां धर्मा उक्ताः इदानीं आश्रमधर्मा उच्यंते तत्रास्मिन्द्वादशेऽध्याये ब्रह्मचारिवनस्थयोरसाधारणाः चतुर्णां साधारणाः चतुर्णां साधारणाः चोच्यंते त्रयोदशे यतेर्धर्माः चतुर्दशे गृहस्थस्य पंचदशे सर्वधर्मसारसंग्रहः ब्रह्मचारी गुरुकुले वसन् गुर्वादीनुपासीतेत्युत्तरेणान्वयः १ ब्रह्म गायत्रीं जपन् संध्याद्वयमप्युपासीत उभे संध्ये यतवाग्भवेत् सायंप्रातः संध्याकालनिमित्ते मौने त्वयादित्यर्थः २ गुरोश्चरणौ नमेत् ३ यथोदितं पालाशादिदंडो ब्राह्मणस्येत्यादिनियममनतिक्रम्य जटाधारणं तु केशप्रसाधनाभावमात्रं ४ ५ यावदर्थं यावत्प्रयोजनमेव ६ बृहद्व्रत

नारद उवाच ब्रह्मचारी गुरुकुले वसन्दांतो गुरोर्हितं आचरन्दासवन्नीचो गुरौ सुदृढसौहृदः १
सायंप्रातरुपासीत गुर्वग्न्यर्कसुरोत्तमान् संध्ये उभे च यतवाग्जपन्ब्रह्म समाहितः २ छंदांसि
अधीयीत गुरोराहूतश्चेत्सुयंत्रितः उपक्रमे वसाने च चरणौ शिरसा नमेत् ३ मेखलाजिनवासांसि
जटादंडकमंडलून् बिभृयादुपवीतं च दर्भपाणिर्यथोदितं ४ सायंप्रातश्चरेद्भैक्षं गुरवे तन्नि
वेदयेत् भुंजीत यद्यनुज्ञातो नो चेदुपवसेत्क्वचित् ५ सुशीलो मितभुग्दक्षः श्रद्दधानो जि
तेंद्रियः यावदर्थं व्यवहरेत्स्त्रीषु स्त्रीनिर्जितेषु च ६ वर्जयेत्प्रमदागाथामगृहस्थो बृहद्व्रतः इंद्रि
याणि प्रमाथीनि हरंत्यपि यतेर्मनः ७ केशप्रसाधनोन्मर्दस्नपनाभ्यंजनादिकं गुरुस्त्रीभिर्युवति
भिः कारयेन्नात्मनो युवा ८ नन्वग्निः प्रमदा नाम घृतकुंभसमः पुमान् सुतामपि रहो जह्यादन्य

ब्रह्मचर्यवान् गृहस्थश्चेति द्विविधः सर्वोपि गाथामपि वर्जयेत् तत्र हेतुः इंद्रियाणि बलवंति संयतस्यापि मनो हरंतीति ७ ८ न कारयेदित्यत्र हेतुः नन्विति रहः एकांते अन्यदा केशप्रसाधनादिव्यतिरिक्तावसरे अनेकान्तावसरे वा यावदर्थं न तदर्थं तत इमं कुर्यात् ९ ननु मिथ्यात्वादनिवृत्तमलत्वाच्च स्वयं सङ्कल्पाय स्यादित्यादि निश्चयादिति को यमतिनिर्बंधः तत्राह कल्पयित्वेति आत्मनः स्वरूपसाक्षात्कारेण इदं देहेंद्रियादि आभासमात्रं कल्पयित्वा निश्चित्य यावदसौ जीवः स्वरस्वतंत्रो न भवेत् तावद्देहेंद्रियग्रहः पुमान् यस्त्र्यादिभेदेन विरमेत् ततः किमत आह नतो हि देतात् विपर्ययः गुणाध्यासेन भोग्यताबुद्धिः अतो जह्यादेवेत्यर्थः १० ॥ ॥

रामः
१३

पतत्सर्वं स्त्रीसंगत्यागपर्यन्तं गृहस्थस्याप्यविशेषमाह गुरुवृत्तिरिति ११ अंजनादीनामाभिधानानोद्वर्तनं अंजनं शा
रीरस्याभ्यंजनं शिरसः स्त्रियश्चावलेखं वा चित्रकर्मस्त्रीणां कुड्यादौ लेखनं वा तन्निरीक्षणं वा यत्राभ्यामादिश्च
द्वेषतो निषिद्धानि एवं तत्कथंचिद्दीपादिशाप्रमत्तस्त्रीकर्तृकं निषिद्धमिति भेदः १२ अंगैः शिक्षादिभिरुपनिषि
द्भिश्च सहितां वेदत्रयीमधीत्यावबुध्य च तदर्थं विचार्य यावदर्थं स्वाधिकारानुसारेण १३ यदीश्वरः समर्थः तर्हि
गुरोः काममपेक्षितं वरं दत्वा यथाधिकारं गृहस्थाद्याश्रमं स्वीकुर्यात् तत्रैव वावसेत् नैष्ठिकः स्यादित्यर्थः १४
स्वधामभिः स्वाश्रयभूतैर्जीवैः सह तत्प्रविष्टं तथा १५ चरन्नेवाचरन्विदितविज्ञानो विज्ञेयं येन सः १६ ऋषि

एतत्सर्वं गृहस्थस्य समाम्नातं यतेरपि गुरुवृत्तिर्विकल्पेन गृहस्थस्यर्तुगामिनः ११ अंजनाभ्यं
जनोन्मर्दस्त्र्यवलेखामिषं मधुः स्रग्गंधलेपालंकारांस्त्यजेयुर्ये धृतव्रताः १२ उषित्वैवं गुरुकुले
द्विजोऽधीत्यावबुध्य च त्रयीं सांगोपनिषदं यावदर्थं यथाबलं १३ दत्त्वा वरमनुज्ञातो गुरोः कामं यदी
श्वरः गृहं वनं वा प्रविशेत्प्रव्रजेत्तत्र वा वसेत् १४ अग्नौ गुरावात्मनि च सर्वभूतेष्वधोक्षजं भूतैः स्व
धामभिः पश्येदप्रविष्टं प्रविष्टवत् १५ एवंविधो ब्रह्मचारी वानप्रस्थो यतिर्गृही चरन्विदितवि
ज्ञानः परं ब्रह्माधिगच्छति १६ वानप्रस्थस्य वक्ष्यामि नियमान्मुनिसंमतान् यानातिष्ठन्मुनिर्ग
च्छेदृषिलोकमुहांजसा १७ न कृष्टपच्यमश्नीयादकृष्टं चाप्यकालतः अग्निपक्वमथामं वार्कप
क्वमुताहरेत् १८ वन्यैश्चरुपुरोडाशान्निर्वपेत्कालचोदितान् लब्धे नवे नवेऽन्नाद्ये पुराणं तु परित्य
जेत् १९ अग्न्यर्थमेव शरणमुटजं वाद्रिकंदरं श्रयेत हिमवाय्वग्निवर्षार्कातपषाट् स्वयं २० केश
रोमनखश्मश्रुमलानि जटिलो दधत् कमंडल्वजिने दंडवल्कलाग्निपरिच्छदान् २१ चरेद्वने द्वा
दशाब्दानष्टौ वा चतुरो मुनिः द्वावेकं वा यथा बुद्धिर्न विपद्येत कृच्छ्रतः २२ ॥ ॥

लोकं महर्लोकं १७ अकृष्टं कृष्टपच्यं अकालतः पाककालात्पूर्वमेव निष्पन्नमित्यर्थः अर्कपक्वं फलादि
आहरेत् अश्नीयात् १८ वन्यैर्नीवारादिभिः कालचोदितान् नित्यान् पुराणं पूर्वसंचितं १९ हिमादीन् सहेत
इति तथा २० केशादीन्मलवाप्रक्षालनेन धारयन् कमंडल्वादीन्दधत् २१ कृच्छ्रतः तपःक्लेशाद्यथा बुद्धिर्न

श्री॰
भा॰ स्क॰
टी॰
२४

हादशाह्याद्यवेन्तरमप्यिदिस्वधर्मोऽद्दानेशक्तस्तर्हि वनएव वसेत् यदि तु ज्ञानाभ्यासे योग्यः तर्हि संन्यसेदित्य
त्र आध्यायेवक्ष्यति तत्र भयरहितस्य त्रयस्य तमेतदाह यदा ग्रकल्पः असमर्थः आन्वीक्षिकीं ज्ञानाभ्यासे २३
अनशनादिक्रियातः पूर्वं कृत्यमाह आत्मनीत्यादि यावत्समाप्ति यथार्हतः यथायोग्यं स्वकारणेष्वाकाशादि
षु संघातं देहं न्यसेत् अविलापयेत् २४ तदेव विभज्य दर्शयति खे आकाशे खानि देहगतछिद्राणि आत्मवा
न् धीमान् शेषं अस्थिमांसादि कठिनांशं २५ एवं स्थूलशरीरस्य लयमुक्त्वा लिंगशरीररूपस्याध्यात्मादित्रयस्य
लयमाह वाचमित्यादिना तत्र यद्यपि यथोद्भवं लयस्य उक्तत्वात् अध्यात्मादीनां स्वस्वकारणेषु गत्यास्य अहंकारादिषु
लयो वाच्यः तथापीन्द्रियाणां लयभावेन यमर्द्दितीयात्मप्रतिपत्तिपर्यन्तेति यथा कथंचित् विलये भाव्ये स्वतानां प्रवर्तक

यदायंकल्पः स्वक्रियायां व्याधिभिर्जरयाथवा आन्वीक्षिकीं वा विद्यायां कुर्यादनशनादिकं २३
आत्मन्यग्नीन्समारोप्य संन्यस्याहंममात्मतां कारणेषु न्यसेत्सम्यक्संघातं तु यथार्हतः २४ खे खानि
वायौ निःश्वासांस्तेजस्यूष्माणमात्मवान् अप्स्वसृक्श्लेष्मपूयानि क्षितौ शेषं यथोद्भवं २५ वाचम
ग्नौ सवक्तव्यामिंद्रे शिल्पं करावपि पदानि गत्या वयसि रत्योपस्थं प्रजापतौ २६ मृत्यौ पायुं विसर्गं च
यथास्थानं विनिर्दिशेत् दिक्षु श्रोत्रं सनादेन स्पर्शमध्यात्मनि त्वचं २७ रूपाणि चक्षुषा राजन्ज्यो
तिष्यभिनिवेशयेत् अप्सु प्रचेतसा जिह्वां घ्रेयैर्घ्राणं क्षितौ न्यसेत् २८ मनो मनोरथैश्चंद्रे बुद्धिं बो
ध्यैः कवौ परे कर्माण्यध्यात्मना रुद्रे यदहंममताक्रिया २९ सत्त्वेन चित्तं क्षेत्रज्ञे गुणैर्वैकारिकं परे ३०

तेन प्राधान्यादिंद्रियतद्विषययोर्देवतासु लयः कथ्यते वक्तव्यसहितां वाचं अग्नौ न्यसेत् एवं सर्वत्र पदानि पादेंद्रियं सि
विसो २६ सनादेन शब्देन सह अध्यात्मनि वायौ अध्यात्ममिति निपाठः वायाविति स्नातको २७ ज्योतिषि आदित्ये रस
गन्धयोः त्विंद्रियाकर्षकत्वेन प्राधान्यविवक्षया देवतासहितेन्द्रियस्य विषये लयमाह अपेनसा सहिता जिह्वा रसना
अप्सु रसरूपासु घ्राणाशक्तुनानुनारफुलदानां अधिभ्यां सह घ्राणेन्द्रियं गंधे रूपलादिनाया चिन्ताविन्तयोः २८ परे
कवौ ब्रह्मणि अध्यात्मनेत्य अहंकारेण अध्यात्मनामिति निपाठक्रमए अहंकारे वेत्यर्थः कथं रुद्रे इयदहस्मादहं मम
ताटस्थ्यक्रियाभवति तस्मिन्सत्त्वेन चेतनया गुणैः गुणकार्यैः प्रागवशिष्टैर्देवैः सह यद्वा सत्त्वादिभिर्गुणैर्हेतुभि
र्नैः वैकारिकं आहंकारिकं त्वादिविकाभवं तदेव च परे निर्विकारे ब्रह्मणि २९ ॥ ॥

राम॰
२४

ननुविकारवतःकथंपरेलयःस्यात् विकारहेतूनांसर्वोपाधीनांलयद्वारेणेत्याह अक्षितिअहोज्योतितच्चनभःकूटस्थ
स्थंअहेनतत्सेनत्सुकूटस्थंमहतिमहत्तत्त्वंतदव्यक्तेप्रधानेतच्चाव्यक्तंअक्षरेपरमात्मनि ३० इतिसर्वोपाधिलयाद्धेतोःअव
शेषितंचिन्मात्रमात्मानंदेहत्रयमहारतयाज्ञात्वाद्वयःसनविरमेत्दग्धकाष्ठोयथानलः ३१ इतिश्रीभावार्थदीपिकायांसप्तम
स्कंधेद्वादशः १२ त्रयोदशेयतेर्धर्मःसाधकस्योच्यतेमहान् अवधूतेतिहासेनसिद्धस्याचरणंतथा पर्वंध्यात्वा
यकल्पोनध्यानादिकंकुर्यात् असमर्थोकल्पस्त्वेवंध्यानासमर्थपरिव्रजेदितिसंबंधः किंचदेहमात्रंतिरिक्तंसर्वमित्या
ह मात्रेतितस्यधर्मानाहग्रामैकरात्रेतिनवभिः १ कौपीनमाच्छादनेयावतातावन्मात्रंपरंकेवलमितिवाअन्यद्वस्तुके ये

भागस ७

७ श्रीविजयरामाय

अस्तादिनिमयोन्यातिघ्यदावायोनभस्यमं कूटस्थेनत्सुमहितेनतदव्यक्तेद्वारेचतनन् ३० इत्यक्षरतयात्मा
नंचिन्मात्रमवशेषितं ज्ञात्वाद्वयोथविरमेद्दग्धयोनिरिवानलः ३१ इतिश्रीभागवतेसप्तमेद्वादशोध्यायः
१२ नारदउवाच कल्पस्त्वेवंपरिव्रज्यदेहमात्रावशेषितः ग्रामैकरात्रविधिनानिरपेक्षश्चरेन्महीम् १ बि
भृयाद्यद्यसौवासःकौपीनाच्छादनंपरं मत्यक्तंनलिंगदंडादेरन्यत्किंचिदनापदि २ एकएवचरेद्भिक्षुरा
त्मारामोनपाश्रयः सर्वभूतसुहृच्छांतोनारायणपरायणः ३ पश्येदात्मन्यदोविश्वंपरेसदसतोव्यये आ
त्मानंचपरंब्रह्मसर्वत्रसदसन्मये ४ सुप्तप्रबोधयोःसंधावात्मनोगतिमात्मदृक् पश्यन्बंधंचमोक्षंच
मायामात्रंनवस्तुतः ५ नाभिनंदेद्ध्रुवंमृत्युमध्रुवंवास्यजीवितं कालंपरंप्रतीक्षेतभूतानांप्रभवाप्ययं
६ नासच्छास्त्रेषुसज्जेतनोपजीवेतजीविका वादवादांस्त्यजेत्तर्कान्पक्षंकंचननसंश्रयेत ७ नशिष्यान

घ्रोच्चारणात्सर्वमेव २,३ सदसतःपरेकार्यकारणव्यतिरिक्ते ४ नत्वात्मानंपरंब्रह्मेतिकथंसामानाधिकरण्यंवि
हेधाःनहिबद्धमुक्तयोरैक्यंसंभवतितत्राह सुप्तेतिसुप्तेहितमसाहृतमात्मनत्वंजाग्रत्स्वप्नयोरुमविक्षिप्तप्रकाश
तेसंधौतुनतमोनापिविक्षेपःअतःतदात्मात्मदृक् आत्मानंलक्षीकृत्यस्थितःसन् आत्मनोगतिंतत्त्वंपश्यनबंधमो
क्षंचमायामात्रंपश्यन् आत्मानंपरंब्रह्मसर्वत्रपश्येदित्यन्वयःनतुनंयोगग्रंथेनिद्रादौजागरस्यानेयोभावउपजायते
भावंभावयन्नित्यमुच्यतेनेनेरीयतइतिरीति ५ अस्यदेहस्यप्रभावोत्पत्तिश्चयस्मात्तंकालं ६ असच्छास्त्रेषुअनात्मपरेषु
जीविकांनक्षत्रविद्यादिरूपांवृत्तिं वादवादान् जल्पवितंडादिनिष्ठान् तर्कान् नतर्कमाश्रित्यकंचनपक्षंनिबं
धेनसंश्रयेत ७ नानुबध्नीतप्रलोभनादिनावालानाध्यापयेत आरंभान् मठादिव्यापारान् ८ ॥ ॥

श्री॰
भा॰ स्क॰
टी॰
१५

परमहंसस्य विशेषमाह नयतेराश्रमो धर्मार्थः कथंभूतस्य महात्मनः तस्य लक्षणं शांतस्येत्यादि शय इत्यस्यायं भावः ज्ञानोत्पत्तिपर्यंतं बहूदकादिलिंगमाश्रितस्तत्त्वज्ञार्थं यमाश्रियमाणाचरेत् ज्ञानोत्पत्त्यनंतरं तु ज्ञानेन नियमैः कृत्यमस्ति यमाश्च स्वत एव स्युः अतस्तदा लिंगादिभिः प्रयोजनाभावाल्लोकसंग्रहार्थं धारयेद्वा त्यजेदिति वा ९ तस्यैव ज्ञानदार्ढ्याभावे योगभ्रंशपरिहारार्थमाह न बहिर्व्यक्तं लिंगं यस्य व्यक्तोऽर्थः प्रयोजनमात्मानुसंधानं यस्य सः मनीष्यपि उन्मत्तवद्बालवत् कविरपि मूकवदात्मानं नृणां दृष्ट्या दर्शयेत् तेषां ज्ञानादिरूपमन्यत्र न तथा वर्तेत

न यतेराश्रमः प्रायो धर्महेतुर्महात्मनः शांतस्य समचित्तस्य बिभृयादुत वा त्यजेत् ९ अव्यक्तलिंगो व्यक्तार्थो मनीष्युन्मत्तबालवत् कविर्मूकवदात्मानं स दृष्ट्या दर्शयेन्नृणां १० अत्राप्युदाहरंतीममितिहासं पुरातनं प्रह्लादस्य च संवादं मुनेराजगरस्य च ११ तं शयानं धरोपस्थे कावेर्यां सह्यसानुनि रजस्वलैस्तनूदेशैर्निगूढामलतेजसं १२ ददर्श लोकान्विचरन् लोकतत्त्वविवित्सया वृतोऽमात्यैः कतिपयैः प्रह्लादो भगवत्प्रियः १३ कर्मणाकृतिभिर्वाचा लिंगैर्वर्णाश्रमादिभिः न विदंति जना यं वै सोऽसाविति न वेति च १४ तं नत्वाभ्यर्च्य विधिवत्पादयोः शिरसा स्पृशन् विवित्सुरिदमप्राक्षीन्महाभागवतोऽसुरः १५ बिभर्षि कायं पीवानं सोद्यमो भोगवान्यथा वित्तं चैवोद्यमवतो भोगो वित्तवतामिह भोगिनां खलु देहोऽयं पीवा भवति नान्यथा १६ न ते शयानस्य निरुद्यमस्य ब्रह्मन्नु हार्थो यत एव भोगः
हे अभोगिनोऽयं तव विप्र देहः पीवा यतस्तद्वद नः क्षमं चेत् १७ ॥ ॥

स दृष्ट्येति पाठे वा आत्मानं यथा नाभावितेनेत्यर्थः १० परमहंसधर्ममेवेतिहासेन स्फुटयति अत्रापीति यावदध्यायसमाप्ति अजगरवृत्तस्य मुनेश्च ११ धरोपस्थे भूपृष्ठे सह्यस्य सानौ रजस्वलैः रजोभिर्धूसरैः तनूदेशैः देहावयवैर्निगूढममलं तेजो यस्य तम् १२ कर्मादिभिर्जना यं न विदुः तं पादयोः शिरसा स्पृशन् नत्वा अभ्यर्च्य अप्राक्षीदित्यन्वयः १४ १५ उद्यमसहित इव भोगवानिव पीवानं स्थूलं देहं धारयसि तत्र हेतुं वदेति तृतीयेनान्वयः १६ उद्यमं मे वित्तं न च मम भोगोऽस्तीति चेत्तत्राह वित्तं चेति उ इति निश्चये खलु इति प्रसिद्धौ तत्त्वार्थो नास्तीति प्रसिद्धमेवेत्यर्थः यतो नार्थो देवयत्नो हेतोः पीवा तत्क्षमं योग्यं चेत् १७

राम॰
१५

किंवविज्ञार्जनायसमर्थोप्ययं जनदर्शनगुरुत्वयमं करोति नेत्यसमर्थोपि किमिति न करोषीत्याह कोविर्विद्वान्कले
वरः निपुणतरः चनगाविन्नः श्रियाः लोकरंजनाकथायस्यनयापि लोकस्यकर्मठ्वतः सेनः श्रोवेनहीप्तितापि
कानन्नसर्वप्रपन्नपिवठोनरनहोश्चितन कर्मनदेतिनोषिवानवास्तोषीत्यर्थः २८ तस्यवागेवाशृतंतेनयंत्रितोव
शीकृतः सन् १९ अथात्मवदलाषाश्रनर्दश्याभगवांदेवश्रायोगाज्ञानिनोमसनोनत्वभवाइदमिति यदुक्तनदेवाह
गुणानामीहोपरमयोः प्रवृत्तिनिवृत्त्योःफलानिश्यानिफलानीत्यर्थः २० वेदनचरेहनः यस्पैनिसदिपविषः सन्ज्ञानेनुनी
ति मुर्कोयथावहिर्षीति २१ यथाश्रुतमित्योद्दत्यपरिहागपोरन्न २२ लोकःकर्मसुप्रवर्ततवेवनहनः सन् किंशेष

कोविकल्पोनिपुणादकुचिन्नप्रियकथस्यमः लोकस्यसर्ववतःकर्मचोषीतहीप्तितापिवा २७ नारद
उवाच सइत्थंदेवपतिनापरिपृष्टोमहामुनिः स्मयमानस्तमप्याहमहागशृत्यंत्रितः २८ ब्रह्मणा
उवाच देवदेवस्तवश्रेष्ठभवान्नन्वार्थसमतः ईहोपरमयोर्न्हणांयदान्यध्यात्मवदलाषा २९ यस्यनाम्रा
यणोदेवोभगवान्हृद्गतःसदा भक्त्याकेवलयाज्ञानधुनानिकामककर्मवत ३० अथापिरूमहेय
श्चात्मवशाजनवयाश्रुतं संभाषणीयोहिभवानात्मनःशुद्धिमिच्छता ३१ नतत्ययाभववाहिन्यायोर
षेकामैरहूरया कर्मणाकार्यमानोहंनानायोनिषुयोजितः ३२ यदृच्छयात्नोकमिमंप्रापितःकर्म
भिर्भ्रमन् स्वर्गापवर्गयोर्द्वारतिरश्चांपुनरस्यच ३३ अत्रापिदंपतीनोचसत्वायायान्यायत्रवेय कर्मा
णिकुर्वतादद्वानिहतोसिविपर्ययं ३४ स्तवमस्यांमनोरूपेसर्वेहोपरतिस्तव मनःस्पर्शजानहद्वा

इतियदुयतनेनत्राह नतस्येनिवर्तत्भिः भवप्रवाहकारणावर्योचिनैरपिविषयैः हरयितमशक्यंयात् सकर्मसु
प्रवर्तमानोहंसर्वनानायोनिषुयोजितः प्रवेशितः ३२ तेयेवेमलोकमनुष्यलोकयदृच्छयाप्रापितः कथंभूतंलोकं
धर्मेणस्वर्गस्यद्वारंयतनमधर्मेणतिरश्चास्तकादियोनिषुद्वारंमिश्राभ्यांपुनरपस्यमनुष्यत्वस्यधारंसर्वतोनिवृत्त्या
अपवर्गस्यद्वारमित्यर्थः ३३ अत्रापिमनुष्यत्वेपिप्रसन्नापन्नमयोदुःखनिवृत्त्योविपर्ययदद्वानिवृत्तोस्मि ३४ अ
हन्तकदाचित्स्वखस्यादपिनिवृत्तस्यानातविंस्यादितिवेनत्राह स्तवमस्यामीवस्यस्वरूपमेव नहिकिंनप्रका
श्रानेनत्राह संर्वनिननोमीतिनत्वः सर्वक्रियानिवृत्तोसत्तपवप्रकाशानइत्यर्थः भोगास्तुमनःस्पर्शजान्मनोरथ
मात्रजान्न अन्याश्चनानदृश्वास्वशामितिरुपेमासीनर्थः नहिकदाचित्तथ्यदः नत्राहसंविशतप्रारब्धभोगांश्च

एवं चेत्तर्हि कोपि संसारं प्राप्नुयात्तत्राह इत्येतदात्मनः सुखात्मकरूपं स्वार्थं स्वस्मिन्नेव सन्तः पुरुषार्थं विस्मृत्य प्र
सत्यपि द्वैते २७ एतदेव सदृष्टान्तेन स्पष्टयति जलमिति तदुद्भवैः तृणशैवलादिभिः जलकाम्यया जलेच्छया
सन्नः आत्मस्वरूपादन्यत्र पुरुषार्थं पश्यन् २८ एवं स्वस्यानिरूपमत्वे कारणमुक्त्वा विपर्यये हेतुनियत्युक्ते नदिह
ण्णाति देहादिभिरिति पंचभिः ईहतः अनीशस्य तिरे दैवस्य अनः क्रिया मेघा विफला एव भवंति क्रियाणां सका
लत्वेपि निष्फलस्यानुपर्यायं निर्देवस्य गमाह आध्यात्मिकादिभिरिति मर्त्यस्य मरिष्यतः कृच्छ्रेण दुःखेनोपनतैः प्राप्तैः
२१ हेतुकं विनैव प्राप्तेर्यर्थेर्दुःखं खं तद्दर्शयत्याह पश्यामीति ३१ भवं प्रपंचयति राजत इति स्वस्मात्स्वयमेव च

इत्येतदात्मनः स्वार्थं सन्तं विस्मृत्य वै पुमान् विचित्रामसति द्वैते घोरामाप्नोति संसृतिं २७ जलं तदु
द्भवैश्छन्नं हित्वाज्ञो जलकाम्यया मृगतृष्णामुपाधावेद्यथान्यत्रार्थदृक्स्वतः २८ देहादिभिर्दैवतं
त्रैरात्मनः सुखमीहतः दुःखात्ययं चानीशस्य क्रिया मोघाः कृताः कृताः २९ आध्यात्मिकादिभिर्दुःखै
रविमुक्तस्य कर्हिचित् मर्त्यस्य कृच्छ्रोपनतैरर्थैः कामैः क्रियेत किं ३० पश्यामि धनिनां क्लेशं लुब्धाना
मजितात्मनां भयादलब्धनिद्राणां सर्वतोभिविशंकिनां ३१ राजतश्चौरतः शत्रोः स्वजनात्पशुपक्षितः
अर्थिभिः कालतः स्वस्मान्नित्यं प्राणार्थवद्भयं ३२ शोकमोहभयक्रोधरागक्लैब्यश्रमादयः यन्मूलाः
स्युर्नृणां जह्यात्स्पृहां प्राणार्थयोर्बुधः ३३ विरागः सर्वकामेभ्यः शिक्षितो मे मधुव्रतात् कृच्छ्राप्तं
मधुवद्वित्तं हत्वाप्यन्यो हरेत्पतिं ३४ मधुकारमहासर्पौ लोकेस्मिन्नो गुरूत्तमौ वैराग्यं परितोषं च
प्राप्ता यच्छिक्षया वयं ३५ अनीहः परितुष्टात्मा यदृच्छोपनताहं नो चेच्छये बह्वहानि महाहिरिव
सत्त्ववान् ३६ क्वचिदल्पं क्वचिद्भूरि भुंजेन्नं स्वाद्वस्वादु वा क्वचिद्भूरि गुणोपेतं गुणहीनमुत क्वचित् ३७

यं विस्मृत्य भोगविस्मरणादिनानाशः स्यादिति प्राणावतामर्थवतां च भयं नित्यं ३२ अतोन्यनर्थहेतुत्वात्प्राणार्थयो
र्वा स्पृहा न कार्येत्याह शोकेति ३३ ननु त्वमनर्थमनुभवतोपि न केचिद्विरज्यंते तेन वय यालाभेनानन्देषाति त्वं न क
थं वैराग्यादिकं प्राप्तोसि तत्राह मधुकरेति मधुमक्षिका अजगरो ययोः शिक्षया अहं तत्पर्यालोचनया ३४ मधुकराच्छि
क्षितमाह विराग इति वित्तपतिं दातृत्वान्यो वित्तं दद्यादिति वेत्युजगरादिशिक्षितमाह अनीह इति सत्त्ववान् धैर्य
वान् ३६ पीनत्वे हेतुः...... इयदृच्छया प्राप्तमात्र परितोषं प्रपंचयति क्वचिदल्पमिति षड्भिः ३७ ॥ ॥

वीरं जीर्णवस्त्रखंडे वसे परिदधे हि ... प्रारब्धभोगी ३८ प्रासादमयो मंचके तल्पापि वा कशिपो ३९ वरे विचरामि
वा विदिक्षु ग्रहवद्दिगंबरो विचरामि ४० न ... नायमानव वर्णं प्रमवद्वैषम्यमित्याह नाहंनिंदामि महात्मनि विलो
४१ एवंभूतत्वेन स्थितान् उपायमाह विकल्प ... भ्रांचित्तो भेदग्राहकमनोहत्तो ग्रर्थरूपो विभ्रमो यस्मिंस्तस्मिन्वैकारिके अहं
कारे एतं गृहस्य अनेन तं महत्तत्वद्वारेण स्तार्थः ४३ पश्य ... पश्यतीति नय ४४ मेदं हृष्टालोकशास्त्राभ्यां
येतं नूनं तत्र दृष्टाय तो भवान् भगवत्परः ४५ इति श्रीभावार्थदीपिकायां सप्तमे त्रयोदशः १३ चतुर्दशे गृहस्थस्य परमोथ
मीर्यते देशकालादिभेदेन पुनः श्रेयो विशेषहातं १ गृहस्थस्य मुमुक्षोर्मोदेपनीयत्वं तरंगत्वेन प्रथमं वनस्थयतिथ

श्रद्धयोपहृतं क्वापि कदाचिन्मानवर्जितं भुंजे भुक्त्वाथ कस्मिंश्चिद्दिवानक्तं यदृच्छया क्षौमं दुकूलमा
जिनं चीरं वल्कलमेव वा वसेन्यदपि संप्राप्तं दिष्टभुक्तुष्टधीरहं ३८ क्वचिच्छये धरोपस्थे तृणपर्णा
श्मभस्मसु क्वचित्प्रासादपर्यंके कशिपौ वा परेच्छया ३९ क्वचित्स्नातोऽनुलिप्तांगः सुवासाः स्रग्व्य
लंकृतः रथेभाश्वैश्चरे क्वापि दिग्वासा ग्रहवद्विभो ४० नाहं निंदे न च स्तौमि स्वभावविषमं जनं एते
षां श्रेय आशासे उतैकात्म्यं महात्मनि ४२ विकल्पं जुहुयाच्चित्तौ तां मनस्यर्थविभ्रमे मनो वैकारि
के हुत्वा तं मायायां जुहोत्वनु ४३ आत्मानुभूतौ तां मायां जुहुयात्सत्यदृङ्मुनिः ततो निरीहो विरमेत्स्वा
नुभूत्यात्मनि स्थितः ४४ स्वात्मवृत्तं मयेत्थं ते सुगुप्तमपि वर्णितं व्यपेतं लोकशास्त्राभ्यां भवान्हि भग
वत्परः ४५ नारद उवाच धर्मं पारमहंस्यं वै मुनेः श्रुत्वासुरेश्वरः पूजयित्वा ततः प्रीत आमंत्र्य प्रययौ
गृहं ४६ इति श्रीभागवते सप्तमस्कंधे त्रयोदशः १३ युधिष्ठिर उवाच गृहस्थ एतां पदवीं विधिना येन चांजसा
याति देवऋषे ब्रूहि मादृशो गृहमूढधीः १ नारद उवाच साधु पृष्टं महाभाग लोकानामनुगृह्णता ना
दिवनदहवदानेध ... र्म्येण कर्मणा २ गृहेष्ववस्थितो राजन् क्रियाः कुर्वन् गृहोचिताः वासुदेवार्पणं

मैथुनादिहितेषु तद्धिं गृहस्थस्य मोक्षो न स्यादिति शंकितं विद्वान् प्रश्नानि गृहस्थस्य इति १ तस्य मोक्षधर्मं आह गृहेष्वित्यादि
यावदध्याय समाप्ति साक्षादासुदेवार्पणं यथा भवति एवं कुर्वन् उपासीत २ स्वयमेव मुच्यमानेषु विमुच्यमानेषु यथा उ
त्थितः पुमान् स्वप्नदृष्टजायादिषु संगं विमुंचति तद्वत् ४ ॥

नन्वेवंभूतस्य गुणैरभिभूयमानस्य कुतो गृहे विनाः क्रियास्तुः तत्राह यावदर्थमिति त्रिभिः अन्तरनासक्तः बहिस्त्वा
सक्त इव नृलोके जनमध्ये नरतां मानुष्यं न्यस्येत् पुरुषकारमाविष्कुर्यादित्यर्थः ५ आग्रहेण ज्ञातीनां कुर्या
दित्याह ज्ञातय इति ६ नन्वेवं सर्वानुमोदने विविदम्प्रसंगात् कुतो जीवनं कुतो वा कर्मकारणं तत्राह दिव्यं हि
वृष्ट्यादिभिर्जातं तथान्यादि भौमं निधानादि अन्तरिक्षमकस्मादेवं प्राप्तं एवं सर्वमप्यच्युतनिमित्तं देवलब्धं यत्
एतेन सर्वान्निर्वाहयेदि ७ दैवात्प्रतिलाभे ज्ञातेऽपि तत्राभिमानो न कार्य इत्याह यावद्ध्रियेतेति भ्रियेत पूर्यते ८ यत्र
एवं यत्किमपि स्वगृहे हन्ते वा अश्वविषयभुञ्ज्या तेनैनं निवारयेदित्याह मृगोष्ट्रेति मर्कटः सरीसृपः सर्पः मक्षिकाश्च

यावदर्थमुपासीनो देहे गेहे च पण्डितः विरक्तो रक्तवत्तत्र नृलोके नरतां न्यसेत् ५ ज्ञातयः पितरौ पुत्रा
भ्रातरः सुहृदोऽपरे यद्वदन्ति यदिच्छन्ति चानुमोदेत निर्ममः ६ दिव्यं भौमं चान्तरिक्षं वित्तमच्युतनि
र्मितं तत्सर्वमुपभुञ्जान एतत्कुर्यात्स्वतो बुधः ७ यावद्भ्रियेत जठरं तावत्स्वत्वं हि देहिनां अधिकं
योऽभिमन्येत स स्तेनो दण्डमर्हति ८ मृगोष्ट्रखरमर्काखुसरीसृप्खगमक्षिकाः आत्मनः
पुत्रवत्पश्येत्तैरेषामन्तरं कियत् ९ त्रिवर्गं नातिकृच्छ्रेण भजेत गृहमेध्यपि यथादेशं यथाकालं
यावद्दैवोपपादितं १० आश्वाघान्तेऽवसायिभ्यः कामान्संविभजेद्यथा अप्येकामात्मनो दारां नृणां
स्वत्वग्रहो यतः ११ जह्याद्यदर्थे स्वप्राणान्हन्याद्वा पितरं गुरुं तस्यां स्वत्वं स्त्रियां जह्याद्यस्तेन
ह्यजितो जितः १२ कृमिविड्भस्मनिष्ठान्तं क्वेदं तुच्छं कलेवरं क्व तदीयरतिर्भार्या क्वायमात्मा नभः

मेः पुत्रैः एषां मृगादीनां ९ अतिकृच्छ्रेणात्यन्तं न भजेत् किं तु यावद्दैवप्रापितं तावदेव भजेत् १० श्वानश्चाद्या
श्वपतिताः अन्तेवसायिनश्चण्डालादयः तानभिव्याप्य यथायथार्हं कामान्संविभजेत् स्वभोगान्विभज्य दद्यात्
यद्यप्येकैवात्मनो दाराः भार्या तस्यामपि यथा शुश्रूषणोऽतिवृत्तायास्तस्य शुश्रूषा हीयेत यथा च नृणां स्वत्वग्रहः म
मैवेयमित्याग्रहः तामेकामपि संविभजेत् अतिथ्यादिशुश्रूषणे तां नियुञ्जीतेत्यर्थः ननु न्याय्यमेतत् न यथार्हं सं
विभजेदित्युक्तत्वात् ११ एवं चेत्तेन स्वरोवशीकृतः स्यादित्याह यदर्थे इति त्रिभिः १२ कथमेव तस्यां स्वत्वाभिमा
नो हेयः यतः तत्र विचारयन्नाह कृमिविड्भस्मनिष्ठापर्यवसानं मतोयस्य तदीया देहा भार्या रतिर्यस्यास्सा समहि

किंवसिद्धैर्देवलब्धैः यज्ञावशिष्टार्थैः पंचयज्ञशेषैरन्नादिभिः महत्तानिहृत्वानां १४ यतद्धिहृएवन्नाह देवादीनां
चयज्ञदेवताः आत्मानंचपवंसषक्‌ ७रुषमंतर्यामिणमेवयजेत्‌ १५ ननुवनरतिनिर्बोधोयज्ञार्थकार्यइत्याह ना
हीतिविंप्रशुखेहूनैरन्नादिभिर्यथाइज्येतहूज्येननतथाअग्निमुखतोहविषाइज्येत १६ ब्राह्मणेषुदेवेषुपंचयज्ञदेव
तास्वमर्त्यादिषुअन्येषुपश्चादिषुवदेवशेषंयतर्यामिणंब्राह्मणेनतमर्त्यादियजनेब्राह्मणायजनानंतरं अन्येषुयज्ञ नरेश
स्वपाठांतरेब्राह्मणाग्रानन्नेयस्तने १८ प्रोष्ठपदेयाभाद्रपदे १९ २० शुक्लपदेश्रद्दायत्‌नीयायामित्यर्थः हेमंते
शिशिरेचमार्गशीर्षादिमासचतुष्टयेपियाः तिस्रोष्टकास्ता २१ संपूर्णाचेद्रापौर्णमासीराकान्यूनचंद्रासेवानुम

सिद्धैर्यज्ञावशिष्टार्थैःकल्पयेद्वृत्तिमात्मनः शेषेस्वत्वंत्यजन्प्राज्ञःपदवींमहतामियात्‌ १४ देवांश्च
षींन्पूज्यानिपितॄनात्मानमन्वहं स्ववृत्त्यागतवित्तेनयजेतपुरुषंपृथक्‌ १५ यर्ह्यात्मनोधिकाराद्याः
सर्वाःस्युर्यज्ञसंपदः वैतानिकेनविधिनाअग्निहोत्रादिनायजेत्‌ १६ नह्यग्निमुखतोयंवैभगवान्सर्व
यज्ञभुक्‌ इज्येतहविषाराजनयथाविप्रमुखेहुतैः १७ तस्माद्ब्राह्मणदेवेषुमर्त्यादिषुयथार्हतः तै
स्तैःकामैर्यजस्वैनंक्षेत्रज्ञंब्राह्मणानतु १८ कुर्यादपरपक्षीयंमासिप्रोष्ठपदेद्विजः श्राद्धंपित्रोर्यथा
वित्तंतद्बंधूनांचवित्तवान्‌ १९ अयनेविषुवेकुर्याद्व्यतीपातेदिनक्षये चंद्रादित्योपरागेचद्वादश्यांश्र
वणेषुच २० तृतीयायांशुक्लपक्षेनवम्यामथकार्त्तिके चतसृष्वप्यष्टकासुहेमंतेशिशिरेतथा २१
माघेचसितसप्तम्यांमघाराकासमागमे राकयाचानुमत्यावामासर्क्षाणियुतान्यपि २२ द्वादश्यामनु
राधास्यात्‌श्रवणस्तिस्रउत्तराः तिसृष्वेकादशीवासुजन्मर्क्षश्रोणयोगयुक्‌ २३ तएतेश्रेयसःका
लानृणांश्रेयोविवर्द्धनाः कुर्यात्सर्वात्मनैतेषुश्रेयोमोघंतदायुषः २४ एषुस्नानंजपोहोमोव्रतंदेवद्वि

मतिः तथामासर्क्षाणितत्तन्मासनामप्रवृत्तिनिमित्तानिनक्षत्राणियुतानियदास्युः तदातद्युक्तेतिकाश्रोणयश्र
वणेपौर्णमासीपौषीमासेपौषीमासेनयत्रमनाम्नासपौषीमाघामाघीश्रैवमेकादश्यापरइति २२ अनुराधाश्रवणउत्तरा
फाल्गुनीउत्तराषाढाउत्तराभाद्रपदाद्वादश्यांवाद्वादशीस्यात्‌ आसूत्तरासूएकादशीवायदास्यात्‌ तदाचजन्मर्क्षश्रो
णयोगयुक्‌ जन्मनक्षत्रस्यश्रवणस्यवायोगेनदिनेयदायोगग्रहणांसंबंधवाद्यत्वार्थ २३ नकेवलंश्रेयसेवेते
कालाः किंतुधर्मस्याक्षय्यत्वायाह तएतइतिद्वाभ्यांतदैवश्रायुषःअमोघंसाफल्यमित्यर्थः २४ २५ ॥ ॥

श्री॰
भा॰ स्क॰
टी॰
७

संस्कारकाल इति जायायाः पुंसवनादिः अपत्यस्य जातकर्मादिः आत्मनो यज्ञदीक्षादिः प्रेतसंस्था दहनादि मृताहः सांवत्सरिकं यदा अन्यस्मिन्नपि अभ्युदयार्थे कर्मणि श्रेयः कुर्यादित्यन्वयः २६ यत्र यस्मिन्सर्वमेतच्चराचरं तस्य भगवतो बिम्बं रूपं सत्पात्रं यत्र लभ्यते स वै पुण्यतमो देशः २७ अर्हैर्हरन्नमैराश्रितानि २८
२९ सीतायारामस्यवाश्रमआदिर्येषां ह्ययोध्यादयः ग्रहणं वियोगकालाभिप्रायेण ३१ अर्चाश्रिताश्चार्चास्थि

संस्कारकालो जायाया अपत्यस्यात्मनस्तथा प्रेतसंस्था मृताहश्च कर्मण्यभ्युदये नृप २६ अथ देशान्प्रवक्ष्यामि धर्मादिश्रेयआवहान् स वै पुण्यतमो देशः सत्पात्रं यत्र लभ्यते बिम्बं भगवतो यत्र सर्वमेतच्चराचरं २७ यत्र ह ब्राह्मणकुलं तपोविद्यादयान्वितं यत्र यत्र हरेरर्चा स देशः श्रेयसां पदं २८ यत्र गङ्गादयो नद्यः पुराणेषु च विश्रुता सरांसि पुष्करादीनि क्षेत्राण्यर्हाश्रितान्युत २९ कुरुक्षेत्रं गयशिरः प्रयागः पुलहाश्रमः नैमिषं फाल्गुनं सेतुः प्रभासोऽथ कुशस्थली ३० वाराणसी मधुपुरी पम्पा बिन्दुसरस्तथा नारायणाश्रमो नन्दा सीतारामाश्रमादयः ३१ सर्वे कुलाचला राजन् महेन्द्रमलयादयः एते पुण्यतमा देशा हरेरर्चाश्रिताश्च ये ३२ एतान्देशान्निषेवेत श्रेयस्कामो ह्यभीक्ष्णशः धर्मो ह्यत्रेहितः पुंसां सहस्राधिफलोदयः ३३ पात्रं त्वत्र निरुक्तं वै कविभिः पात्रवित्तमैः हरिरेवैक उर्वीश यन्मयं वै चराचरं ३४ देवर्ष्यर्हत्सु वै सत्सु तत्र ब्रह्मात्मजादिषु राजन्यदग्रपूजायां मतः पात्रतयाच्युतः ३५ जीवराशिभिराकीर्ण अण्डकोशाङ्घ्रिपो महान् तन्मूलत्वादच्युतेज्या सर्वजीवात्मतर्पणं ३६ पुराण्यनेन सृष्टानि नृतिर्यगृषिदेवताः शेते जीवेन रूपेण पुरेषु पुरुषो ह्यसौ ३७ ।

रा प्रतिमाश्रिताः पूर्वं तु सालग्रामशिलाद्यर्चनदेशा उक्ताः इत्यपौनरुक्त्यं ३२ अत्र एषु देशेषु ईहितः कृतः सहस्रगुणमधिकस्य फलस्य उदयो यस्मात् तथा पात्रविचारे हरिरेव पात्रत्वेन निर्णीत इत्याह हरिरेवेति देवेषु ऋषिषु च अर्हत्सु च नयोगादिसिद्धेषु ब्रह्मात्मजादिषु सनकादिषु सनकादिष्वपि सत्सु तत्र तत्र युधिष्ठिरराजसूये यदग्रपूजायां अच्युत एव पात्रतया संमतः ३५ संमतत्वे हेतुमाह जीवराशिभिर्व्याप्तो ब्रह्माण्डकोशपादपो यस्याङ्घ्रिपः सर्वजीवानामात्मा तानस्तु तर्पणं ३६ एतदेव प्रकटयन्निरूपयाह पुराणीति नृतिर्यगादिरूपाणि पुराणि शरीराणि तेषु तर्पणमित्युपपादयन् शेतेऽतः पुरुष इति प्रसिद्धः ३७ ॥

राम॰
३८

न्नानरम्योनितिर्यगादिभ्यः पुरुषश्रेष्ठस्मादाधिक्येनवर्ततेतेनस्मात्पुरुषः पात्रंतत्रापियावानात्मज्ञानोद्गमः यथा
ईयतेतपआदियोगेनयत्रयत्रप्रतीयतेतेनयानयासौपात्रमित्यर्थः तथाचश्रुतिः पुरुषत्वेवाविस्तरमात्मेत्या
दि ३८ तर्हिप्रतिमादौहरेः पूजांकिमितिकुर्वंतितत्राह दृष्ट्वेतिद्वाभ्यांमिथोवज्ञानमवमानंतस्मिन्नात्मा बुद्धि
र्येषांतेषांभावंदृष्ट्वाक्रियायैपूजाद्यर्थं ३९ हरिमुपासते उपासितापि अर्चापुरुषद्वेषिणामर्थदानभवति
पुरुषद्वेषहित्वार्चितासतीपापिदासंदाधिकारिणोपुरुषार्थप्रथाभवतीत्येवेत्यर्थः ४० पुरुषेष्वेवज्ञात्यातप
आदिभिस्तुपुनर्विशेषांतरमाह पुरुषेष्वपीतियोधत्तेतंसुपात्रंविदुः ४१ एतदेवकैमुत्यन्यायेनद्रढयतिनन्वस्ये

नेष्वेवभगवान्राजन्तारतम्येनवर्तते तस्मात्पात्रंहिपुरुषोयावानात्माययेयते ३८ दृष्ट्वातें
षांमिथोनृणामवज्ञानात्मतांनृप त्रेतादिषुहरेरर्चाक्रियायैकविभिःकृता ३९ ततोर्चायां
हरिंकेचित्संश्रद्धायसपर्यया उपासतउपास्तापिनार्थदापुरुषद्विषां ४० पुरुषेष्वपिराजेंद्रसुपात्रं
ब्राह्मणंविदुः तपसाविद्ययातुष्ट्याधत्तेवेदंहरेस्तनुं ४१ नन्वस्यब्राह्मणाराजन्कृष्णस्यजगदा
त्मनः पुनंतःपादरजसात्रिलोकींदैवतंमहत् ४२ इतिश्रीभागवतेसप्तमेचतुर्दशोध्यायः १४
नारदउवाच कर्मनिष्ठाद्विजाःकेचित्तपोनिष्ठानृपापरे स्वाध्यायेन्येप्रवचनेकेचिज्ज्ञानयोगयोः
१ ज्ञाननिष्ठायदेयानिकव्यान्यानंत्यमिच्छता दैवेचतदभावेस्यादितरेभ्योयथार्हतः २ द्वौदैवेपि
तृकार्येत्रीनेकैकमुभयत्रवा भोजयेत्सुसमृद्धोपिश्राद्धेकुर्यान्नविस्तरं ३ देशकाला संप्राप्तम

ति ४२ इतिश्रीभावार्थदीपिकायांसप्तमेचतुर्दशः १४ ततःपंचदशेसर्ववर्णाश्रमनिबंधनं सरतःसंग्रहेणा
थवर्णयत्नेमोक्षलक्षणं सर्वेषामपिमोक्षधर्माणांसारसंग्रहार्थमध्यायारंभः तत्रश्राद्धगतान् विशेषानाह
द्वाभ्यां कर्मनिष्ठाइति स्वाध्यायादिषुपरिनिष्ठितानाइतिशेषः १ कव्यानिपित्र्यद्रव्याणिदैवेचद्रव्याण्यपितेभ्यो
देयानियथार्हंतइतिसर्वत्रज्ञानादितारतम्येन २ ३ ननुविस्तारःकुतःप्राप्तः येननिषिध्यतेतत्राह स्व
जनानामर्चणात् ज्ञामातादेवतिमन्त्रणेततविसारयः कथंवर्ज्योइत्यपेक्षायामाहदेशकालादित्यर्थः ४ ॥ ॥

श्री० भा० स० टी० ५६

मन्यन्ते श्रवणं श्रीभागवतादि हरिदैवतं हृदयेन निवेदितं सत् ५ पुरुषात्मकं ईश्वररूपं ६ । देहस्य न्यासः हिंसायाः त्यागो
यः एतादृशो अन्यो नास्ति ८ अतिप्रवीणमाधिकारिणो बाह्यानि कर्माणि त्यजन्तीत्याह एक इति अनीहा निष्कामाः र
ज्ञानदीपनी या आत्मस्फूर्तिः मति आत्मसंयमने जुह्वति मनोनियमनदेवतायां तया त्यजन्तीत्यर्थः तदुक्तं सर्वज्ञसूक्तैः
प्रत्यक्स्फूर्तिरसंस्फूर्तिर्नात्र निष्ठा विद्यात्मके संलक्ष्यं सन्त्यजेत् कर्म त्यजन् विघ्नहतो न याति ९ मामायं धर्मे हन्या
दिति कृतः अकरुणो न तज्ज्ञः अस्तु नृपप्राणतर्पकः ननु किं यतन्तः आत्मतत्त्वानभिज्ञः तया च असुतृप् नितरां विद्वानपरः
मा जानात्यत्र अमुष्मात् कर्मतोऽपि वनीहारेण आह तस्माद्दैवा सन्तुष्टः आसस्त्वरं नीति ११ अस्त्वन्तमन्त्ववर्णयति नसे

देशकालोचितश्रद्धाद्रव्यपात्रार्हणानि च सम्यग्भवन्ति नैतानि विस्तरात्स्वजनार्पणात् ५ देवर्षि
पितृभूतेभ्य आत्मने स्वजनाय च अन्नं संविभजन्पश्येत्सर्वं तत्पुरुषात्मकं ६ न दद्यादामिषं श्राद्धे न
चाद्याद्धर्मतत्त्ववित् मुन्यन्नैः स्यात्परा प्रीतिर्यथा न पशुहिंसया ७ नैतादृशः परो धर्मो नृणां सद्धर्ममि
च्छतां न्यासो दण्डस्य भूतेषु मनोवाक्कायजस्य यः ८ एके कर्ममयान्यज्ञान्ज्ञानिनो यज्ञवित्तमाः
आत्मसंयमनेऽनीहा जुह्वति ज्ञानदीपिते ९ द्रव्ययज्ञैर्यक्ष्यमाणं दृष्ट्वा भूतानि बिभ्यति एष माकरु
णो हन्यादतज्ज्ञो ह्यसुतृप्ध्रुवं १० तस्माद्दैवोपपन्नेन मुन्यन्नेनापि धर्मवित् सन्तुष्टोऽहरहः कुर्यान्नि
त्यनैमित्तिकाः क्रियाः ११ विधर्मः परधर्मश्च आभास उपमा छलः अधर्मशाखाः पञ्चेमा धर्मज्ञोऽधर्म
वत्त्यजेत् १२ धर्मबाधो विधर्मः स्यात्परधर्मोऽन्यचोदितः उपधर्मस्तु पाखण्डो दम्भो वा शब्दभिच्छलः १३

दिति अधर्मवत् साक्षान्निषिद्धवत् १२ क्रममानाद्यरूपं चापि व्याचष्टे धर्मबाधः धर्मबुद्ध्यापि यस्मिन् क्रियमाणे
स्वधर्मबाधः अन्यस्य चोदितोऽन्यस्य परधर्मः उपमेति व्याचष्टे इति पाठे धर्मस्त्विति शाङ्गसाम्यमितिभेदः अन्यथा व्याख्याने य
स्मिन् यथा दश ब्राह्मणान् भोजयेदित्युक्ते दशभ्यो वराणि निति शब्दभित् इति पाठे धर्मशाह्नमात्रं विभनक्तीति यथा गोदद्यादि
त्यादौ गोसदृशं गवादीनं १३ स्वधर्मो वहानानन्तरे धर्मः भूयस्त्वार्यमपि परधर्मो नानुष्ठेयः अतत्परयोगादिना
ह्स्वभावविहित इति १४ ॥

राम० ५१

किंच अधनो धर्मार्थं धनं नेहेत धनार्थेन याचितेन इति वादे द्वेषोपपत्तेर्नैव स्वधर्मसिद्धेरुक्तत्वात् यात्रार्थमपि नेहेत
नत्वेवं यात्रार्थं नेहेत इत्यत्र हेतुमाह षड्भिः १५ १६ उपानहौ पादयोर्यस्य उपानत्पादस्तस्य १७ गृहपालः श्वा तद्वदाच-
रति १८ १९ क्षुत्तृड्भ्यां जलेनान्नेन च कामस्यांतं याति अन्नोदकाभ्यां कामस्य नाभावात् क्रोधस्य चांतं याति
फलस्य क्रोधस्य फलं हिंसा तस्योदयात् विषयैः दिशो जित्वापि भुवो भुक्त्वापि लोभस्य नैवांतं याति न स्पृहः २०
२१ इदानीं कामादिजयोपायानाह असंकल्पादिभिः नवभिः जयेदिति यथायोग्यमन्वेति अर्थे अनर्थदर्शनेन तत्त्वा-
वमर्शनात् अद्वैतेनानुसंधानेन २२ आन्वीक्षिक्या आत्मानात्मविवेकेन महतां सात्त्विकानां सेवया योगस्यांतरायान्

धर्मार्थमपि नेहेत यात्रार्थं वाधनो धनं अनीहानीहमानस्य महाहेरिव वृत्तिदा १५ संतुष्टस्य निरी-
हस्य स्वात्मारामस्य यत्सुखं कुतस्तत्कामलोभेन धावतोर्थेहया दिशः १६ सदा संतुष्टमनसः स-
र्वाः शिवमया दिशः शर्कराकंटकादिभ्यो यथोपानत्पदः शिवं १७ संतुष्टः केन वा राजन्न वर्तेतापि
वारिणा औपस्थ्यजैह्व्यकार्पण्याद्गृहपालायते जनः १८ असंतुष्टस्य विप्रस्य तेजो विद्या तपो य-
शः स्रवंतींद्रियलौल्येन ज्ञानं चैवावकीर्यते १९ कामस्यांतं च क्षुत्तृड्भ्यां क्रोधस्यैतत्फलोदयात्
जनो याति न लोभस्य जित्वा भुक्त्वा दिशो भुवः २० पंडिता बहवो राजन्बहुज्ञाः संशयच्छिदः सदस
स्पतयोप्येके असंतोषात्पतंत्यधः २१ असंकल्पाज्जयेत्कामं क्रोधं कामविवर्जनात् अर्थानर्थेक्षया लो-
भं भयं तत्त्वावमर्शनात् २२ आन्वीक्षिक्या शोकमोहौ दंभं महदुपासया योगांतरायान्मौनेन हिंसां का-
माद्यनीहया २३ कृपया भूतजं दुःखं दैवं जह्यात्समाधिना आत्मजं योगवीर्येण निद्रां सत्त्वनिषेवया
रजस्तमश्च सत्त्वेन सत्त्वं चोपशमेन च एतत्सर्वं गुरौ भक्त्या पुरुषो ह्यंजसा जयेत् २५ यस्य साक्षाद्भ-

न लोकवार्तादीन् २३ येभ्यो भूतेभ्यो भयं जातं तेष्वेव कृपया हिताचरणेन दैवं देवोपसर्गनिमित्तं ध्यानेन
पीडादिकं तत्केन यावत्स्वल्पेन विषमतावियत्तारंभः ससीदत्सनिमित्तं इति आत्मजं देहजं योगवीर्येण प्राणायामादि-
बलेन सत्त्वनिषेवया सात्त्विकाहारादिना २४ न तत्कथं गुरौ भक्त्या सर्वं स्याज्जयः स्यात् तस्यापि मनुष्यत्वेन तद्वस्था-
ह तत्राह यस्येति भगवान् साक्षाद्धीः मनुष्य इति दुर्बुद्धिः तस्य सर्वं श्रवणादिकं गजस्नानवद्व्यर्थं २६ ॥

ननुगुरोरपिरूपादयः तेनरमेवमन्यंते अतआह एषगुरुः साक्षाद्भगवानेवलोकस्तुनरोसाविति बुद्धिभ्रान्तिरित्यर्थः
यद्वानहितन्मूर्त्तादेर्मनुष्यवद्दृष्टापलीयमानोपिगुरुर्भगवानेवभवेत् यथैषश्रीकृष्णइत्यर्थः २७ एवंसर्वरूपायैःका
मादिवेगंजित्वानियतेंद्रियोभूत्वाध्यानपरोभवेत् अन्यथातत्प्रतिसर्वशास्त्रवैफल्यंस्यादित्याह षड्वर्गेतिसर्वाअपि
नियमचोदनाः इज्यापूर्त्तादिविषयाः षडिंद्रियवर्गस्ययः संयमः तस्मिन्नेवैकस्मिन्नंतोयासांतादृशाइत्यर्थः नवताव
तापिवैरितार्थाइत्याह तदंताः सत्योपियदियोगान् धारणाध्यानसमाधीन् नोवहेयुः नसाधयेयुः तर्हिकेव
लंश्रमावहाएवेत्यर्थः २८ एतदेवदृष्टान्तेनाह यथावार्त्तादयः कृष्यादयअर्थाः तत्फलानिचयोगस्यार्थंमोक्षंनसा

एषवैभगवान्साक्षात्प्रधानपुरुषेश्वरः योगेश्वरैर्विमृग्यांघ्रिर्लोकावैमन्यतेपरं २७ षड्वर्गसंयमैकान्ताः
सर्वानियमचोदिताः तदंतायदिनोयोगानावहेयुःश्रमावहाः २८ यथावार्त्तादयोह्यर्थायोगस्यार्थं
नबिभ्रति अनर्थायभवेयुःस्मपूर्त्तमिष्टंतथासतः २९ यश्चित्तविजयेयत्तःस्यान्निःसंगोपरिग्रहः एको
विविक्तशरणोभिक्षुर्भैक्ष्यमिताशनः ३० देशेशुचौसमेराजन्संस्थाप्यासनमात्मनः स्थिरंसमंसुखं
तस्मिन्नासीतर्ज्वंगओमिति ३१ प्राणापानौसंनिरुंध्यात्पूरकुंभकरेचकैः यावन्मनस्त्यजेत्कामान्स्वनासा
ग्रनिरीक्षणः ३२ यतोयतोनिःसरतिमनःकामहतंभ्रमत् ततस्ततउपाहृत्यहृदिरुंध्याच्छनैर्बुधः ३३
एवमभ्यसतश्चित्तंकालेनाल्पीयसायतेः अनिशंतस्यनिर्वाणंयात्यनिंधनवह्निवत् ३४ कामादिभिर

धयंतिप्रत्युतानर्थायसंसारायैवअस्तनोबहिर्मुखस्येष्टापूर्त्तानोपितथा २९ एवंयोगंयुंजतोपियस्यकुटुंबादिसंगेन
चित्तंविक्षिप्यतेतस्यसंन्यासमाह यश्चित्तस्यविजयेयत्नःउद्युक्तः सभिक्षुःस्यात् संन्यसेत् तथावस्तुति। केवलाहतस्य
हस्योध्यानभंगादिकारणंलक्षयित्वागृहीतसंन्यासेपिविचारयतित्रिभिर्भैक्ष्यमितमशनंयस्य ३० ऋजूनिसमानि
गानियस्यसःस्वस्तिकंयथाभवतितथाआसीनओमित्युच्चारयन्नितिशेषः ३२ ३३ एवमनिशमभ्यसतस्तस्ययतेश्चित्तंनिर्वाणं
प्रशांतिंयाति ३४ नचपुनर्विक्षिप्यतेइत्याहकामादिभिरनभिभूतंयच्चित्तंनचउत्तिष्ठेत् यतःप्रशान्ताअखिलावृत्तयो
यस्यऊनःब्रह्मसुखेनस्पृष्टं ३५ ॥

यस्तु प्रव्रज्योपाहृत्वापि भोगमभिलिप्सुः स्यात् तं निंदति य इति त्रयाणां धर्मादीनां वर्गः आ समंतात् उप्यते यस्मिं
स्तस्मात् गृहात् तान् धर्मादीन् वांताशी कुत्सितभोजी निर्लज्जश्च सः ३६ नचेस्त्राटिनं हृतनाहित्याह यैः पूर्वं स्वदेहः
अनात्मादिरूपः स्मृतः विविंचितः त एवं तु नरैनमात्मेति मत्वा श्लाघयंति श्लाघयंति ३७ यतिरुपलक्षणीहृत्यान्याना
पि स्वधर्मत्यागिनो निंदति गृहस्थस्येति द्वाभ्यां ३८ नन्वात्मनत्वस्य भिक्षोरिंद्रियलौल्यं पिकोदोषस्तत्राह आत्मानं चे
द्वेदस्येवत् जानीयात् ज्ञानेन धुतानि रस्ता आशय्या वासना यस्य तस्य ज्ञानिनो लौल्यमेव न संभवतीत्यर्थः तथा च श्रुतिः
आत्मानं चेद्विजानीयादयमस्मीति पूरुषः किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेदिति ४० अज्ञस्य तु लौल्येन नरकपा

यः प्रव्रज्य गृहात्पूर्वं त्रिवर्गावपनात्पुनः यदि सेवेत तान्भिक्षुः स वै वांताश्यपत्रपः ३६ यैः स्वदेहः स्मृ
तोनात्मा मर्त्यो विट्कृमिभस्मवत् त एनमात्मसात्कृत्वा श्लाघयंति ह्यसत्तमाः ३७ गृहस्थस्य क्रियात्या
गो व्रतत्यागो वटोरपि तपस्विनो ग्रामसेवा भिक्षोरिंद्रियलोलता ३८ आश्रमापसदा ह्येते खल्वाश्र
मविडंबकाः देवमायाविमूढांस्तानुपेक्षेतानुकंपया ३९ आत्मानं चेद्विजानीयात्परं ज्ञानधुताशयः
किमिच्छन्कस्य वा हेतोर्देहं पुष्णाति लंपटः ४० आहुः शरीरं रथमिंद्रियाणि हयानभीषून्मन इंद्रिये
शं वर्त्मानि मात्रा धिषणां च सूतं सत्वं बृहद्बंधुरमीशसृष्टं ४१ अक्षं दशप्राणमधर्मधर्मौ चक्रेभिमा
नं रथिनं च जीवं धनुर्हि तस्य प्रणवं पठंति शरं तु जीवं परमेव लक्ष्यं ४२ ॥ ॥

तात्त्वेन सदा तत्तज्ज्ञाने यतितव्यमिति तत्सामर्थ्यमात्मानं रथिनं विद्धि शरीरं रथमेव तु इत्यादि श्रुत्युक्तरथरूपकद्वा
रेणाह आहुरिति षड्भिः इंद्रियेशं मनो अभीषून् रश्मीनाहुः मात्राः शब्दादीन् वर्त्मानि गंतव्यदेशानाहुः सत्वं चित्तं
बृहद्देहव्यापि बंधुरं बंधनं विशिष्टं विनाशनिबद्धमिव शरीरे भवति ईशसृष्टमिति वेधनकर्तृत्वाशयवेत्यर्थः ४१ प्रा
णादयः पंच नागः कूर्मश्च कृकरो देवदत्तो धनंजयः वेत्यवं दशविधं प्राणमक्षमभिमानं नेमोहंकारं जीवं रथिनं प्र
हुः जीवं शरं परं ब्रह्म लक्ष्यं यथा यत्तथा बाणे लक्ष्ये निपात्यते तथा प्रणवेन जीवो ‥ णोति यावत्तदर्थः ४२ ॥ ॥

श्री· भा· स· टी· ७२

रागादयो जीतव्याः आत्रैव नैरन्तर्योऽभिनिवेशः क्व विरतादृढसमाधेः सत्वप्रकृतयो परोपकारादिप्रवृत्तयः आत्रैव
४४ नृकायरूपं रथमात्मवशः उपकल्पः इंद्रियादिपरिकरो यस्मिन् तथाभूतं यावद्धत्ते तावद्देवगरिष्ठानां गुरूणां च
रणसेवया निशितं ज्ञानखड्गं बिभ्रत् अच्युताश्रयः सन्निरस्तशत्रुः उपशान्तः स्वानंदेन तुष्टो भूत्वा इदं रथादिकम्
पेदेत्तेत्यर्थः ४५ अच्युताश्रयीभावे बाधकमाह नो चेदिति प्रमत्तो बहिर्मुखो यं इंद्रियवाजिनः सूताश्च तेउत्पथे
प्रवृत्तिमार्गं नीत्वा विषयाख्येषु दस्युषु निक्षिपंति हि यैः सूतेन च वर्त्मानं तमो येन मसमान्ध्ये उग्रमृत्युभयं यस्मिन् ४६

रागो द्वेषश्च लोभश्च शोकमोहौ भयं मदः मानोवमानोसूया च माया हिंसा च मत्सरः ४३ रजः प्रमादः
क्षुन्निद्रा शत्रवस्त्वेवमादयः रजस्तमःप्रकृतयः सत्वप्रकृतयः क्वचित् ४४ यावन्नृकायरथमात्मवशो
पकल्पं धत्ते गरिष्ठचरणार्चनया निशातं ज्ञानासिमच्युतबलो दधदस्तशत्रुः स्वानन्दतुष्ट उपशान्त इदं
विजह्यात् ४५ नो चेत्प्रमत्तमसदिंद्रियवाजिसूता नीत्वोत्पथं विषयदस्युषु निक्षिपंति ते दस्यवः सहय
सूतममुं तमोंधसंसारकूप उरुमृत्युभये क्षिपंति ४६ प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकं आवर्तते प्रवृ
त्तेन निवृत्तेनाश्नुतेमृतं ४७ हिंस्रं द्रव्यमयं काम्यमग्निहोत्राद्यशांतिदं दर्शश्च पूर्णमासश्च चातुर्मास्यं प
शुः सुतः ४८ एतदिष्टं प्रवृत्ताख्यं हुतं प्रहुतमेव च पूर्तं सुरालयारामकूपाजीव्यादिलक्षणं ४९ ॥ ॥

टी·

तत्र च वैदिकं हिंसात्मकमार्त्यादिकारिणः पुंसः कथमेवं नर्थप्राप्तिः स्यादित्याशंक्य वैदोक्तकर्मणो द्वैविध्यं दर्शयन् फलभेद
माह प्रवृत्तं चेति द्वाभ्यां ४७ हिंस्रं पशुहननादिकर्मयुक्तं अशांतिदं पुनः पुनः संसारप्रदं आदिशब्दार्थविवरणे दर्शश्चेति पशुः
पशुयागः सुतः सोमयागः ४८ एतन्नैवेष्टं देवमुद्दिश्य वह्नि निहरणेन तत्सर्वं निक्षिप्यादाने एतदेव
दिकाम्यमशांतिदं च तद्धि प्रवृत्ताख्यमपीत्यर्थः
अन्नदानप्रपादि ४९ ॥

राम· ७२

प्रवृत्तेन कर्मणा पूर्वोक्ताधोक्ताभ्यामाह त्रिप्रकारमाह द्रव्यस्यैव पुरोडाशादेः सूक्ष्मो विपाकः परिणामो देहान्तरारंभकः येन संपरि
ष्वक्तो गच्छतिय एवक्तावपशादेनोक्तइति तत्पंचम्यामाज्ञतावापः पुरुषवचसो भवंतीतिपाठांतरे द्रव्यशब्देनतेनोमारशब्दोक्तानी
द्रियाणि सूक्ष्मविपाकशब्देनहृदयाग्रप्रद्योतः तथा च श्रुतिस्मद्भ्मात्तेजोमात्राः सममभ्याददानोहृदयमेवान्ववक्रामतीतितथा
तस्यहैतस्यहृदयस्याग्रंप्रद्योततेतेनैष आत्मा निष्क्रामतीतिधूमादिशब्दैः तत्तदभिमानिन्यो देवताः तत्रापक्षयः कृष्णपक्षः सोमः
सोमलोकः तत्र भुक्तभोगस्यावरोहणप्रकारमाह दर्शाइत्यादि दर्शो इति विपरीतलक्षणायाविषयभोगक्षयप्रोक्ताग्निनादेह
नयेनादर्शनमुच्यते एतदुक्तं भवति अतस्तस्य भुक्तोपभोग्याति वाहिकदेवताभिः सोमलोकं प्रापितः तद्भोगावसाने विलीन
देहोवृष्टिद्वारेण पृथिवीरुधादिसान्यापत्तिक्रमेण जायते एवं पुनर्भवहेतुः पितृयानं प्रवृत्तकर्ममार्ग इति दर्शयितुमाह भूयते पु

द्रव्यस्यसूक्ष्मविपाकस्तु धूमोरात्रिरपक्षयः अयनं दक्षिणं सोमोदर्शो वायुर्धीरुधः अन्नरेत इति क्रमशः पितृयानेपुन
र्भवः ५० एकैकशोन्वानुपूर्व्यं भूत्वा भूत्वेह जायते निषेकादिश्मशानांतैः संस्कारैः संस्कृतो द्विजः ५१ इंद्रियेषुक्रि
यायज्ञान्वृत्तानदीपेषु जुह्वति इंद्रियाणि मनस्यूर्मौ वाचि वैकारिकं मनः ५२ वाचं वर्णसमाम्नाये तमोंकारे स्वरेन्य
सेत ओंकारं बिंदौ नादे तं तं तु प्राणे महत्यमुं ५३ अग्निः सूर्यो दिवा प्राह्णः शुक्लो राकोत्तरं स्वराट् विश्वोथ तैजसः प्राज्ञस्तुर्य आत्मा सम

न्वयात् ५४
...नर्भवमेवाह एकैकशोन्वानुपूर्व्यं क्रमेण भूत्वा तत्तज्जन्मानि प्राप्येह भूमौ जायते तत्र अधिकारिणमाह निषेकादीति अन्ये तु स्त्रिष्टादिका
र्यप्रवृत्तं जन्म न लभत इत्यर्थः ५१ निवृत्तकर्मनिष्ठस्योपासनाविशेषमुपदिशन्निर्वि वादमार्गेण ब्रह्मलोकप्राप्तिमाह इंद्रियेषुक्रियादि
नाय ज्ञाः क्रियायज्ञश्च ज्ञानदीपेषु द्रव्याणि जुह्वति अत्र इंद्रियाणि नियम्य अंतर्मुखानि कृत्वा ते ज्ञानदीप्ते नेत्यनेन तथा तेषु इंद्रियव्यापाराणामिष्टत्वादीनामि
द्रियसंबंधाभावयतीत्यर्थः एवमुत्तरत्रापि ५२ कुर्मोदर्शनादिसंकल्पस्वरूपमनसि वैकारिके विकारयुक्ते मनो वाचि वाचं वर्णादिलक्ष
णायां वाचि मनः कर्तृत्वादिविकारे भजति वर्णानां समाम्नाये समुदाये तद्धि प्रधानत्वात् स्वरप्राकाशादिस्वरस्वरूपात्मके ओंकारं बिंदौ तं च ना
दं प्राणे सूत्रात्मनि महति ब्रह्मणि ५२ अग्निरितितत्तदभिमानिन्यो देवता प्राप्नोतीति एवं उत्तरदिवाहः प्राह्णः तस्मैवाप्राः राका पूर्णपक्ष
प्राणः उत्तरायणं शुक्लो राका इति च पुराणानंतरमतं उत्तरमयनं स्वराट् ब्रह्मा एवं ब्रह्मलोकं गतस्य भोगावसाने मोक्षप्रकारमाह विश्वं इति विश्वः
स्थूलोपाधिः तं स्थूलं सूक्ष्मे विलाप्य सूक्ष्मोपाधिः तैजसो भवति तं सूक्ष्मं कारणे विलाप्य कारणोपाधिः प्राज्ञो भवति कारणं च सर्वसा
क्षित्वेन आत्मादिस्वरूपे विलाप्य तुर्यो भवति तेषां च व्याभिचारिणां साक्षित्वेन अन्वयात् शुद्ध आत्मा भवति मुच्यते इत्यर्थः ५४ ॥

श्रीः
भा॰ स॰
टी॰
६६

यद्योनयोऽभवन्नभवान्निवर्तन्ते तेन यानं निवर्तनमित्यर्थः ५५ वेदेन निर्मितेनेयममभिसंभवन्तीत्यादिनाऽर्चिषमभिसंभवन्तीत्या
दिना वा विश्वसृजेन विविच्य ज्ञापिते इत्यर्थः जननस्यापि देहस्यापि न मुह्यति ५६ नन्वहं तत् मा रूप्यादाविति जननानां देहादीनां आदौ
कारणत्वेन श्रुते चावधित्वेन यत्तु मतं न यावद्विभीममतं न भीरूपरमवर्ववर्ववउत्त्वनीचं तमोप्रकाशः नन्वस्य सर्वं श्रयत्तानीयत्स्व
यमेव न तस्माद्व्यतिरिक्तं वस्तु किंचिदास्ते येन मुह्यादित्यर्थः ५७ ननु तर्हि कथं दृष्टा गर्भः तस्यापि प्रतीयते न याहृश्यवाधि
तः तत्कविरोधेन सर्वतो वादिनोपि आभासः प्रतिबिंबादिवस्तुनयाऽयथास्यतः तद्वदिंद्रियकं सर्वमर्थं येन विकल्पितं तत्तदपर
मार्थतः दुर्घटत्वात् ५८ तद्देवाहस्तित्यादीनां पदभूतानां छायायैकवसु आलंबनं रूपदेहादि संघातानां भयरिणामानामध्ये॰

देवयानमिदं प्राहुः शुक्लो राकोऽन्तरं स्वराट् विश्वश्च तैजसः प्राज्ञ भवाभवाननुपर्वशः आत्मयात्मपर्थान्तात्मा यात्म
स्थाननिवर्तते ५५ यमते पितृदेवानामयने वेदनिर्मिते शास्त्रेणावक्षुषा वेद जनस्यापि न मुह्यति ५६ आदावं॰
ते जननानां समाहित्विरंतः परावरं ज्ञानंज्ञेयं वचो वाच्यं तमोज्योतिः स्वयं स्वयं ५७ आबाधितोपि ह्याभासो यथा वस्तु
तया स्मृतः दुर्घटत्वादैन्द्रियकं तद्वदर्थविकल्पितम् ५८ क्षित्यादीनामिहार्थानां छायानकतमापिहि नसं॰
घातो विकारोपि न दृश्यकानितो मृषा ५९ धातवोवयमित्वाच्च तन्मात्रावयवैर्विना नस्युर्ह्यसत्यवयविन्य
सतवयवोंततः ६०

कतमापि न भवति यतावत्तेषां संघातः हृत्तायाणामिव वनपकदेशाकर्षणो सर्वाकर्षणानुपपत्तेः नह्येकस्मिन्तृणे आकृ
ष्टे सर्वं वनमाकृष्यते नच विकार आरंभेवयवी अपि प्राह्यात्र परिणामोपि कृतः स किं सावयवेभ्यो वा परिणतेभ्यो वा दृश्य॰
कतदविशेषो वा न तावदंत्यतदृष्टकृतयाऽप्रतीतेः न चान्तिमः स किं प्रत्यवयवसर्वांशेन वा एकदेशेन वा अद्य अंगुलिमात्रेपि दे
हतुद्धिः स्यात् द्वितीये तन्त्यांशांगीकारे सत्यनवस्थास्यात् अतो मृषेवेत्यर्थः ५९ एवं देहादेर्मिथ्यात्वमुक्त्वा तेन नादि
त्यादीनामपि मिथ्यात्वमाह धारयंतीति धातवो महाभूतानि तन्मात्रैः सत्तैरवयवैर्विना नस्युः अवयविवान्नेषामपि तर्ह्येव
यवः सत्यः इति चेत् तत्राह उक्तप्रकारेणावयविनि असति अवयवोप्यन्ततोऽसन्नेव स्यात् अवयवि प्रतीत्यन्यथानुपपत्तिं विनान
त्सद्भावे प्रमाणाभावादित्यर्थः तदुक्तं पंचमस्कंधे एवं
निरुक्तंक्षितिशब्दवृत्तमित्यादि ६०

४२

६

नन्ववयविनो भावे आगमापायिषु बाल्यादिषु सोऽयं देवदत्त इति प्रत्यभिज्ञानेन स्यात्तत्रोक्तं भेदैः आविर्भावतिरोभावैर्धर्मै
केषु न चाप्ययितत्तद्धर्मीति न ग्राह्यः स्यादिति वस्तुनः परमात्मनो विकल्पे भेदे सति यद्वा वस्तुनो विषयाविकल्पे सति प्र
वृन्दसर्वदोषप्रसादृश्यात् सर्पवत्तिभ्रमः स्यात् स च तावदेव यावदविद्यानिवृत्तिः ननु सर्वमिथ्यात्वे कुतस्तस्य विधिनिषेधता क
थं तत्राह स्वप्नमध्ये जाग्रत्स्वापव्यवस्था यथेति ६१ इदानीमुक्तमेवाद्वैतं भावनात्रयोपदेशेन दृढीकरोति भावाद्वैतमिति च

स्यात्सादृश्यभ्रमस्तावद्विकल्पे सति वस्तुनः जाग्रत्स्वापौ यथा स्वप्ने तथा विधिनिषेधता ६१ भावाद्वैतं क्रि
याद्वैतं द्रव्याद्वैतं तथात्मनः वर्तयन्स्वानुभूत्येह त्रीन्स्वप्नान्धुनुते मुनिः ६२ कार्यकारणवस्त्वैक्यमर्शनं
पटतन्तुवत् अवस्तुत्वाद्विकल्पस्य भावाद्वैतं तदुच्यते ६३ यद्ब्रह्मणि परे साक्षात्सर्वकर्मसमर्पणं मनो॰
वाक्तनुभिः पार्थ क्रियाद्वैतं तदुच्यते ६४ आत्मजायासुतादीनामन्येषां सर्वदेहिनां यत्स्वार्थकामयोरैक्यं
द्रव्याद्वैतं तदुच्यते ६५ यद्यस्य वानिषिद्धं स्याद्येन यत्र यतो नृप स तेनेहेत कार्याणि नरो नान्यैरनापदि
६६ एतैरन्यैश्च वेदोक्तैर्वर्तमानः स्वकर्मभिः गृहेऽप्यस्य गतिं यायाद्राजं
स्तद्भक्तिभाङ्नरः ६७ ॥

तुर्भिः वर्तयन्स्वानुभूत्या आत्मतत्त्वानुभावेन त्रीन्जाग्रदादीन् त्रयश्चावस्थास्त्रयः स्वप्ना इति श्रुतेः यद्वा वस्तुभेदबुद्धि
रेकः स्वप्नः ततस्तदर्थक्रियाभेदबुद्धिः ततो मम कर्मसाधितमेतत्फलं ममैव भोग्यमिति तृतीयः तान्धुनुते निवर्तय
ति ६२ कार्यकारणयोर्वस्त्व— समर्शनं तन्तव एव न पट इति ६३ मनोवाक्तनुभिः कृतानां कर्मणां समर्पणैः समर्प
णामिति वा उद्दिष्टफलभेदो हि क्रियाभेदहेतुः ईश्वरार्पणेन तदभावात्क्रियाणामद्वैतं ६४ आत्मनः स्वस्य जायादीनां॰
वस्वार्थस्तु कामस्तु नयोः देहादीनां पञ्चभूतात्मकत्वेन भोक्तृषु परमात्मत्वेन चाभेदाद्बलेनार्थकामयोरैक्यदर्शनमित्य
र्थः ६५ उक्तानामाश्रमधर्माणामनिषिद्धादि व्याख्यायदिति यद्वृत्त्या येनोपायेन यतः सकाशात् ६६ प्रस्तुतमुपसंहरति एतैरन्यैश्च॰
हस्थस्य गतिं तद्भक्तिभाक् तस्य भक्तः ६७

श्री॰
भा॰ स॰
टी॰
७२

एवं च सर्वसाधारणमुक्त्वा भक्तस्य तु भक्तेरेवं सर्वपुरुषार्थहेतुत्वमिति पांडवानेव लक्षीकृत्याह यथा हीति हे नृ
प देव नृपैर्देवैश्च सहायैः दुस्त्यजादापद्गणादिति वा आत्मनः श्रीकृष्णादेव प्रभोर्हेतोः युद्धभावश्चार्थः उत्तारणेन
रतेत्यर्थः यथा यथावत् तमेव भजतेति शेषः यद्वा यथा आपद्गणादुत्तीर्णास्तथा यथावत्क्रतून् अहार्षी
त् तथा श्रीकृष्णादेव तारकात् संसारादप्युत्तरतेत्यर्थः ६८ श्रीकृष्णसेवामहत्त्वमात्मवृत्तान्तेन प्रपञ्चयति त्रि

यथा हि यूयं नृपदेव दुस्त्यजादापद्गणादुत्तरतात्मनः प्रभोः यत्पादपंकेरुहसेवया भवानहा
र्षीन्निर्जितदिग्गजः क्रतून् ६८ अहं पुराभवं कश्चिद्गंधर्व उपबर्हणः नाम्नातीते महाकल्पे गं
धर्वाणां सुसंमतः ६९ रूपपेशलमाधुर्यसौगंध्यप्रियदर्शनः स्त्रीणां प्रियतमो नित्यं मत्तस्व
पुरलंपटः ७० एकदा देवसत्रे तु गंधर्वाप्सरसां गणाः उपहूता विश्वसृग्भिर्हरिगाथोपगायने
७१ अहं च गायंस्तद्विद्वान् स्त्रीभिः परिवृतो गतः ज्ञात्वा विश्वसृजस्तन्मे हेलनं शेपुरोजसा ७२
याहि त्वं शूद्रतामाशु नष्टश्रीः कृतहेलनः तावद्दास्यामहं जज्ञे तत्रापि ब्रह्मवादिनां ७२ शुश्रू
षयानुषंगेन प्राप्तोहं ब्रह्मपुत्रतां ७३ धर्मस्ते गृहमेधीयो वर्णितः पापनाशनः गृहस्थो येन
पदवीमंजसा न्यासिनामियात् ७४

तत्कृपया च सिद्ध्यतीति दर्शयन् स्वपूर्ववृत्तान्तमाह अहमिति सार्धैः पंचभिः नाम्ना उपबर्हणः ६९
पेशलं सौकुमार्यं रूपादिभिः प्रियं दर्शनं यस्य ७० ७१ तदभिज्ञाने वि
द्वान् उन्मत्तः सन् गायन्नेव गतः ७२ ॥

राम॰
७२

वंतकृतार्थयवेति इत्येषांपुनःसर्वंश्लोकानेवपठति यूयमिति ७५ सोवाअयं ७६ ७७ ७८ ७९ ८० इति

यूयंनृलोकेवतभूरिभागालोकंपुनानामुनयोभियंति येषांगृहानावसतीतिसाक्षाद्गूढंपरंब्रह्ममनुष्य
लिंगं ७५ सवाअयंब्रह्ममहद्विमृग्यकैवल्यनिर्वाणसुखानुभूतिः प्रियःसुहृद्वःखलुमातुलेयआत्मा
र्हणीयोविधिकृद्गुरुश्च ७६ नयस्यसाक्षाद्भवपद्मजादिभीरूपंधियावस्तुतयोपवर्णितं मौनेनभक्त्योप
शमेनपूजितःप्रसीदतामेषसमात्वतांपतिः ७७ श्रीशुकउवाच इतिदेवर्षिणाप्रोक्तंनिशम्यभरतर्षभः
पूजयामाससुप्रीतःकृष्णंचप्रेमविह्वलः ७८ कृष्णपार्थावुपामंत्र्यपूजितःप्रययौमुनिः श्रुत्वाकृष्णंपरंब्र
ह्मपार्थःपरमविस्मितः ७९ इतिदाक्षायणीनांतेपृथग्वंशाःप्रकीर्तिताः देवासुरमनुष्याद्यालोकायत्र
चराचराः ८० इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेप्रह्लादानुचरितेयुधिष्ठिरनारदसंवादेपंचदशोध्या
यः १५ ॥ १५ ॥

श्रीभावार्थदीपिकायांसप्तमस्कंधेपंचदशोध्यायः १५ समाप्तोयंभागवतसप्तमस्कंधः ७ शुभं शुभंशुभंशुभं

7

४४ सप्तमस्कंधपत्राणि

१